4. P. निबद्धे.
5. H. & K.—०तेना.
6. H. & K.—०मुखाश्च.

cf. with our vv. 33, & 38-41 :—

चतुर्भिर्धातुभिः षड्भिश्चाङ्गैर्यः स्यात् प्रबध्यते ।
तस्मात् प्रबन्धः कथितो गीतलक्षणकोविदैः ॥ २ ॥

रामान्यारोफणा नेतु( ? ) स्यादस्मिन्रूपकाभिधा ।
उद्ग्राहाद्यास्तु चत्वारः स्वरादीनि च षट् तथा ॥ ३ ॥

वसन्ति यत्र स ज्ञेयः प्रबन्धो वस्तुसंज्ञया ।
आदौ उद्ग्राह्यते गीतं येनोद्ग्राहः स कीर्तितः ॥ ४ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तन्नतेन्ना यदुच्यन्ते तेन्नास्ते[1] शुभकारकाः ।
बिरुदाः शौर्यमाख्यान्ति [2]द्विषामुद्रेकदायिनः[3] ॥ ४४ ॥

पाटा वाद्यभवा वर्णाः पदमर्थप्रकाशकम् ।
गीतस्य स्वरतालाभ्यां पादाभ्यां मर्त्यवद्गतिः ॥ ४५ ॥

( अथ जातयः )

द्व्यङ्गादिकप्रबन्धानां पञ्चोक्ता जातयः क्रमात् ।
द्विश्रुतिः स्यात् त्रिश्रुतिश्च तथा प्रोक्ता चतुःश्रुतिः ॥ ४६ ॥

अनिर्युक्ता च निर्युक्ता पञ्चैता जातयः स्मृताः ।
रूपकोऽयं दशभवो वस्तु सूडा ध्रुवादयः ॥ ४७ ॥

सूडा(:) पञ्चविधाः प्रोक्ता उत्तमोत्तम उत्तमः ।
मध्यमोऽथ जघन्यश्चातिजघन्यः क्रमादमी ॥ ४८ ॥

उत्तमोत्तमसूडस्तु सालिगा( सालगा )ख्यो महारसः ।
प्रवर्तते सुखकरः सोऽयं सर्वजनप्रियः ॥ ४९ ॥

आद्यो ध्रुवस्ततो मण्ठः प्रतिमण्ठो निसारुकः ।
अड्डतालस्ततो रास एकतालीत्यमी क्रमात्[4] ॥ ५० ॥

---

प्रोक्तो मेलापकस्तज्ज्ञैरुद्ग्राहध्रुवमेलनात् ।
प्रबन्धेषु ध्रुवत्वेन ध्रुव इत्यभिधीयते ॥ ५ ॥

स्वयं यत्र प्रबन्धे स्यादनेनैव प्रपूरणम् ।
आभोगः कथितस्तेन परमर्द्दिमहीभुजा ॥ ६ ॥

वर्ज्यौ मेलापकाभोगौ प्रबन्धेषु द्विजातिषु ।
त्रिधातुकप्रबन्धेषु तयोरेक विवर्जयेत् ॥ ८ ॥

× × ×

अङ्गत्वमेषां केनापि यदुक्तं तन्न साम्प्रतम् ॥ ९ ॥

—सं० स० सा० ४. २-९. pp. 23-24.

1. H. & K.—तेनास्ति.    2. H. & K.—द्वाभ्यामु०

3. P.—०मुदगदायिनः.

4. H. marginal gloss—ध्रुवा जयंत्याद्या षोडशः कमलाकराद्याः षट् मंठकाः त्रिनराद्याश्चत्वारः प्रतिमंठकाः समराह्वयाद्या षोढा निसारुकः निशंकाद्याः षोडा अड्डतालाः कंबुजाख्याः षट्रासकाः एकताली त्रिधा रामा तारा च चन्द्रिका ॥

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

यथा सरो विना नीरं यथा गीतं ध्रुवं विना ।
षोडशानां ध्रुवाणां च तस्माल्लक्ष्म प्रचक्ष(क्ष्य)ते ॥ ५१ ॥

( अथ ध्रुवाः )

जयन्तः शेखरोत्साहौ ततो मधुरनिर्मलौ ।
कुन्तलः कमलश्चारो[1] नन्दनश्चन्द्रशेखरः ॥ ५२ ॥

कामदो विजयाख्यश्च कन्दर्पजयमङ्गलौ[2] ।
तिलको ललितश्चैषां नामतो लक्ष्म तूच्यते ॥ ५३ ॥

उद्ग्राहे [3]स्यात् पदद्वन्द्वं मध्ये कार्यं पदद्वयम् ।
आभोगे पदयुग्मं स्यात्खण्डानीत्थं ध्रुवस्य षट् ॥ ५४ ॥

षट्पदस्तूत्तमः प्रोक्तो मध्यमः पञ्चभिः पदैः ।
कनिष्ठश्च चतुर्भिः स्यादित्थं ते त्रिविधा ध्रुवाः ॥ ५५ ॥

उद्ग्राहखण्डकद्वन्द्वं शुद्धयुक्तिविनिर्मितम्[4] ।
अन्यानि तु पदानि स्युः सर्वाणि नियमादृते ॥ ५६ ॥

ध्रुव आरोप्यते तस्मादथाभोगस्य खण्डके ।
नेतुर्नामाङ्कितं चाद्यं गातुर्नाम्नाङ्कितं[5] पदम् ॥ ५७ ॥

एकादशाक्षरात् खण्डादेकैकाक्षरवर्द्धितैः ॥
खण्डैर्ध्रुवाः षोडश स्युः षड्विंशत्यक्षरावधि ॥ ५८ ॥

आदिताले च[6] शृङ्गारे जयन्तः प्रथमो ध्रुवः ।
एकादशाक्षरपदो ह्यायुर्वृद्धिकरो मतः ॥ ५९ ॥

---

Note that in v. 50 निसारुकः is given for निःसारुकः which latter is not permitted by metre. Possibly सालग and निःसारुक were known as सालिग and निसारुक in the region in which this work was composed.

1. P.—चामरो.
2. H. & K.—कंदर्पो जयमङ्गलः.
3. P.—उद्ग्राहेऽस्मात्.
4. H. & K.—शुद्धबुद्धिर्विनिर्मितम्.
5. H. & K.—नामाङ्कितं.
6. P.—०तालिन.



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शेखरस्तु[1] रसे वीरे हंसके स्वामिभाग्यदः ।
उत्साहश्च रसे वीरे जगणे विजयप्रदः ॥ ६० ॥

शान्ते च मधुरो [2]गेयस्तालेनानन्ददायकः ।
कारुण्ये निर्मलो गेय एकताल्यां सुखप्रदः[3] ॥ ६१ ॥

अद्भुताख्ये रसे श्रीदः कुन्तलो लघुशेखरे ।
आनन्दश्च( श्चापि ) कमलः शृङ्गारे सुखकृत्सदा ॥ ६२ ॥

चारश्चाचपुटे[4] तालेऽभीष्टदस्त्वद्भुते रसे ।
नन्दनः कन्दुके ताले[5] शृङ्गारे सौख्यदायकः ॥ ६३ ॥

रौद्रे तृतीयतालेन श्रीदः स्याच्चन्द्रशेखरः ।
कामदस्तुरगलीलेऽद्य शृङ्गारे सौख्यदायकः[6] ॥ ६४ ॥

विजयो दर्पणे ताले[7] शृङ्गारे कीर्तिदायकः ।
अद्भुते चाटुतालेन[8] कन्दर्पः कुलवृद्धिकृत् ॥ ६५ ॥

जयमङ्गलस्तु शान्ते सुखदो हंसलीलके[9] ।
लीलातालेन शृङ्गारे तिलको धनवृद्धिकृत् ॥ ६६ ॥

अद्भुते[10] ललितो गेयः श्रीदश्च( श्चा )चपुटेन च ।
[11]षड्विंशत्यक्षरपदस्त्वेकैकाक्षरवर्द्धनात् ॥ ६७ ॥

इति सङ्क्षेपतश्चामी षोडशोदीरिता ध्रुवाः ।
पूर्वोक्तमण्ठकादीनां नामान्याहुर्यथाक्रमम् ॥ ६८ ॥

( अथ मण्ठकाः )

कमलाकरः कलापः( पश्च ) कमलश्चैव सुन्दरः ।
वल्लभो मङ्गलश्चामी षडुक्ता मण्ठका बुधैः ॥ ६९ ॥

---

1. P.—शेखरश्च.
2. P.—गार्ग्यतालेन॰
3. H. & K. interchange the order of verses 61 and 62.
4. P.—चामरश्च चपुटे.
5. P.—कुन्दुके ताले.
6. P. omits verse 64.
7. H. & K.—दर्पणतालेन.
8. H. & K.—चाटुतालेन.
9. P.—हंसलीके.
10. P. अद्भुते।.
11. H.—षड्विंशत्यक्षरः पादस्त्वेकैका॰

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पूर्वं खण्डद्वयं गेयमुच्चैः खण्डं ततः परम् ।
ध्रुव आरोप्यते तस्मादाभोगो गीयते सकृत् ॥ ७० ॥

कमलाकरस्तु गेयः शृङ्गारे जगणेन च ।
नगणेन च गातव्यः कलापः करुणे रसे[1] ॥ ७१ ॥

शृङ्गारे सुन्दरो मण्ठः सगणेन च गीयते ।
अद्भुते वल्लभो येन शृङ्गारे भेन मङ्गलः[2] ॥ ७२ ॥

( अथ प्रतिमण्ठाः )

प्रतिमण्ठा अथोच्यन्ते चत्वारोऽमरमन्दिरौ[3] ।
विचारः कुन्दसंज्ञश्च तेषां लक्ष्माऽथ कथ्यते ॥ ७३ ॥

मण्ठवत् प्रतिमण्ठस्य सर्वं ग्राहादिकं मतम्[4] ।
प्रतिमण्ठेन तालेन शृङ्गारे प्रथमोऽमरः[5] ॥ ७४ ॥

गुरुणा[6] वा लघुद्वन्द्वे कारुण्ये[7] मन्दिरो मतः ।
विचारस्त्वद्भुतो( ते ) गेयो विरामान्ताल्लघुद्वयात् ॥ ७५ ॥

कुन्दाख्यः प्रतिमण्ठोऽपि गुरुद्वन्द्वात् तथाद्भुते ।
गेया विलम्बमानेन सर्वेऽपि प्रतिमण्ठकाः ॥ ७६ ॥

इति प्रतिमण्ठलक्षणम् ॥

( अथ निःसारुकः )

[8]निःसारुकोऽथ विज्ञेयः षोढात्र[9] समराह्वयः ।
विशालो नन्दवैकुण्ठौ[10] वाञ्छितो विजयस्तथा ॥ ७७ ॥

---

1. v. 71 is omitted in H. & K. This verse refers to कमलाकर and कलाप only. The use of कमल is omitted in H. K. & P. It is obvious, therefore, that at least one line is missing in our mss. Possibly v. 71 was of three lines originally.
2. H. & K.—शृङ्गारो भनमङ्गलः.
3. H. & K.—चत्वारो नरमन्दिरौ.
4. H.—सर्वं संग्राहादिकं मतम् with a marginal correction of उत् for सं.
5. H. & K.—प्रथमो नरः.
6. H. & K.—गुणा.
7. H. & K.—करुणे
8. H. & K.—निस्सारको.
9. H. & K.—तत् for अत्र.
10. H. & K.—नन्दवैकुण्ठो.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

समराख्यो रसे वीरे विरामान्ताल्लघुद्वयात्[1] ।
द्रुतयुग्माल्लघुश्चैको[2] विशाले चाद्भुतो रसः ॥ ७८ ॥

द्रुतात् ल( ताल )घुद्वयेन स्यात् नन्दस्तु करुणे[3] रसे ।
द्रुताद्गुरुर्लघुश्चैको वैकुण्ठो वीरहास्ययोः ॥ ७९ ॥

द्रुतद्वन्द्वाल्लघुद्वन्द्वाच्छृङ्गारे वाञ्छितो मतः ।
विजयस्तु गुरुद्वन्द्वाच्छृङ्गारे विजयप्रदः ॥ ८० ॥

इति निःसारुकलक्षणम्[4] ॥

( अथ अड्डतालः )

अड्डतालोऽपि षोढा ( स्यात् ) निःशङ्कश्चमरामरौ ।
अरविन्दः सुनन्दश्च महाशीलोऽथ लक्षणम् ॥ ८१ ॥

अड्डतालेन तालेन गातव्यश्चाड्डतालकः ।
लघुना गुरुणा सोऽयं निःशङ्को वीरहास्ययोः ॥ ८२ ॥

द्रुतयुग्माल्लगौ स्यातां चमरेऽद्भुतनिर्मिते ।
लगुरुभ्यां द्रुतद्वन्द्वादमरः करुणे रसे[5] ॥ ८३ ॥

द्रुताल्लघुगुरुश्चैकोऽरविन्दे वीरहास्यजे ।
[6]बिन्दुयुग्माल्लघुर्यत्र स शृङ्गारे सुनन्दकः ॥ ८४ ॥

महाशीलो रसे शान्ते गुरुयुग्माल्लघुद्वयात् ।
अड्डतालस्य नामानि प्रोक्तानि बहुधा बुधैः ॥ ८५ ॥

इत्यड्डताललक्षणम् ॥

( अथ रासकः )

षड्विधो रासकश्चाथ कम्बुजो मन्दिराम्बुजौ ।
विनोदश्चन्द्रसरसावेतेषामथ लक्षणम् ॥ ८६ ॥

---

1. P.— विरामान्तलघुद्वयात्.
2. H. & K.— ०लघुस्त्वेको.
3. P.— करुणा रसे.
4. H. & K.— निःसारक०
5. H. & K.— करुणा रसे.
6. H. marginal gloss on बिन्दु — द्रुत इति उच्यते.

रासकेनैव तालेन[1] रासकाः कम्बुजोऽद्भुते[2] ।
[3]आलापादेर्ध्रुवपदान्मन्दिरः करुणे रसे ॥ ८७ ॥

उद्ग्राहश्च द्विखण्डः स्यादालापोऽस्य तु सोऽम्बुजः[4] ।
आलापान्ताद् ध्रुवपदाद् विनोदः प्रथमे रसे ॥ ८८ ॥

द्वितीयं खण्डमुद्ग्राहे तूचं यस्य स चन्द्रकः ।
उद्ग्राहाऽभोगयोः खण्डादुच्चात् सरसरासकः ॥ ८९ ॥

## इति रासकलक्षणम् ॥

( अथ एकताली )

एकताली त्रिधा ज्ञेया रामा[5] तारा च चन्द्रिका ।
एकमात्रिकतालेन द्रुता[6] मध्या विलम्बिता ॥ ९० ॥

## इत्येकतालीलक्षणम् ॥

( अथ सूडाः )

उत्तमः सालि(ल)गः सूडो ध्रुवाद्यैः सप्तभिर्भवेत् ।
[7]त्रिवडा( त्रिविधो ) [8]झम्पतालाद्यैर्युक्तश्च विविधैः पदैः ॥ ९१ ॥

परिपूर्णो भवेत् सूडः केचिदाचख्युरित्यतः[9] ।
हीनस्तु[10] मध्यमः प्रोक्तोऽधमो हीनतरस्तथा ॥ ९२ ॥

## इत्युत्तमोत्तमसालि(ल)गसूडः[11] ॥

---

1. H. marginal note—ऊगाहि — डि अभोग — डि.
2. H. marginal correction—सोऽम्बुजो for कम्बुजो
   P.—कम्बुजोऽद्भुतः ।
3. H.—आलापादेर्ध्रुवः पादान्.
4. P.—उद्ग्राहस्य द्विखण्डस्यादाआलापोस्य सोम्बुजः ।
5. P.—रमा.
6. H. & K.—कृता.
7. H. &. K.—त्रित्रिडा. 8. H. & K.—कम्प०
9. H. & K.— आचक्षुरित्यतः. 10. P.—हीनैस्तु
11. P.— इत्युत्तमोत्तमः सालिगः सूडः ।
    H.— इत्युत्तमोत्तमः सालिगसूडः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एलासूडस्तूत्तमः स्याद् गणैलाख्यश्च[1] मध्यमः ।
ढेङ्कीसूडो[2] जघन्यश्चालिसूडोऽतिजघन्यकः ॥ ९३ ॥

प्रत्येकं तेऽपि विज्ञेया उत्तमा मध्यमाऽधमाः ।
एलाढेङ्कयालिसूडास्तु[3] नोक्ता ग्रन्थस्य गौरवात् ॥ ९४ ॥

[4]सूडादिबन्धक्रमरीतिविद्यो
रागेषु तालेषु महाप्रगल्भः[5] ।
गीते रसे चाऽपि विशेषविज्ञो
भवेत् स भूपालसभावतंसः ॥ ९५ ॥

इति मलधारिगच्छमण्डनश्रीराजशेखरसूरिशिष्यवाचनाचार्यश्रीसुधाकलशविरचिते स्वोपज्ञ-सङ्गीतोपनिषद्ग्रन्थसारोद्धारे गीतप्रकाशनो नाम प्रथमोऽध्यायः[6] ॥ १ ॥

---

1. P.—गणैलाख्यश्च. H. & K.—गणैलाक्षश्च.
2. H. & K.—डेर्कीसूडो. P.—ढंकीसूडो.
3. H. & K.—डेक्यालिसून्यास्तु with marginal correction in H. as शूडा for शून्या.
4. H. & K.—शून्यादिबन्ध॰ with a marginal note (or correction) in H.—एलासूडादिबन्धः.
5. P.—तालेषु च पप्रगल्भः
6. H. & K add समाप्तः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# द्वितीयोऽध्यायः ।

रागो यत्र न चैव नापि विशदा भाषास्ति यद्ग्राहिणी[1]
यद् दूरे [2]श्रुतिवेदिनोऽपि विषयग्रामोऽपि यस्माद्बहिः ।
स्त्रीवित्तादिषु[3] मूर्च्छनैव(क)मनसो न स्युर्यदालोककात्[4]
तद् वन्दे परमं महः प्रतिपदं गीताद्यन(द)न्यादृशम् ।। १ ।।

द्राक्षापानकमोदकादिरसवत्यास्वादवन्ध्या[5] अपि
स्वर्गस्थाः क्षि(क्ष)पयन्ति[6] कालमखिलं यस्मिन्निलीनाः सुखम् ।
दत्ते यत्[7] परमं पदं जिनपतिर्देवो यदाराधितः
सत्पिण्डप्रभवः स कोऽपि विजयी नादो विशुद्धः सताम् ।। २ ।।

ये चक्रिणः स्युर्निधयो नवैषु
शङ्खाभिधानो नवमो निधिर्यः ।
तूर्याणि वाद्यानि[8] सनाटकानि
सर्वाणि तत्रैव समुद्भवते ।। ३ ।।

इति जैनमते तूर्यत्रिकस्योत्पत्तिरिष्यते ।
हरात् सङ्गीतनिष्पत्तिः प्रसिद्धा त्वखिले जने ।। ४ ।।

गीतं वाद्यं तथा नृत्यं तालवर्जं न शोभते ।
तालाभावान्न मेलः स्यादमेलादव्यवस्थितिः[9] ।। ५ ।।

न रङ्गमव्यवस्थातो विना रङ्गं कुतो लयः ।
लयं विना न सौख्यं स्यात् तन्मूलं ताल उच्यते ।। ६ ।।

---

1. H. & K.—भाषाश्रयग्राहिणी.  2. P.—श्रुतिर्दर्शिनोऽपि.
3. H. & K.—स्त्रीचित्तादिषु.  4. H. & K.—न स्युर्यदालोककास्तद्वन्दे.
5. H. & K.—रसवन्त्यास्वादवन्ध्या.
6. A better reading would be क्षपयन्ति but P. H. & K. read क्षिपयन्ति.
7. H. & K.—तत्.  8. P.—नाद्यानि.
9. H. & K.— स्यादमेलादव्यवस्थितः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

( अथ तालाः )

[1]कालमानकरस्तालश्चतुर्द्धा स द्रुतादिभिः ।
द्रुतो लघुर्गुरुश्चैव प्लुतः संज्ञाथ तद्भवा ॥ ७ ॥

द्रुतादीनां चतुर्णां स्युः पञ्च पञ्चाभिधाः क्रमात्[2] ।
बिन्दुकं च द्रुतं व्योम व्यञ्जनं चार्द्धमात्रिकम्[3] ॥ ८ ॥

व्यापकः सरलो ह्रस्वो लघुर्मात्रिक[4] इत्यपि[5] ।
गुरुर्दीर्घस्तथा वक्रः कला चैव द्विमात्रिकः[6] ॥ ९ ॥

त्रिमातृ( त्रि )कः प्लुतो दीप्तस्त्र्यङ्गः सामोद्भवस्तथा[7] ।
अर्द्धद्रुतः पञ्चभद्र एतावपि मतौ बुधैः[8] ॥ १० ॥

अर्द्धद्रुतं चतुर्भागमष्टभागं विरामगम् ।
पञ्चभद्रो विप्लुतः स्यात् पञ्चमात्रिकतत्त्वगौ[9] ॥ ११ ॥

प्रस्तारेऽनुपयोगित्वादेतौ प्रायो निरर्थकौ[10] ।
सोपयोगौ विरामादिकालमानकरौ परम्[11] ॥ १२ ॥

---

1. H. & K.—कालमानकृत०
2. P.—द्रुतादीनां च नामानि प्रत्येकं पञ्च पञ्च तु । Both the readings of H. as well as P. are good & mean the same thing but I have preferred H. ( & K.) in view of what follows.
3. H. & K.—चार्द्धमातृकम् .
4. H.—लघुमातृक०
5. P. reads as 9ª—व्यापको मात्रिको ह्रस्वः सरलश्च लघुस्तथा ।
6. P. reads as 9ᵇ—गुरुर्दीर्घश्च वक्रश्च कला चैव द्विमात्रिकः ॥
7. P. reads as 10ª—त्रिमात्रस्तु प्लुता दीपो स्त्र्यंगाः ...... द्भवस्तथा ।
8. P. omits 10ᵇ above and reads, instead, as 10ᵇ :—
   अर्द्धद्रुतं चतुर्भागमष्टभागं क्रमेण च ।
9. P. reads as v. 11 :—द्रुतस्यार्द्धस्य नाम स्यात् परं प्रायो निरर्थकः ।
   विप्णुतः( विप्लुतः ) पञ्चभद्रश्च पञ्चमात्रिक इत्यपि ॥ ११ ॥
10. P. reads—प्रस्तारे च निरर्थत्वादेतौ प्रायो निरर्थकौ ।
11. P. reads—एका मात्रा पञ्चभद्रे वाद्या शेषास्तथाऽग्रगाः ॥ १२ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कालप्रमाणकृत्तालस्तालमूलं द्रुतादयः ।
अत उच्चरणेऽमीषां कालो लगति तन्मितः ॥ १३ ॥[1]

पञ्चानां लघुवर्णानां यन्मात्रं वदतो भवेत् ।
तत्कालप्रमिता मात्रा तदर्धेऽदृ्भु( द्रु )तसम्भवः ॥ १४ ॥[2]

मात्रा द्रुतद्वयेनातश्चतुर्भिः स्याद् द्रुतैर्गुरुः ।
प्लुतस्तु द्रुतषट्केन विप्लुतो दशभिर्द्रुतैः ॥ १५ ॥[3]

अर्धद्रुतं त्रिविरतैर्द्रुतस्यैव विदुर्बुधाः ।
लघुर्द्रुतो विरामे स्याल्लघुर्वेके गुरु( : ) प्लुतैः ॥ १६ ॥[4]

विरामे केचिदाचख्युर्का( ख्युःका )लमानं तदर्धगम् ।[5]
द्रुते स्याद्देवता शम्भुः लघौ शैलात्मजा तथा[6] ॥ १७ ॥

शिवगौर्यौ गुरौ स्यातां त्रयो ब्रह्मादयः प्लुते ।[7]

---

1. P. omits this verse.
2. P. omits this verse.
3. P. omits this verse.
4. P. reads, as v. 13, the following for our v. 16 of H. & K.—
   लघुमाने विरामः स्याद् गुरोः प्रोक्तो लघोः पुनः ।
   द्रुतमाने द्रुतस्यापि द्रुतस्यार्धे यतिर्भवेत् ॥ १३ ॥
5. P. omits this line, which is $17^a$ in H. & K.
6. P. reads this as v. $14^a$. H. & K. read, as $17^b$,—
   द्रुते स्याद्देवता शम्भुर्विष्णुर्व्यापकमाश्रितः ।
7. This is $14^b$ in P. Both H. & K. read as $18^a$—
   गुरौ स्थितः सुरज्येष्ठस्त्रयो ब्रह्मादयः प्लुते ।

It would seem that the readings of H. & K. are better as they show Śiva as devatā for *druta*, Viṣṇu probably for *laghu* and Brahmā for *guru*, and the Trinity for *pluta*. But it seems that त्रयो ब्रह्मादयः प्लुते has induced the tradition of H (scribe of H. or his sources) to put Viṣṇu for Śailātmajā and Brahmā for Śiva-Gaurī in case of *laghu* and *guru* respectively. This is inferred because the *Saṅgīta-Cūḍāmaṇi* of Jagadekamalla ( G. O. Series vol. CXXVIII ) shows on p. 8—



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

समोऽतीतोऽनागतश्च ताले चेत्थं त्रिधा ग्रहः ॥ १८ ॥[1]

तूर्यस्त्रि( त्रि )कप्रियस्ताल( : )समकालं तु गृह्यते ।
स समः केचिदारब्धे तूर्ये सोऽतीतसंज्ञकः ॥ १९ ॥[2]

बह्वालापं विधायादौ गीतात्पूर्वं ग्रहस्तु यः ।
सोऽनागतग्रहो ज्ञेयस्ताले स्यात् सुखकृल्लयः ॥ २० ॥[3]

कारणं तालनिष्पत्तेः स्यात्प्रस्तारादिपञ्चकम् ।
प्रस्तारसङ्ख्यानष्टस्तूद्दिष्टः कलितमेव च ॥ २१ ॥[4]

---

द्रुते स्याद्देवता शम्भुर्लघुन्यद्रिपतेः सुता ॥ ६३ ॥
गौरा( री )शिवौ च गुरुणी( णि ) प्लुते ब्रह्मादयस्त्रयः ।

Also cf. the following verse of King Vema (c. 1400 A.D.), quoted in Bharatakośa ( p. 289 )—

द्रुते स्याद्देवता शिवः ।
लघौ तु देवता गौरी गुरौ गौरीशिवौ स्मृतौ ।
प्लुते तु देवता ज्ञेया ब्रह्मविष्णुमहेश्वराः ॥ वेमः ।

Since the Saṅgīta-Cūḍāmaṇi was composed in c. 1150 A.D., it may be inferred that this tradition, recorded in our codex P., was the one intended also by our author who composed his work in V. S. 1406 = 1349-50 A.D. But it is as well possible that he might have followed the different tradition obtained in our codex H. It will be seen that in several cases in this chapter the readings of H. are preferable to P., and hence even though we have preferred here the tradition of P., on the basis of a parallel tradition from Saṅgīta-cūḍāmaṇi, it does not necessarily follow that P. is superior to H.

1. P. omits the whole of $18^b$.

2. P. omits this verse. 3. P. omits this verse.

4. P. reads, as v. 15, the following :—

प्रस्तारसङ्ख्यानष्टोस्तू( ष्टस्तू )द्दिष्टः कलितमेव च ।
जायन्ते पञ्चभिस्तालास्तेभ्यस्तूर्यत्रिकं भवेत् ॥ १५ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सर्वेषामपि तालानां प्रस्तारो मातृका[1] मता ।
तस्मादादौ प्रवक्ष्यामि प्रस्तारं तालवृद्धये ॥ २२ ॥[2]

( अथ प्रस्ताराः )

प्रस्तारस्य गतिर्ज्ञेया चाङ्कानामिव वामतः ।
निवेश्य गुरुकं पूर्वं तत्राधो लघुकं न्यसेत् ॥ २३ ॥

ऊनं प्रायोऽपि पाश्चात्ये शेषं चोपरि विन्यसेत्[3] ।
यथापूर्वं भवेदूनैः[4] कुर्यात्सर्वं द्रुतावधि ॥ २४ ॥

इति प्रस्तारविधिः ॥[5]

[6]एकादिद्रुतप्रस्तारो यथा—

अथ सङ्ख्या विभणिपुराह[7] ।

[8]भवेदेकद्रुतादीनां सङ्ख्यैको द्वौ त्रयश्च षट् ।
दशैकोनविंशतिश्च षट्कं यावदयं क्रमः ॥ २५ ॥

तस्मादनन्तरावङ्कौ सान्तरौ द्वौ च तत्प्लुतेः[9] ।
अग्रिमाग्रिमसङ्ख्या स्याद्यावत् षण्णवतिद्रुतान् ॥ २६ ॥

---

1. H. & K.—मात्रिका.
2. This, and its following, are verses 16 ff. in P. O. begins with our v. 22, which is v. 1 in O.
3. P.—वन्यसेत्.
4. O. & P.—भवेदूते. O.—प्लुतावधिः ।
5. H. & K. omit.
6. P. omits and writes instead—एकद्रुतप्रस्तारे द्रुतद्वयप्रस्तारे द्रुतत्रयप्रस्तारे द्रुतचतुष्टये.
7. P. simply reads अथ सङ्ख्या in continuation of note 6 above. O. simply reads अथ सङ्ख्या and omits एकादि...यथा ।
8. P.—भिवेदेक॰
9. O. & H.—तत्प्लुतेः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

| | | |
|---|---|---|
| १ | ० | प्लुतः S |
| २ | ०० | । S |
| ३ | ० । | ००S |
| | ००० | S। |
| ६ | S | ।।। |
| | ।। | ००।। |
| | ००। | ।००। |
| | ।०० | ००००। |
| | ०००० | ०S० |
| १० | ०S | ०।।० |
| | ०।। | ।०।० |
| | ।०। | ०००।० |
| | ०००। | S०० |
| | S० | ।।०० |
| | ।।० | ००।०० |
| | ।० | ०।००० |
| | ०००० | ।०००० |
| | ०००० | ०००००० |
| | ०००००० | |
| | प्लुतशक्तः | इत्ये(त)द्द्रुत-प्रस्तारे भेदाः ॥ |

१।२।३।६।१०।१९।३३।६०।१०६।१९१।३४०।६१०।१०८९।१९५०ऽऽ३४८५।६२३६।१११५०। १९९४६। ३५६७०[1]। ६३८०२[2]।

एवमेकादिवृद्ध्या षण्णवतिद्रुतान् यावत् सङ्ख्याङ्का आनेयाः । इत्थं चाष्टादशद्रुत-मयप्लुतमयस्य सङ्ख्याङ्का अत्र लिखित्वा दर्शिताः सन्ति[3] ।

| | | | | |
|---|---|---|---|---|
| १३ | प्लुत३ | गु६ | लघु १३ / १९ | १९ |
| ०० | ० | ० | ०० | |
| | | | ४ | |
| प्लुत४ शिखा | | गुरु४ शिखा | लघु४ शिखा | |

1. H. & K. omit ३५६७० ।
2. H. & K. omit ६३८०२ । P. writes ६३ । ८०२ ।
3. P. writes for एवमेका०...सन्ति :—एवमन्येऽपि विज्ञेयाः । सङ्ख्याङ्का अग्रेतने द्रुते यथात्र विंशतिद्रुतान् । यावद्दर्शिताः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एवं शेषा अपि विलोक्याः[1] ।

अथ नष्टमानिनीषुराह ।[2]

वाञ्छितान् ( तांस्तु ) द्रुतान् न्यस्य सङ्ख्याङ्कान् विलिखेत् ततः[3] ।
रूपं यत् यतिथं नष्टं तत् पात्यं परमाङ्कतः[4] ॥ २७ ॥

[5]परमाङ्कादुद्धृतश्चाङ्को [6]लब्धाङ्केभ्यश्च पात्यते ।
रेखा देया तदङ्केषु [7]नष्टस्त्वित्थं प्रजायते ॥ २८ ॥

खमेकं ग्रसते शून्यं लघुः शून्यद्वयं तथा ।
गुरुर्बिन्दुचतुष्कं च शून्यषट्कं तथा प्लुतः ॥ २९ ॥

या रेखाग्रे ततः शून्यं ग्रसते स लघुः स्मृतः ।
तद्वत् पृष्ठस्थितं चैकं स गुरुस्तद्वा( च द्वौ ) प्लुतः ॥ ३० ॥[8]

अथोद्दिष्टं व्याचिख्यासुराह[9] ।

रूपं सङ्ख्या द्रुताधस्तात् तस्य रेखास्तु पूर्ववत् ।

---

1. P. does not give both the tables and omits एवं शेषा..... विलोक्याः । but reads instead इति सङ्ख्या । (after यावद्दर्शिताः). O. follows P.
2. P. reads—अथ नष्टं विभणिषुराह ।
3. P. reads—प्रस्तारान्नाश्यते रूपं सङ्ख्याङ्कान् विलिखेत् ततः ।
4. P.— रूपं च यतिथं नष्टं तत्पात्यं परमाङ्कतः ॥ २१ ॥
   H. & K.—रूपं च यत् प्रतिथं नष्टं तत्पात्यं परमाङ्कतः ॥ २७ ॥
5. P.—परमाङ्कादुद्भृत०
6. P.—लघ्वङ्केभ्यश्च.
7. P.—नष्टं स्त्वित्थं. O. adds after this verse—।२।३।६।१०।१९॥
8. P. omits but inserts—प्रथमं प्लुतरूपस्योत्पत्तिर्दर्श्यते । प्रथमद्रुतसम्बन्धी एकः परमाङ्केकोनविंशतिमध्यात् पात्यते । तस्यैकस्य पातनेऽष्टादश जातास्ते चैषु निवेश्यन्तेऽङ्कप्रमाणं यावत् प्लुतस्य शिखारूपा प्रथमद्वितीयसम्बन्धिनी सा प्लुतस्यैव भवति अग्रेतनाभ्यां द्वाभ्यां कलशाकाराभ्यां शिखाभ्यां गुरुरेवति( गुरुरेव भवति ) अग्रेतनया एकया शिखया लघुरेव तत्र स्थितयैव रेखया द्रुत एव स्यात् इति नष्टम् ।
9. P.—अथोद्दिष्टम्.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उद्दिष्टं तु रेखाङ्कानामैक्याद् गुर्वङ्कपातितात् ।। ३१ ।।[1]

उद्दिष्टे उद्दिष्टं दर्शितम् ।[2]

रूपं साङ्कसङ्ख्याद्द्रुतानामधः पूर्ववत् । नष्टानां तरू(द्रु)पस्य द्रुतलघुगुरुप्लुतप्रकाशरेखावद्रेखां प्रदाय तद्रेखोपरिस्थिताङ्कमीलनात् योऽङ्को भवति सोऽङ्कः सङ्ख्यासक्तपरमाङ्कमध्यात्पातिते यच्छेषं तत्सङ्ख्यं रूपमुद्दिष्टम् । रूपमादेश्यमिति । नष्टसदृक्षा[3] प्रक्रियोदिष्टस्येत्यर्थः ।[4]

अथ कलितं प्रकाश्यते ।[5]

[6]सङ्ख्याङ्कात् कलितेभ्यश्च वाञ्छितद्रुतपृष्ठगम् ।
द्रुतशीर्षस्थितस्याङ्कं गृहीत्वा तु ततः परम् ।। ३२ ।।

[7]निरन्तरावधस्थाङ्कौ तत्पार्श्वात्यौ च सान्तरौ ।
अङ्का ग्राह्या अमी पञ्च तदैक्यमग्रखे त्वधः ।। ३३ ।।

कलितेऽधःस्थिताश्चाङ्का[8] एको द्वौ पञ्च पङ्क्तयः ।
द्विपक्षा युगवेदाश्च ततः पञ्चाङ्कमेलनम्[9] ।। ३४ ।।

---

1. P. reads—उद्दिष्टे प्लुतादीनां रेखा देयाश्च पूर्ववत् ।
रेखोपरिस्थिताङ्कैकं पात्यं तत्परमाङ्कतः ।। १० ।।

This seems to have been taken from some other source as it is numbered as v. 10 in P. while the next verse is no. 32 in both P. and H.

2. P. omits.
3. P. omits रूपं साङ्कसङ्ख्या......नष्टसदृक्षा ।
4. P.—प्रक्रिया पूर्वमुद्दिष्टस्येत्यर्थः ।
O.—प्रतिक्रया पूर्वथदुद्दिष्टस्येत्यर्थः ।।
5. P. omits.
6. P.—सङ्ख्याङ्कान् कलितेभ्यस्यं. O.—०कलिते न्यस्य H. &. K. सङ्ख्याकात् कलिते.
7. P.—निरंवरावधः स्थाङ्कौ. O.—निरंतरावधिस्थाङ्को.
8. P.—०स्थिताश्च को.
9. O., H. & K.—पञ्चकमीलनम्.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]कलितेऽधः स्थिता अङ्का ये चत्वारोऽत्र कीर्तिताः ।
सा च सङ्ख्या प्लुतादीनां प्रस्तारे वाञ्छिते क्रमात् ॥ ३५ ॥

एकः प्लुतः पञ्च वक्रा ह्रस्वा द्वाविंशतिर्यथा[2] ।
द्रुताश्च युगवेदाश्च प्रस्तारे द्रुतषट्कजे[3] ॥ ३६ ॥

वाञ्छितद्रुतप्रस्तारे एवं सङ्ख्या प्लुतादिजा ।
सङ्ख्याङ्कः पञ्चमो यस्मात् सङ्ख्यावत् कलितो ह्यतः ॥ ३७ ॥

प्रस्तारमस्तके[4] नष्टोद्दिष्टपाणिर्मुदेऽस्तु सः ।
शुद्धतालः सुरसङ्ख्या[5]कलिताङ्घ्रिर्जने[6]ऽखिले ॥ ३८ ॥

( अथ तालाः )

प्रस्तारानुगतास्ताला असङ्ख्याः सम्भवन्ति हि ।
कियन्तस्ते च बध्यन्ते वातपुष्पसमा यतः[7] ॥ ३९ ॥

[8]नामग्राहं समादिष्टा ये तालाः पूर्वसूरिभिः ।
सनामलक्षणोच्चारात् वक्ष्ये तान् कियतोऽप्यतः ॥ ४० ॥

लक्षणेन च तेनैव तालाः स्युस्त्रिविधाः स्मृताः ।
द्रुतमध्यविलम्बानां मानानां भेदतः पुनः ॥ ४१ ॥

---

1. Before this verse, P. adds—उपरिस्थोऽङ्कः १९ अधस्थाश्चतुरोऽङ्का यथा ४४।२२। एतावधःस्थौ निरन्तरौ ग्राह्यौ तत्पार्श्वस्थौ ५।१ सान्तरौ ग्राह्यौ एवं पञ्चाङ्कमेलनेऽग्रतः ९१.

   Obviously this seems to be a marginal gloss later crept into the text tradition of P. It may be noted that here O. does not follow P.
2. O.—क्रमात् for यथा.
3. H. & K. द्रुतचट् च ये ।
4. O. & P.—०मस्तको
5. O. & P.—शुद्धतालसुरः सङ्ख्या    H.&K.—शुद्धतालः सुरसङ्ख्यां.
6. P.—कलितांह्रिजने०    H. & K.—कलितांह्रिजनो०
7. P.—वातपुष्पं संमा यतः
8. H. & K.—नामग्राहसमादिष्टा

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नामान्युदीर्य संक्षेपाल्लक्ष्मोपाश्रयसंयुतान् ।
क्रमवृद्धाँस्तथा तालानेकताल्यादिकान्ब्रुवे ॥ ४२ ॥

एकताल्यादितालानां चतुर्वारसुपाश्रयात् ।
कुर्मो मेलेति दौर्लक्ष्याच्छेषाँस्तन्मानसम्मितान् ॥ ४३ ॥

| | | | | | |
|---|---|---|---|---|---|
| १२३६ | १० | १९ | ३३६० | १०६ | १९१ |
| ०००० | ० | ० | ०० | ० | ० |
| १२५ | १० | २२४४ | ९११८० | ३४८ | ६९८ |
| प्लुत गुरु | लघु | द्रुत | एभिरेकैरियं निष्पन्न(न्ना) पञ्चभिः | | |

एकताली चादितालश्चण्डनिस्सारुकस्तथा[1] ।
क्रीडातालोऽन्तराक्रीडा तृतीयो लघुशेखरः ॥ ४४ ॥

एकताल्यां द्रुतस्त्वेको द्रुतमानेन सा भवेत् ।[2]
थुगु तकि धिगि ता ।
० ० ० ०

एकताली[3] ॥ १

आदिताले महाताले लघुश्चैकः प्रकीर्तितः ॥ ४५ ॥

---

1. O. omits the table preceding this verse.
H. & K.—०निःसारक०

2. O., H. & K.—सा च चेत् । P.—सा ववेत् । थुगु तकि धिकि त ० ० ० ०
O.—थु॥ गुतकि धिकित ० ० ० ०

3. cf.—द्रुतेन त्वेकतालिका । सङ्गीतरत्नाकर, ५.२९०.
This ताल is of ¼ मात्रा. Also cf. :—
एकेनैव द्रुतेन स्यात् एकताळीतिसंज्ञके ॥ ४७५ ॥
—भरतार्णव ( of नन्दिकेश्वर ), chp. 7, ताल no. 77

Bharatakoṣa ( ed. by Ramkrishṇa Kavi ), p. 92, quotes Jagannātha, who defines it in the same words, obviously borrowing from Nandikeśvara.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

त द्धि थउ द्रैं ।

। । । ।

इति आदितालः[1] ॥ २

द्रुतद्वन्द्वं विरामान्तं चण्डनिःसारुके भवेत् ।

तत्ताकि । तत्त । धिधिक्कि । धिद्धि ।

०ò ०ò ०ò ०ò

इति चण्डनिःसारुकः[2] ॥ ३

मध्यमानं विरामान्तं क्रीडाताले द्रुतद्वयम् ॥ ४६ ॥

---

Jagadekamalla (c. 1150 A.D.) defines it as—एकेनैव द्रुतेन स्यात् एकतालीति संज्ञया । —सङ्गीतचूडामणि, p. 16, ताल no. 71.

This एकताली is different from एकताल defined by Parameśvara, in his वीणालक्षण (G.O.S. vol. cxxxi, p. 12), as—चतुर्मात्रा लघुस्त्वेक (एक)तालस्य लक्षणम् ।

1. This is a tāla of 1 मात्रा. cf. also, त्वादिताले लघुः स्मृतः ।—भरतार्णव, chap. 7, ताल no. 6, p. 209. Accordiag to Śārṅgadeva, it is popularly known as रास, cf.—लघ्वादितालो लोकेऽसौ रासः । —सङ्गीतरत्नाकर, ५.२६१. Also see, सङ्गीतचूडामणि, pp. 10,47.

The आदिताल of वीणालक्षण is different, cf.—आदिताले चतुर्मात्रा लघुरेको द्रुतद्वयम् । —वीणालक्षण, ३.७., p. 12.

2. Bharatakośa, p. 196 calls it a देशीताल and says–अयं क्रीडाताल इति कैश्चिदुच्यते । The definition of क्रीडाताल, quoted by Bharatakośa, p. 156, from Vema, is—क्रीडाताले समाख्यातौ विरामान्तौ द्रुतावुभौ । But if according to the above definition, each द्रुत is to be विरामान्त, then it is different from our चण्डनिःसारुक, which has only the second द्रुत as विरामान्त, and which is, therefore, of 1¼ मात्राs. The क्रीडाताल of भरतार्णव, however, agrees with our चण्डनिःसारुक, cf.–द्रुतद्वन्द्वं विरामान्तं क्रीडाताले प्रकीर्तितम् । भरतार्णव, अ. ७, ४६४, p. 236. सङ्गीतचूडामणि, p. 14, no. 51, also calls it क्रीडाताल and gives the same definition. सङ्गीतरत्नाकर, ५.२८१, however says: क्रीडा द्रुतौ विरामान्तौ चण्डनिःसारुकश्च सः । which agrees with Vema.



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तत्त । धिद्धि । थउ थउ । धि द्रैं ।

oȯ oȯ oȯ oȯ

इति क्रीडाताल:[1] ॥ ४

समाख्यातान्तराक्रीडा विरामान्तैस्त्रिभिर्द्रुतैः ।

तक्डि तकि ता । धिकित धिकि । टै( धिकिटै । ) गणथउ । धिद्धि द्रैं ।[2]

ooȯ ooȯ ooȯ ooȯ

इति अन्तराक्रीडा ॥[3] ५

द्रुते द्रुते विरामःस्यात् तद्द्रुताभ्यां तृतीयकः ॥ ४७ ॥

---

1. P.—तत्त द्धिद्धि थउ थउ धिद्रैं oȯ oȯ oȯ oȯ H. adds on more o.
   This क्रीडाताल is slightly different from चण्डनिःस्सारुक. Obviously, Sudhākalaśa does not identify चण्डनिःस्सारुक with क्रीडाताल as is done by the author of Saṅgītaratnākara. The बोलs given for the two तालs, चण्डनिःस्सारुक and क्रीडा, are also different. This क्रीडाताल, of our text, is called मध्यमान्त and is not found in the different texts noted above.

2. P.—ताक्डि तकि ता धिकिडत किधि( धिकि ) टैगण थउ टैं
   O.—तक्डि तक्डि ताक्डि तक्डि थि ॥ टैं गण थउ द्वि द्वि द्रैं ।

3. This is a ताल of 1¼ मात्राs. cf. also—विधातव्यान्तरक्रीडा विरामान्तं द्रुतत्रयम् ooȯ.—सङ्गीतचूडामणि ( of Jagadekamalla ), p. 15, no.62 and p. 48, no. 14. Also, अन्तरक्रीडा तु कथ्यते । द्रुतत्रयं विरामान्तं...—सङ्गीतरत्नाकर, ५.३०१, Bharatakośa ( p. 18 ) calls it a देशीताल, and quotes from जगः—

   विधातव्यान्तरक्रीडा विरामान्तं द्रुतत्रयम् oo ȯ
   प प नी

   In the Adyar ed. of सङ्गीतरत्नाकर. vol. III. Adhyāyas, 5,6. ( Adyar, 1951 ) तृतीय ताल is defined as द्रुताद् द्रुतौ विरामान्तौ तृतीयः स्यात् ooȯ इति तृतीयः । —सङ्गीतरत्नाकर, ५,२६१, p. 139. According to this तृतीय, explained as oȯȯ, would be the same as our अन्तराक्रीडा, but the expression द्रुतौ विरामान्तौ, should, in our opinion, be taken to mean each of the last two द्रुतs as विरामान्त, thus it should be—o ȯ ȯ. This is also confirmed by सङ्गीतचूडामणि ( G.O S. no cxxviii ), p. 47, no. 4

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तादृं( । )तक्कधुगा( । ) धिक्कधु( । )धिद्धिथउ[1]

ὀὀ ὀὀ ὀὀ ὀὀ

इति तृतीयः ॥ ६

सविरामो लघुश्चैकस्ताले स्याल्लघुशेखरे ।

( झिंपिपु )झिंपुपु । डिंपुपु । डिंडिंडें ।

ो ो ो ो

इति लघुशेखरः[2] ॥ ७

[3]एकमात्राः साधिकाश्च प्रोक्ता अथ द्विमात्रिकाः ॥ ४८ ॥

---

which explains तृतीय as ० ὀ ὀ. The तृतीयताल भरतार्णव, ७. ४८४, ताल no. 93, p. 253 is however quite different. भरतार्णव does not give अन्तराक्रीडा or any ताल of similar to it.

1. O.—तादृं तक धुग धिक्कथउ धिद्धिथउ ὀ।ὀ।ὀ।ὀ। ὀ।ὀ।ὀ।ὀ।
P.—तादृं तक्कथउगा धिक्कथउ धिद्धिथ
ὀὀ ὀὀ ὀὀ ὀὀ तृतीयक ॥ ४७ ॥
This would be of $1\frac{1}{4}$ मात्राs.
Thus this तृतीयक is again different from the तृतीयक of सङ्गीतरत्नाकर noted above, as also of सङ्गीतचूडामणि, p. 47, no. 4, which is of 2 मात्राs—० ὀ ὀ.
The सङ्गीतरत्नाकर, ५-२८१, defines क्रीडाताल or चण्डनिःसारुक as—क्रीडा द्रुतौ विरामान्तौ चण्डनिःसारुकश्च सः ॥ २८१ ॥ ὀ ὀ इति क्रीडातालः चण्डनिःसारुकश्च । (Adyar ed., p. 148). This would be similar to the तृतीय of our text. The Bharatārṇava does not give any ताल of $1\frac{1}{2}$ मात्राs similar to our ताल.

2. This is a ताल of $1\frac{1}{8}$ मात्राs if विराम is to be regraded uniformly as of $\frac{1}{8}$ मात्रा. But if विराम is to be half of लघु here, according to another school of thought then it would be of $1\frac{1}{2}$ मात्राs. See, सङ्गीतशास्त्र, by K. Vasudeva Shastri, p. 209, note 1 and p. 219, ताल no. 86.
cf. विरामान्तलघुना लघुशेखरः ।—सङ्गीतरत्नाकर, ५. २९३.
एकेन सविरामेण लघुना लघुशेखरः । —सङ्गीतचूडामणि, p. 17, no. 77 and भरतार्णव, ७. ४८०, p. 250.

3. H.—एकमात्रः. P.—एकमात्रा साधिका स्युः.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

झम्पा तुरङ्गलीलश्च हंसलीलो द्वितीयकः ।
गारुगिः प्रतितालश्च ताला एते द्विमात्रिकाः ॥ ४९ ॥

झम्पाताले लघुस्त्वेकः सविरामं द्रुतद्वयम् ।

तकथु( ꜰ ) धिकथु । द्रें
ꝋ ꝋ (००।)

इति झम्पा[1] ॥ ८

तुरङ्गलीले ताले स्युर्लघुर्द्रुतलघू पुनः ॥ ५० ॥

ता( । ) धिक्( । ) कथउ
। ० ।

---

1. O.—त थु त्थ उ द्रें ꝋ ꝋ. P.—तकथु धिकथु द्रें ꝋ ꝋ. In H. we find । ꝋ । ꝋ । इति झम्पा. Obviously the scribe is confused and does not know whether the लघु sign is to precede the द्रुत signs or follow them. Our text would suggest that लघु should precede the two द्रुतs and only the last द्रुत should be विरामान्त.

The भरतार्णव, ७. ४८३, p. 252, gives—व्योमद्वयं विरामान्तं लश्च झम्पाभिधे भवेत् । which would be ० ꝋ । = a ताल of $2\frac{1}{2}$ मात्राs.

Also, cf: झम्पातालो विरामान्तं द्रुतद्वन्द्वं लघुस्तथा । सङ्गीतरत्नाकर, ५. २९४, which in the Adyar ed., p. 153, is given as—ꝋ ꝋ । This would be of $2\frac{1}{2}$ मात्राs. We however believe that the interpretation in the ed. of भरतार्णव is preferrable to the one in the Adyar ed. of सङ्गीतरत्नाकर and that only the last द्रुत is विरामान्त. cf. for example, झम्पा ( ताले ) दो द्रं लः ० ꝋ । in सङ्गीतचूडामणि, p. 49. and व्योमद्वयं विरामान्तं लश्च झम्पाभिधे भवेत् in सङ्गीतचूडा०, p. 17. In view of the unanimous tradition of भरतार्णव, सङ्गीतरत्ना० and सङ्गीतचूडा०, we should also take that लघु follows two द्रुतs and not precedes them as would have been normally suggested by our text ( P. H. & K. ). The other alternative is to say that the झम्पा of our text is different and is = । ० ꝋ. The पाठs given however do not support it.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति तुरङ्गलीलः[1] ॥ ९ ॥

हंसलीले भवेत्ताले लघुद्वन्द्वं तथैव च ।

करगड( । ) नरगडधि[2]

। ।

इति हंसलीलः[3] ॥ १०

बिन्दुयुग्मं विरामान्तं लघुश्चैको द्वितीयके ॥ ५१ ॥

तग्( । ) दिगडित( । )द्रैं[4]

० ०̇ ।

इति द्वितीयकः[5] ॥ ११

विरामान्तं द्रुतानां तु चतुष्कं गारुगौ स्मृतम् ।

तगधि । किथउ गा ।

० ० ० ०̇

---

1. cf: तुरङ्गलीले ताले स्याद् द्रुतद्वन्द्वं लघुस्ततः ॥ ९७ ॥ --सं० चूडा०, p. 13. and भरतार्णव, ७. ४५५, p. 227. This is different from our text. The तुरङ्गलील of सङ्गीतरत्ना० ५. २७४ is again different from both these. But our तुरङ्गलील corresponds with पणताल, of 2½ मात्राs, of भरतार्णव, ७. ४७८, p. 248 (लघ्वोर्मध्ये द्रुतं बद्ध्वा पणताल इति स्मृतः ).
2. O. & P.—करगड नरगड धि.
3. cf.—हंसलीले विरामान्तं लघुद्वयमुदाहृतम् । सं० रत्ना०, ५. २६७.
   सविरामं लघुद्वन्द्वं ताळे स्याद् हंसलीलके । भरतार्णव, ७. ४४६, p. 216, and सं० चूडा० p. 11, no. 20. हंसलील of our text, in both P. & H., is not called विरामान्त.
4. P.—तग्डि तँद्रैं. O.—तग्डि तँद्रैं.
5. This is a ताल of 2⅛ मात्राs. H.—तग्दि गडित द्रैं.
   cf.—द्रौ लो द्वितीयकः । सं० रत्ना०, ५.२६१, where no विराम is mentioned.
   द्रुतौ नश्च द्वितीयके । सं० चूडा०, p. 13, no. 41, this is a different tāla.
   The तुरङ्गलील of सं० चूडा०, p. 13, no. 36 also has two द्रुतs and one लघु but the द्रुतद्वयम् is not विरामान्तं.
   द्रुतौ लश्च द्वितीयके । भरतार्णव, ७. ४५८, p. 229. This agrees with द्वितीयक of सं० रत्ना० noted above.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति गारुगिः[1] ॥ १२

प्रतिताले द्रुतद्वन्द्वं लघुश्चैकः प्रकीर्तितः ॥ ५२ ॥

धि(।) किकि(।) थों

०० ।

( इति ) प्रतितालः[2] ॥ १३

अथ त्रिमात्रिकास्ताला रतितालो निसारुकः ।
दर्पणः सिंहलीलश्च षट्तालश्च कुडुक्ककः ॥ ५३ ॥

रतिताले लघुस्त्वेको गुरुश्चैकः प्रकीर्तितः ।

तकि लकि । धिकि तकि । थउ ।[3]

( । ऽ )

इति रतितालः ॥[4] १४

लघुत्रयं विरामान्तं ताले निःसारुके भवेत् ॥ ५४ ॥

द्रेंगण । धिगि(।) धित्त ।

( । । ।̆ )

---

1. This is a ताल of $2\frac{1}{8}$ मात्रा s. cf. :—शारा( गा )रुकिः कथ्यते प्राज्ञैर्विरामान्तश्चतुर्द्रुतम् । सं० चूडा०, p. 18, no. 94; and भरतार्णव, ७. ४८९, p. 258. Also, गारुगिस्तु चतुर्द्रुती ॥ विरामान्तं बुधैरुक्ता......। सं० रत्ना०, ५. २९७-९८.

2. This is a ताल of 2 मात्रा s. H. & K. omit the whole definition & बोल etc. of प्रतिताल and simply state प्रतितालस्त्यक्तः. But since it is listed in v. 49 above, it must have been described in the original text. Besides P. notes it as above. लौ द्रुतौ प्रतिताले स्यात् । भरतार्णव, ७. ४५८, p. 229, and सं० चूडा०, p. 13, no. 40; also, सं० रत्ना०, ५. २८३. This is different from our प्रतिताल. The प्रतिताल of our text agrees with द्वितीयक of सं० रत्ना० ५. २६१ ( cf. दौ लो द्वितीयकः ).

3. P.—तक्कि तकि धिक्कि तकि थउ. O.—तक्कि तकृ धिकृ तकि थउ.
H.—तकिलकिधि । कितकि । थउ.

4. This is a ताल of 3 मात्रा s. cf. :—रतिताळे लघुः कार्यो गुरुश्चैकः प्रकीर्तितः । भरतार्णव, ७.४८६, p. 255, and सं० चूडा०, p. 18, no. 86. रतितालो लघुर्गुरुः । सं० रत्ना० ५.२९६.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति निःसारुकः ॥[1] १५

द्रुतद्वन्द्वाद् गुरुश्चैकस्ताले स्याद्दर्पणाभिधे ।

धिद्धि । द्रैंगण(।) थउ ।

०   ०   ऽ

इति दर्पणः[2] ॥ १६

लघुर्बिन्दुत्रयं लश्च ताले स्यात् सिंहलीलके ॥ ५५ ॥

तात्तगथु । धगिधिद्धि ।

। ० ० ० ।

इति सिंहलीलः[3] ॥ १७

षट्तालसंज्ञके ताले भवन्ति व्यञ्जनानि षट् ।

धिधि गडि गडि गु । तकिरतत्त ।[4]

० ०   ० ०   ० ०

इति षट्तालः[5] ॥ १८

---

1. This would be a ताल of $3\frac{1}{2}$ मात्राs.
   cf.:—लघुद्वन्द्वं विरामान्तं ताळे निःसारुकाभिधे ॥ भरतार्णव, ७.४६३, p. 235 and सं० चूडा०, p. 14, no. 50. विरामान्तौ लघू निःसारुको मतः । सं० रत्ना०, ५.२७९. Thus the निःसारुक of our text is different and has no parallel in all the three texts noted here.
2. A ताल of 3 मात्राs.
   cf.—दर्पणे स्याद् द्रुतद्वन्द्वं गुरुश्चैकः प्रकीर्तितः । भरतार्णव, ७.४३९, and सं० चूडा०, p. 10, no. 7. दर्पणे दद्वयं गश्च । सं० रत्ना०, ५.२७३.
3. P.—तात्तगथुगिधिद्धि. O.—तुग थुगि थिद्धि.
   This is a ताल of $3\frac{1}{2}$ मात्राs. यति is shown acc. to H.
   cf.:—सिह्म( सिंह )लीले विधातव्यं लघ्वाद्यन्तं द्रुतत्रयम् । भरतार्णव, ७.४४० and सं० चूडा०, p. 10, no. 9. But लघ्वन्ते द्त्रयं सिंहलीलो । of सं० रत्ना०, ५.२६४ is different. There is no ताल in सं० रत्ना० which is similar to this ताल.
4. P.—धिक्डि तकि धिक्डि तकि तत्त. O.—धिग्ड तकि २ तत्त.
5. This is a ताल of 3 मात्राs.
   cf.—द्रुतैष्षड्भिस्तु षट्ताले । भरतार्णव, ७.४८७ and सं० रत्ना० ५.३०१. Also, षट्तालसंज्ञके ताले बिन्दुषट्कं निरूप्यते ॥ सं० चूडा०, p. 18, no. 88.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

द्रुतद्वन्द्वं लघुद्वन्द्वं स्मृतं ताले कुडुक्कके ॥ ५६ ॥

थुंदिगण(।) तकि धिकि

० ० । ।

इति कुडुक्ककः[1] ॥ १९

चतुर्मात्रिकाः स्युस्ताला वर्धापन उदीक्षणः ।
मल्लतालो वर्णभिन्नो ललितो मण्ठका अपि ॥ ५७ ॥

विषमो रङ्गतालश्च मल्लिकामोदसंज्ञकः ।
प्रतापवर्धनो लीलातालस्तु रागवर्धनः ॥ ५८ ॥

ताले वर्धापने ज्ञेयं लघूनां तु[2] चतुष्टयम् ।

द्रैं । टिगधिक् । कथउ । टें[3]

। । । ।

इति वर्धापनः[4] ॥ २०

उदीक्षणे लघुद्वन्द्वं गुरुश्चैकस्तथा मतः ॥ ५९ ॥

---

1. This is a ताल of 3 मात्राs.
cf.—द्रुतद्वन्द्वं लघुद्वन्द्वं भवेत्ताळे कुडुक्कके । भरतार्णव, ७.४६३, and सं० चूडा० p. 14. no. 49. कुडुक्को द्वौ द्रुतौ लौं द्वौ । सं० रत्ना० ५.२७४.
O. reads पाटs as—थुण्णि दि गण तकि धकि.
O. calls this ताल as कुडक्ककः ।
2. H. & K.—च. भरतकोश, p. 588 also reads च.
3. H. & K.—द्रैं । टिगधि । कथउ । टें. O.—द्रैं टिगधिः कत्थउ द्रौं.
P.—द्रौं टिगधिक् कत्थउ टैं.
4. This is a ताल of 4 मात्राs.
There is no वर्धापनताल in भरतार्णव or सं० रत्ना०. But the गजताल of सं० रत्ना० (गजश्चतुर्लो धारासौ), ५.३०२, corresponds to this ताल. The वर्धनताल of सं० चूडा०, p. 18, no. no. 89 has two द्रुतs, one लघु and one प्लुत, while the गजलील of both भरतार्णव and सं० रत्ना० has four लघुs but विरामान्त and hence is different. And the वर्द्धन of भरतार्णव has 2 द्रुतs, 1 लघु and 1 प्लुत but विरामान्त.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

झ( झिं )थुथु[1] । नगझिगि । द्रुगडिगि डैं

।।। ऽ[2]

इति उदीक्षणः[3] ॥ २१

लघुत्रयान्मल्लताले विरामान्तं द्रुतद्वयम् ।[4]

कटथु । रुगुवटैं । धिद्धि ।

। । । ० ० ̇

इति मल्लतालः[5] ॥ २२

वर्णभिन्नाभिधे ताले बिन्दुयुग्माल्लघुर्गुरुः ॥ ६० ॥

गिणि गिणि । तक्कि धिक्कि थउ

० ० । ऽ

इति वर्णभिन्नः[6] ॥ २३

---

1. P.—झिंथुथु नगाझिगि द्रुगझिगि झैं.
2. The sign for गुरु, in H. & K., is generaly ६ but I have adopted the usual sign ऽ to avoid confusion.
3. This is a ताल of 4 मात्राs. यतिs in पाटs everywhere above are acc. to H.

   cf.:—उद्वीक्षणे लघुद्वन्द्वं गुरुरेकस्ततः परम् । भरतार्णव, ७.४६८; and दक्षिणे स्याल्लघुद्वन्द्वं गुरुरेकस्ततः परम् । सं० चूडा०, p. 15, no. 58. Possibly the reading should be उदीक्षणे लघुद्वन्द्वं Also cf.: लौ द्वौ गुरुरुदीक्षणः । सं० रत्ना०, ५.२८५.
4. P.—लघुत्रयाद्विरामान्तं मल्लताले द्रुतद्वयम् ।

   कट्टथुरुगुतटैं धिद्धि

   O.—कट्टथु डगुतटैं द्धिद्धि.
5. This ताल is of $4\frac{1}{2}$ मात्राs.

   The मल्लताल of भरतार्णव is different as it has 4 लघुs instead of 3; cf.: मल्लताले विधिलघुर्विरामान्तद्रुतद्वयम् । भरतार्णव, ७.८७१, also cf. सं० चूडा०, p. 15, no. 64, and सं० रत्ना० ५.२८८. The reading द्रुतत्रयम् of सं० चूडा० seems to be wrong.
6. cf.—वर्णभिन्नाभिधे ताले द्रुतद्वन्द्वं लघुर्गुरुः । भरतार्णव, ७. ४४६, and सं० चूडा०, p. 11, no. 21. This is a ताल of 4 मात्राs.

   Also cf.—वर्णभिन्नो द्रुतौ लो गः । सं० रत्ना०, ५. २६८.



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ललिते [1]लद्रुतद्वन्द्वं विरामान्तं गुरुस्ततः ।

[2]ता धिक् किति किति किधिक्कि द्रैं

। ०० ̇ ऽ

इति ललितः[3] ॥ २४

मण्ठाश्च प्रतिमण्ठाश्च [4]तगणात् सगणेन वा ॥ ६१ ॥

[5]तक्किड । धिक्डित । किटथउ । द्रैं

इति मण्ठकप्रतिमंण्ठाः[6] ॥ २५

खचतुष्कं विरामान्तं [7]द्विवारं विषमे भवेत् ॥ ६२ ॥

[8]तकिक्कि तगित्थउ । तकित्थउ । गुधिटैं

---

1. P.—ताद्रुतद्वन्द्वं ( तद्रुतद्वन्द्वं ? ) O.—॰लात्॰
2. O. & P.—ताधिकिक्कि तकि धिकि द्रैं.
3. This is a ताल of 4½ मात्राs.
   cf.—ताले ललितसंज्ञे स्याद् द्रुतद्वन्द्वं लघुर्गुरुः । भरता॰, ७. ४८५ and सं॰ चूडा॰, p. 17, no. 85. ललिते द्वौ द्रुतौ लो गः । सं॰ रत्ना॰, ५. २९७. The ललित of सं॰ रत्ना॰ is thus identical with वर्णभिन्न of the same text but different from ललित of our text.
4. P.—जगणात्.
5. P.—तक्डित धिक्डित क्रत्थउ धैं.
   O.—नक्डित धिक्डि कत्तुउ धैं । ऽ । अथवा । । ऽ.

   The text generally suggests that मण्ठs and प्रतिमण्ठाs have or begin with तगण ( जगण according P. ) or सगण, i.e., two गुरुs & one लघु or two लघुs & one गुरु. The text is a bit ambiguous. There are several varieties of मण्ठs & प्रतिमण्ठs as is evident from भरतार्णव, सं॰ चूडा॰ and सं॰ रत्ना॰. The symbols of लघु, गुरु etc. are therefore not given in the text edited above, but in H. they are । ऽऽ अथवा । । ऽ.
6. cf.: सकारं मंठताले स्यात् तदग्रे लचतुष्टयम् । तकारतो गुरुद्वन्द्वं नशब्दमन्यमंठके ॥ ४६१ ॥ नगणो जगणो लश्च प्रतिमंठे नियोजितः ॥—भरतार्णव, ७. ४६१-६२, also see, ibid., ७. ४६८-४६९.
7. P.—द्विर्वारं.
8. O.—तक्किक्कि तकि थउ तकि धुगु धिद्रैं ० ० ० ̇ ० ̇ ० ० ० ० ̇.
   P.—ताकिक्कि तगिथउ तक्रिधु गुधिद्रैं ० ० ० ̇ ० ० ० ० ̇.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

० ० ० ०̇ ० ० ० ०̇

इति विषमतालः[1] ॥ २६

रङ्गतालाभिधे ताले खचतुष्कं गुरुस्तथा ।

धिक्कड । दरगड धिक् कित्थउ धिक् किथुगा[2]

० ० ० ० ऽ

इति रङ्गतालः[3] ॥ २७

जायते मल्लिकामोदे लद्वयं खचतुष्टयम् ॥ ६३ ॥

धिक् किड तक्कथउ[4]

। । ० ० ० ०[5]

इति मल्लिकामोदः[6] ॥ २८

प्रतापवर्धमाने गा विरामान्तं द्रुतद्वयम् ।[7]

---

1. This is a ताल of $4\frac{1}{4}$ मात्रास.
   cf.—वेदद्रुता विरामान्ता पुनस्ते विषमे मताः ॥ भरतार्णव, ७.४७३. वेदद्रुता विरामान्ता द्विवारं विषमे मताः ।—सं० चूडा०, p. 15, no. 67. द्विश्चत्वारो विरामान्ता द्रुतास्तु विषमे मताः ॥ सं० रत्ना०, ५.२८६.
2. P.—धिक्कड दरगड धिद्धिक्कत्थउ धिक्किथुगा. O follows but reads थुगण for थुगा at the end.
3. cf.:—चत्वारो रङ्गताळे स्यात् गुर्वन्तदचतुष्टयम् । भरतार्णव, ७. ४४३.
   चत्वारो रङ्गताले स्युर्द्रुता गुरुस्ततः परम् । सं० चूडा०, p. 11, no. 14.
   Also see, सं० रत्ना० ५. २६५.
   This is a ताल of 4 मात्रास.
4. P.—धिक्किड तक्किड त । धिक्किडथउ द्धि ऽ० ०ऽ इति प्रतापवर्द्धनः ।
   Obviously the पाटs. etc. of मल्लिकामोद are left out through scribal oversight. O. reads—झेंथ धिक्कि तक्कत्थउ. । । ० ० ० ० इति मल्लिकामोदः ॥
5. H.—। ० ० ० ० ।.
6. cf.—ताळे तु मल्लिकामोदे लद्वयं खचतुष्टयम् । भरतार्णव, ७. ४५४.
   ताले स्यान्मल्लिकामोदे लद्वयं खचतुष्टयम् । सं० चूडा० p. 12, no. 33. also see, सं० रत्ना०, ५. २८०.
   This is a ताल of 4 मात्रास.
7. P.—omits. O.—प्रतापवर्द्धने त्र्यंगाद्विरामान्तं द्रुतद्वयम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

धिक्किडि तिग्डित । धिग्डिथउ धिद्धि[1]

ऽ ० ० ऻ

इति प्रतापवर्धनः[2] ॥ २९

द्रुतो लघुः प्लुतश्चैव लीलाताले क्रमान्मताः ॥ ६४ ॥

[3]धिटैं धिटैं थउ । धिद्धिट्टैं

० । ऽ̇

इति लीलातालः[4] ॥ ३०

बिन्दुयुग्माद्विरामान्तात् खप्लुतौ रागवर्धने ॥

तत्तत्त । ग थुगिता । धिद्धिता द्रैं

० ० ० ऽ̇

इति रागवर्धनः[6] ॥ ३१

---

1. P.—धिक्डि तक्डि त धिक्डिथउ द्धि ऽ̇ ० ०.
O.—धिक्डि तक्डित धिक्डि द्धि द्धि द्रैं ॥ ० ० इति प्रतापवर्द्धनः ॥

2. This is a ताल of 3½ मात्राs.
There is no ताल of this name in भरता०, and सं० चूडा०. But जगझम्पा of both these texts agrees with our ताल. cf.—जगझम्पे गुरुस्त्वेको विरामान्तं द्रुतद्वयम् । भरतार्णव, ७. ४८१. जगझम्पे गुरुश्चेको विरामान्तद्रुतद्वयम् ; सं० चूडा०, p. 17, no. 79.

3. H.—धिटे धिट्टी थउ । धिद्धि ट्टैं. O.—धि । द्रि धिट्टैं थउ धैं धिट्टैं. P.—धिट्टैं धिट्टैं थउ धिद्धि ट्टैं.

4. cf.—लीलाताळे खलौ पश्च । भरतार्णव, ७. ४९१.
बिन्दुर्लघुः प्लुतश्चैव लीलाताले प्रकीर्तितः । सं० चूडा० p. 19, no. 97, लीला दलौ पः । सं० रत्ना०, ५. २९७.
This is a ताल of 4½ मात्राs.

5. P.—तत्त थगथुगि धिद्धि द्रैं. O.—तत्तत्त थुगि धिद्धि द्रैं. ० ० ० ऻ.
H. & K.—तत्तत । गथुगिता । धिद्धिता द्रैं.

6. This is a ताल of 4⅝ मात्राs.
There is no ताल of this name or type in भरता०, सं० चूडा, or सं० रत्ना०

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथ पञ्चमात्रिकाः[1] ।

अभङ्गो रायवङ्कोलस्त्र्यश्रवर्णोऽभिनन्दनः[2] ।
राजविद्याधरः खण्डकङ्कालो वर्धनोत्सवौ ॥ ६५ ॥

अभङ्गताले विज्ञेयं लघुद्वन्द्वं प्लुतस्ततः ।

[3]द्रहत्थुगि । कट्टयि ग्रि( गि )णगिण धें

। । ꞩ

इति अभङ्गः[4] ॥ ३३ ॥

जायन्ते रायवङ्कोले लघुद्वन्द्वं गुरुर्द्रुतौ ॥ ६६ ॥

[5]यर्हि थर्हि गिगणगण नरगण । धिद्धि

। । ऽ ० ०

इति रायवङ्कोलः[6] ॥ ३४ ॥

[7]लघुर्द्रुतो लघू वक्रस्त्र्यश्रवर्णो यथाक्रमम् ।

[8]थगु । तकि । क्रिथुगु । तकि । धिकथुग धि

। ० । । ऽ

1. P.—अपचमात्रिकाः । H. & K.—अथ पंचमातृकाः

2. P.—०स्त्र्यसवर्णो०

3. P.—द्रहथुंगि कट्टगिण गिण थ्रें. O.—इह थुंगि कट्ट ग्रिणि गिणि द्रें.

4. This is a ताल of 5 मात्राs. cf.—अभङ्गताळे कर्तव्यं लघोरग्रे त्रिमात्रकम् । भरता०, ७. ४७९. अभङ्गताळे कर्तव्यं लघण्डेत्रे (?) त्रिमात्रिकम् । सं० चूडा० p. 16, no. 75. If लघोरग्रे is correct then it would be a ताल of 4 मात्राs, different from our tāla. The सं० रत्ना०, ५. २९२ also says—अभङ्गो लप्लुतौ.

5. P.—थर्हि थर्हि गिगणगण नरगण धिद्धि. O.—घर्हि घर्हि गिगणगण नरगण धि द्रें.

6. cf.:—रगणो बिन्दुयुग्मश्च रायरङ्गाळ (रायवङ्काळ) इष्यते । भरता० ७. ४७९, ज( र )गणाद् बिन्दुयुग्मेण राजवंता( वङ्का )ल इष्यते । सं० चूडा० p. 17, no. 76. Our ताल is of 5 मात्राs whereas the रायवङ्काल of the above two texts is of 6 मात्राs.

7. H.—लघुद्रुतौ० But H. gives । ० । । ऽ.

8. P.—थुगुतकि क्रिथुगु तकि धिकथुगुधि. O.—reads थुगु धि for थुग धि.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति त्र्यश्रवर्णः[1] ॥ ३५

लघुद्वन्द्वं द्रुतद्वन्द्वं गुरुश्चैकोऽभिनन्दने ॥ ६७ ॥

[2]थुंदिगण । थुंदिगण । तत्तधिक् कथउ द्रें

। । ० ० ऽ .

इति अभिनन्दनः[3] ॥ ३६

राजविद्याधरे ताले लघुयुग्माद्गुरुर्द्रुतौ[4] ।

तकितकि धिक्कित । कथउ । द्रैं धिधि[5]

। । ऽ ० ०

इति राजविद्याधरः[6] ॥ ३७

ज्ञातव्यं खण्डकङ्काले द्रुतद्वन्द्वं गुरुद्वयम् ॥ ६८ ॥

[7]तद्धि । कत्थउत(ता) । गिथउ द्रैं

० ० ऽ ऽ

इति खण्डकङ्कालः[8] ॥ ३८

---

1. cf. लघुद्रुतौ लघू गश्च त्र्यश्रवर्णे प्रकीर्तिताः भरता० ७. ४५० and सं० चूडा०, p. 12, no. 28. Also see सं० रत्ना० ५. २७० which gives yet another tāla under this name. Our त्र्यश्रवर्ण is of 5½ मात्राs.
2. P.—थुंदिगणतत्तधिकत्थउद्रें O reads धिक्कितकत्थउ द्रें for धिकत्थउ द्रें in P.
3. cf.:—लद्वयं दद्वयं चैव गुरुश्चैवाभिनन्दने । भरता०, ७. ४७०. Also see सं० चूडा० p. 15, no. 62. सं० रत्ना० ५. २८७.
   This ताल is of 5 मात्राs.
4. P.—॰गुरुद्रुतौ.
5. P.—तकि तकि धिक्कितकत्थउ द्रैं धिद्धि O follows P but reads नकि for तकि.
6. This is a ताल of 5 मात्राs. The राजविद्याधर of भरतार्णव is of 4 मात्राs, cf.—लघुर्वक्रो द्रुतौ ताळे राजविद्याधराभिधे ॥ भरता० ७. ४६०. cf. सं० चूडा०, p. 14, no. 46. Also, सं० रत्ना०, ५. २७९.
7. P.—तद्धिक् कत्थउता गिथउ धें O follows P but reads किथउ for गिथउ.
8. cf.—द्रुतद्वन्द्वं गुरू खण्डे । भरता० ७. ४७७, and सं० चूडा०, p.20, v. 137. Also see सं० रत्ना०, ५. २८९.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भवन्ति वर्धने ताले द्रुतौ लश्च प्लुतस्तथा ।

[1]कटधि । त्थद्रि( र्हि ?) गिकटकट धिक्कडें .

० ० । ऽ

इति वर्धनः[2] ।। ३९

उत्सवाख्ये पुनस्ताले लघुयुग्मात्परः प्लुतः ।। ६९ ।।

[3]धिंगित । धिद्रैं थुगुथुगु धिद्रैं थउटौं

। । ऽ

इति उत्सवः[4] ।। ४०

षाण्मात्रिकाश्चाचपुटत्रिभिन्नाख्यपरिक्रमाः ।
उद्धटो वनमाली च कन्दर्पः कोकिलाप्रियः ।। ७० ।।

मकरन्दो मुकुन्दश्च बिन्दुमाली च कन्दुकः ।
श्रीकीर्तिः स( श )रभलीलोऽथैषां लक्षणमुच्यते ।। ७१ ।।

गुरुश्च [5]लद्वयं वक्रस्ताले चाचपुटाभिधे ।

[6]टिकधिक्कथुगा । क्क( क )थुगतिक्कथउ धितक्कथुगा

ऽ । । ऽ

इति चाचपुटः[7] ।। ४१

---

This is a ताल of 5 मात्राs.

1. P.—कंट्टत्थर्हि गिकटकट धिक्क टें O follows P but reads गिकिट गिकिट for गिकट.
2. This is a ताल of 5 मात्राs, also described in भरता० ७. ४८७ and सं० चूडा०, p. 18, no. 89. Also, सं० रत्ना०, ५. ३००.
3. P.—धिगिता धिद्रैं थुगुथुगु धिद्रैं थउटें.
   O.—धिगित द्विद्रैं थुगुलुगु धिद्रैं थउटें.
4. This is a ताल of 5 मात्राs. There is no such ताल in भरता० or सं० चूडा०. The उत्सव of सं० रत्ना० ५.३०२ ( लघुप्लुतावुत्सवः स्यात् ) is different.
5. H. & K.—सरलो.
6. P. and O.—टिगधिक्कत्थउगा । कथुगत कत्थउ धितकथुगा.
7. This is a ताल of 6 मात्राs. cf.: गुर्वोर्मध्ये चाचपुटे लघुद्वन्द्वं प्रकीर्तितम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]त्रिभिन्नाभिधताले तु सरलश्च गुरुः प्लुतः ॥ ७२ ॥

[2]थों । थरकट्टत्थर्हि । गित्थद्रिगिथों

। ऽ ऽ̇

इति त्रिभिन्नः[3] ॥ ४२

ताले परिक्रमे ज्ञेयं द्रुतौ लश्च गुरुद्वयम् ।

[4]तत्त । तागि धागि तथउता तद्रें

० ० । ऽ ऽ

इति परिक्रमः[5] ॥ ४३

[6]विज्ञेय उद्घटस्तालो गुरूणां त्रितयेन च ॥ ७३ ॥

करगड । नरगड । तद्धि धिक्कड द्रगड धिद्धि कत्थउ । धिक्कत्थउ द्रें

ऽ ऽ ऽ

---

भरता० ७.४३७. गुरुर्लघू गुरुश्चैव भवेच्चाचपुटाभिधे । सं० चूडा०, p. 10, no. 2. There is no चाचपुट in सं० रत्नाकर.

1. P.—त्रिभिन्नाभिताले.
2. P.—थों थरकट्टत्थर्हिगि थर्हिगि थों. O. reads थौं for थों in P.
3. cf. :—सं० चूडा०, p. 11, no. 18; भरता० ७.४४५, and सं० रत्ना० ५.२६८. This is a ताल of 6 मात्राs.
4. P.—तत्तत्तगिथिकिथउकत्थउतद्रें o o s s. O reads थिगि for थिकि of P.
5. This is a ताल of 6 मात्राs. But the परिक्रम of भरतार्णव is of 5 मात्राs. cf.—परिक्रमे द्रुतद्वन्द्वं सगणस्तदनन्तरम् । भरता० ७.४४३, but सं० चूडा० agrees with our text, cf.—परिक्रमे द्रुतद्वन्द्वं यगणस्तदनन्तरम् ॥ सं० चूडा० p. 11, no. 15. Possibly, the भरतार्णव reading needs emendation. The सं० रत्ना० calls it कन्दर्प and परिक्रम, cf.—दौ यगणस्तथा । कन्दर्पतालस्तस्यैव पर्यायः स्यात्परिक्रमः ॥ सं० रत्ना० ५.२६४. The कन्दर्प of सं० चूडा० is identical with its परिक्रम. Same is the case with भरता० ७.४४९.
6. P. omits the definition etc., and simply reads—ऽ ऽ ऽ उद्घटः. O. reads the text, but the पाटs are different. The पाटs acc. to O. are:—करगड नरगड तद्धि कत्थउ धिक्कड द्रगड धिधिक्क थउधिक्क थुद्रें.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति उद्घटतालः[1] ॥ ४४

खचतुष्कं लघुश्चैव द्रुतौ गो वनमालिनि ।

तक थुगु धिद्धि कथुगतत्ता कथुगत्ता नग झिगि झं[2]

० ० ० ० | ० ० ऽ

इति वनमाली[3] ॥ ४५

कन्दर्पाभिधताले तु [4]खत्रयं सरलो गुरू ॥ ७४ ॥

[5]तत्तत्त । तद्रें खह्रि खह्रि कट्ट खग्दित्थों

० ० ० | ऽ ऽ

इति कन्दर्पः[6] ॥ ४६

[7]वक्रयुग्मं लघुद्वन्द्वं ताले स्यात्कोकिलप्रिये ।

[8]डिंखखु डें डिंखखु डें गणगता द्रुगझिगि

---

1. This is a ताल of 6 मात्रास, also in भरतार्णव, ७.४३९. The सं० चूडा०, often gives almost identical definitions of तालs following भरतार्णव. Thus it reads उद्घटे मगणस्त्वेकः । सं० चूडा० p. 10, no. 5, the text being the same in भरता०. There is no tāla of this name in सं० रत्ना०.

2. P.—तक थुगु थिक थुगुता धिद्धि तग गिं गिं गं. O reads—तक्क थुगु धिधिन्नग झिझि झं.

3. This is a ताल of 6 मात्रास. The वनमाली of भरता० is of 7 मात्रास. cf:—वेदद्रुतालौ द्युगं गुरुः प्रान्ते निवेशितः । वगमाली भवेत्तालो गदितः शास्त्रवेदिभिः ॥ ॥ ४४९ ॥ Same in सं० चूडा०, p. 12, no. 26.

4. P.—खद्वयं. This reading would make कन्दर्प & परिक्रम identical in our text; see also notes on परिक्रम above.

5. P.—तत्त द्रैं षहिं षहि कंद खखिदत्थों ० ० । ऽ ऽ. O reads तत्तत्त०

6. कन्दर्प of भरता० ७.४४१ and सं० चूडा० p 10, no. 10 is like परिक्रम of our text.

7. P.—गुरुद्वन्द्वं लद्वन्द्वं.

8. P.—गणगण दुग झिगि डिंघुघु झें झिंघुघु झें. O.—गणगण डुग डिगि डिखुखुझें.



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गणगुण द्गुगडिगि डिंगुपु । झं झिंपुपु झें

ऽ ऽ । ।

इति कोकिलाप्रियः[1] ॥ ४७

[2]खद्वयं लत्रयं गश्च मकरन्दे प्रकीर्तिताः ॥ ७५ ॥

[3]थुरिगण तत्त तद्गथु । तद्गथु तद्रें

० ० । । । ऽ

इति मकरन्दः[4] ॥ ४८

मुकुन्दताले सरलौ खचतुष्कं गुरुस्तथा ।

[5]तथो । तथो । तकिकिथों थुउ तकिकितद्धि । द्धिद्धि टिगुटें

। । ० ० ० ० ऽ

इति मुकुन्दः[6] ॥ ४९

गुरुबिन्दुचतुष्कं च गुरुः स्युर्बिन्दुमालिनि ॥ ७६

[7]टकुट्टि तत्त धिद्धि द्धिटकुट्टि धैं

ऽ ० ० ० ० ऽ

---

1. The ताल is of 6 मात्राs. The कोकिलप्रिय of भरता०, though of 6 मात्राs, is different, cf.—कोकिलप्रियताले स्यात्कमाद्गुरुलघुप्लुताः ॥ भरता० ७.४६५ and सं० चूडा०, p. 14, no. 53. But the कीर्तिताल of भरता० agrees—cf. श्रीकीर्तिसंज्ञके ताळे गुरुद्वन्द्वं लघुद्वयम् । भरता० ७.४६६ and सं० चूडा०, p. 14, no. 54.
2. H. & K.—खद्वयं त्रयं गश्च. O.—खद्वयं लद्वयं गश्च.
3. P.—थुट्टिगण तत्त द्रें ता द्रें. O.—थुंद्दिगण तत्तत्त ध्रे तद्रें.
4. A ताल of 6 मात्राs. cf.—मकरन्दे द्रुतद्वन्द्वं लत्रयश्च गुरुस्ततः । भरता० ७.४५८. सं० चूडा०, p. 13, no. 42. The मकरन्दक of सं० रत्ना० ५.२८२ omits the last *guru* and is thus a tāla of 4 मात्राs only.
5. P.—थों थउ तकिकि तद्धे द्धिट्टिगु टें. O.—थों थउ तकिकि तद्धि धिगु टें.
6. A tāla of 6 मात्राs, different from मुकन्द of भरतार्णव, cf.—मुकुन्द-संज्ञकेताळे लघुबिन्दू लघुर्गुरुः । अन्यो लघ्वादि गुर्वन्तं भवेद्बिन्दुचतुष्टयम् ॥ भरता० ७.४७४, सं० रत्ना०, ५.३०७.
7. P.—तत्तत्त तकुट्टि तत्त धिद्धिद्धिटकुटि धिद्धि. O.—तत्तत्त टकुटि तत्त धिद्धिद्धि ढकुटि धें.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति बिन्दुमाली[1] ॥ ५०

लचतुष्कं गुरुश्चैकस्ताले कन्दुकनामनि।

[2]धिट्टिगि कथुत्ता धिट्टिगि टें थउ। धिद्धि टें

| | | | ऽ

इति कन्दुकः[3] ॥ ५१

[4]लघुर्गुरू लघुश्चैव ताले श्रीकीर्तिसंज्ञके ॥ ७७ ॥

[5]तक्किधिक्कित्थें थउ। धिट्टिगि थउत टें

| ऽ ऽ |

इति श्रीकीर्तिः[6] ॥ ५२

लौ च द्रुतचतुष्कं लौ ताले[7] स(श)रभलीलके।

[8]तझें तझें। थर्हिगि थर्हिगि थउ। झेंथुझें

| | ० ० ० ० | |

इति स(श)रभलीलः[9] ॥ ५३

---

1. A ताल of 6 मात्राs, also in भरता०, ७.४६६, सं० चूडा० p. 14, no. 55, and सं० रत्ना० ५.२८३.
2. P. and O.—धिट्टिगि धिट्टिगि टें थउ धिद्धि टें.
3. A tāla of 6 मात्राs. It is called कर्तुक in भरता० ७.४७५, and कन्दुक in सं० चूडा० p. 16, no. 70, and सं० रत्ना०, ५.२९०.
4. १ P.—लोकद्वयं लघुश्चैकस्ताले० The symbols given are ऽ ऽ |.
H.—लघुर्गुरुर्लघु०. But since the symbols given are | ऽ ऽ |, I have emended the reading above. The P. reading is rejected. This is a ताल of 6 मात्राs.
5. P.— ता धिक्कित्थों थउ धिट्टिक्कत्थउ. O reads धिट्टिगिथउ for धिट्टिक्कत्थउ.
6. A tāla of 6 मात्राs. In भरतार्णव, ७.४६६, and सं० चूडा० p. 14, no. 54, it is ऽ ऽ | | instead of | ऽ ऽ | of our text. सं० रत्ना० ५.२८२ also shows ऽ ऽ | |.
7. P.—०द्रुतचतुष्कं च लघू. H.—लौ द्रुतचतुष्कं लौ ताले०
8. P.— ता द्रें धिक्कत्थ गाधि द्रें. O.—झं झें थर्हिगि थर्हिगि थउ झें.
9. A tāla of 6 मात्राs. The भरता० ७.४५४ reads—लघुद्रुतचतुष्कं लौ स्यातां शरभलीलके। = | ० | ० | ० | ० | | (8 मात्राs), whereas the editor

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सप्तमात्रिकतालानामथ वक्ष्ये समुच्चयम् ॥ ७८ ॥

राजचूडामणिर्नान्दी श्रीनन्दनचतुर्मुखौ ।
नारायणो दीपकश्चामीषां लक्षणमुच्यते ॥ ७९ ॥

राजचूडामणौ लानां त्रयं खद्वितयं लगौ ।

[1]थों । ता । तकिथउ । धिटें । थर्हि तकट्टद्धिथर्ही

। । । ० ० । ऽ

इति राजचूडामणिः[2] ॥ ५४

नान्दीताले च विज्ञेयं लो द्रुतौ लो गुरुद्वयम् ।

[3]रत्थुंगणि । थुरुगु । तद्धीं तद्धीं । तगि धगि थुग ता

। ० ० । ऽ ऽ

इति नान्दीतालः[4] ॥ ५५

[5]गुरुर्लघू प्लुतश्चैव ताले श्रीनन्दनाभिधे ।

[6]थुंदिगणवदो । झंझिगिदों । तद्धिकिथउ टें

ऽ । । ऽ̀

---

of सं० चूडा०, p. 13, no. 34 suggests लघुर्द्रुत for लघुद्रुत & takes it = । ० ० ० ० । । ( 5 मात्राs ). The आदिभरत quoted in ft. note in the edition of भरतार्णव, p. 226 shows—लघुद्रुतचतुष्कं स्यात् शस्तं शरभलीलके ।

1. P.— धिट्टें थहि कट्टक्कट्ट थउ र्ही. O.— थों ता चउ धिट्टें थर्हि कट्ट थर्ही.

2. This is a group of तालs having 7 मात्राs each as stated in v. 78. The राजचूडामणि of भरता० ७.४४७ and सं० चूडा० p. 11, no. 22 is = ० ० । । । ० ० । ऽ, a ताल of 8 मात्राs; also in सं० रत्ना० ५.२६८.

3. P.— रत्थुं गण्णि थुरुगु तद्धीं तद्धीं तगि धिगि थुगुता.
O.—थुंगणि थुगुत्तध्द्धीं ताकि धिगि थुगुता.

4. cf. सं० चूडा०, pp. 15-16, no. 68; भरता० ७.४७३, and सं० रत्ना० ५.२८८. The नान्दी of last two texts is of 8 मात्राs, of the first probably of 7 मात्राs.

5. H.—गुरुलघुप्लुतश्चैव. P.—गुरुर्लघुप्लुत. But as both H. & P. give symbols—ऽ । । ऽ̀, the text must have read गुरुर्लघू प्लुतश्चैव.

6. P.—थुंदिगण दों झिं झिगिदों तद्धिकत्थउ टें.
O.—थुंदिगण दों तक्क(?) कत्थउ टें.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति श्रीनन्दनः[1] ॥ ५६

चतुर्मुखाभिधे ताले सगणाच्च लघुर्गुरुः ॥ ८१ ॥

[2]नर्हि घहि तिकुट घहि । थरिगि दहगुण

तिकुट घहिता । घहिथउधिट्टे घहिथउ

। । ऽ । ऽ

इति चतुर्मुखः[3] ॥ ५७

[4]नारायणे द्रुतद्वन्द्वं जगणश्च गुरुः क्रमात् ।

[5]तकिक्कि । धिगिगत्ता । तत्थों तत्थों । तक्डि तकि ।

थुरुगु थुरुगु ता द्रें

० ० । ऽ । ऽ

इति नारायणः[6] ॥ ५८

बिन्दुयुगं लघुद्वन्द्वं गुरुयुग्मं च दीपके ।

[7]गिणि गिणि खुता झिं झें । दुग झिगि झें

खुखुंद झें

० ० । । ऽ ऽ

इति दीपकः[8] ॥ ५९

---

1. cf:—भरता० ७.४९० and सं० चूडा०, p. 18, no. 95. Also, सं० रत्ना० ५.२९९.
2. P. and O.—तर्हि खर्हि त्ति कुट खर्हि धिट्टे खर्हि थउटे.
3. The चतुर्मुख of सं० चूडा०, p. 17, no. 80, and भरता० ७.४८२ is = । ऽ । ऽ. The former gives a second varietes of ऽ only, the latter shows a variety— । । । ऽ. सं० रत्ना० ५.२९५ gives one type of । ऽ । ऽ only.
4. P.—नायणे.
5. P.—तक्किक्कि धिगिता तत्थों तत्थों तक्डि तकि थुरुगु थरगु ण द्रें. O reads थुरुगु ता द्रों for थरगु ण द्रें of P.
6. Called राजनारायण in भरता० ७.२८८ and सं० चूडा०, p. 18, no. 91; also in सं० रत्ना० ५.२९८.
7. P.—गिणि गिणि घुघु ता झिं झिं दुग झिगि झें खुखुंद इझें. O.—गिणि गिणि घु घु ता झि झें दुगु झिगि झें खुखुंद झें.
8. cf.—द्रुतद्वन्द्वं लघुद्वन्द्वं गुरुद्वन्द्वं च दीपके । भरता० ७.४७२, and सं० चूडा०, p. 15, no. 65. Also see, सं० रत्ना०, ५.२८५

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]चच्चत्पुटः सिंहनादो जयश्रीर्जयमङ्गलः ।
श्रीरङ्गो हंसनादश्च स्युरमी अष्टमात्रिकाः ॥ ८३ ॥

[2]चच्चत्पुटः स विज्ञेयो यत्र स्यात् तगणः प्लुतः ।

[3]द्रें थउ । गथउ । गाधिक् कथउ धिद्धि किथउ
ताद्रि कथउ द्रें

ऽ ऽ । ऽ̣

इति चच्चत्पुटः[4] ॥ ६०

सिंहनादे विधातव्यं लघुर्गुरुयुगं लगौ ॥ ८४ ॥

[5]तत्तगिथु द्रहिथुंगधिद्धि । तक्कट धिक्कट थु ।
थर्हित्थर्हि गिथों

। ऽ ऽ । ऽ

इति सिंहनादः[6] ॥ ६१ ॥

जयश्रियां तु [7]रगणाद् व्यापकश्च तथा गुरुः ।

[8]तकि दों घटि । गणटें । तक्कट ! थिरकट
टिगधिता कत्थउ । टं

ऽ । ऽ । ऽ

---

1. H. and O.—चच्चपुटः
2. H.—चच्चपुटः
3. P.—द्रें थउ गत्थउ गाद्दिकत्थउ टिग धिद्रें. O.—द्रेंथउ कत्थउ गाधिक्कथउ द्रौं.
4. A tāla of 8 मात्राs. cf. भरता० ७.४३७, and सं० चूडा०, p. 10, no. 1. चच्चत्पुट is not listed amongst देशीतालs by सं० रत्ना० but it has discussed it as a मार्गताल, cf. सं० रत्ना० ५.१७-२०. cf. also भरतकोश, p. 196.
5. P.—तत्त द्रहि थुंग धिद्धि तकट धिक्कट थउ थर्हि थर्हि गिथों. O reads किथौं for गिथों of P.
6. A tāla of 8 मात्राs. cf. also, भरता० ७.४५३, and सं० चूडा० p. 12, no. 32. see also सं० रत्ना० ५.४७३.
7. H. & K.—तगणाः द्व्यापकश्च.
8. P.—दों घटिगण टें तिकद्द थिरकट टिगधित्थउ टें । ऽ । ऽ । ऽ ।. O reads दिगधित्थउ टें and ऽ । ऽ । ऽ for टिगधित्थउटें etc. of P.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति जयश्रीतालः[1] ॥ ६२

जयमङ्गलताले तु कर्त्तव्यं सगणद्वयम् ॥ ८५ ॥

[2]तकिधिता । धिक्कथउ । किडि किडित ।

रत्थुंगिणि । तक्किथउ गणगण द्रें

। । ऽ । । ऽ

इति जयमङ्गलः[3] ॥ ६३

[4]सगणाल्लः प्लुतश्चैव ताले श्रीरङ्गसंज्ञके ।

[5]धिग्डितकि । थुंग्डिदिगि । थुगुतक्किता ।

तत्तत । तटकुटि धिटि टें

। । ऽ । ऽ̂

इति श्रीरङ्गः[6] ॥ ६४

हंसनादे लघुस्त्र्यङ्गो[7] द्रुतयुग्मं प्लुतस्तथा ॥ ८६ ॥

[8]तत्तकट । धिक्कट थर्हि कथुग थर्हि

थर्हि गुथ । तत्ता । धिद्धिद्रैं गगटें

---

1. A tāla of 8 मात्राs. cf.—रगणो लो गुरुश्चैव जयश्रीरिति कथ्यते । भरता० ७.४५.७. The जयश्री of सं० चूडा०, p. 13, no. 38 is different, but the text does not seem to be certain. Also see, सं० रत्ना० ५.२८२.
2. P. and O.—ताकिधिक्कथउ किडि किडि तरत्थुं गिण्णि तक्कित्थउ.
3. This is a tāla of 8 मात्राs, also in भरता० ७.४६०, सं० चूडा० p. 14, no. 45. Both the texts show exactly identical definitions. Also see, सं० रत्ना० ५.२८०.
4. P.—सगणाल्लप्लुत० O.—सगणाल्लस्तुत०
5. P.—धिग्डि तकि थुंग्डि दिगि थुगु तकि ता तत्त टट कुटि धिद्धि टैं.
O.—धिग्डि तकि थोंग्डि दिगि थुगु तगि तातत्त टकुटि धिद्धि द्रैं.
6. A tāla of 8 मात्राs. cf.—श्रीरङ्गसंज्ञके ताळे सगणो ल्प्लुतौ मतौ । भरता० ७.४४२, and सं० चूडा० p. 11, no. 12; also see, सं० रत्ना० ५.२६५.
7. H. & K.—लघुस्त्यङ्गो० O reads सिंहनादे for हंसनादे.
8. P.—तत्तक धिक्कट थर्हि कथुग तत्त धिद्धि द्रें गणगण टें । । ऽ ० ० इति हंसनादः ॥
O.—तत्तकट धिक्कट थर्हि थर्हि कथुग तत्त धिद्धि द्रें गणगणटैं ऽ̂ ० ० ऽ̂ इति हंसनादः ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

। ऽ ० ० ऽ

इति हंसनादः[1] ॥ ६५

साम्प्रतं ते च भण्यन्ते तालाः[2] ये नवमात्रिकाः ।
जयतालो वसन्तश्च रङ्गोद्योतनसंज्ञकः ॥ ८७ ॥
जगणाल्लो द्रुतौ पश्च जयताले प्रकीर्तिताः ।

[3]थुगुतकि नगझिगि । ता धिटें । द्रेंगणता ।
कथुगिता । धिद्धि । नग झिगि दुग झिगि द्रें

। ऽ । । ० ० ऽ

इति जयतालः[4] ॥ ६६

वसन्तताले [5]विज्ञेयो नगणो मगणस्तथा ॥ ८८ ॥
[6]तद्धि । कथउ । धिद्धिकद्धिच्छ(? क ?) थउ ।
गाधिटें । थउधिटें

। । । ऽ ऽ ऽ

इति वसन्तः[7] ॥ ६७

रङ्गोद्योतनताले तु मगणाल्लप्लुतावपि[8] ( मगणो लप्लुतावपि ) ।

---

1. A tāla of 8 मात्रा s, also in भरता० ७.४५३, and in सं० चूडा० p. 12, no. 31. Also see, सं० रत्ना० ५.२७३.
2. P.—०तालये न च मांत्रिकाः । O.—०ताला ये न च मातृकाः ।
3. P.—थुगु तकि नग झिगि ताधिट्टें द्रेंगण धिद्धि नग झिगि दुग क्षिंगि द्रें. O follows P.
4. A tāla of 9 मात्रा s. The भरता० ७.४६२ has a जयताल of 10 मात्रा s—। ऽ । । । ० ० ऽ. सं० चूडा० p. 14, no. 48 gives the same definition as the भरतार्णव. But सं० रत्ना०, ५.२७२, makes it—। ऽ । । ० ० ऽ as in our text.
5. P.—विज्ञेयौ.
6. P.—तद्धिकथउ धिद्धिकथउ गाधिट्टें धिट्टें थउ धिद्धिट्टें. O omits the whole definition and a major part of पाट s except थउ धिद्धिट्टें ऽ ऽ ऽ इति वसन्तः ॥
7. A tāla of 9 मात्रा s. cf.—वसन्तताले कर्तव्यो नगणो मगणस्तथा । भरता० ७.४८५, सं० चूडा० p. 17, no. 84.
8. P.—मगणो ल्लप्लुतावपि । O.—मगणाल्लप्लुतावपि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]झें खुखुंद ता खुंद नग झिगि खुखुंदु खुंदु दथुगा
नगदुग झिगि झिगि झें
ऽ ऽ ऽ । ऽ̒

इति रङ्गोद्योतनः[2] ॥ ६८

तालानथ प्रवक्ष्यामि दशमात्रादिकान् कति ॥ ८९ ॥
रङ्गप्रदीपतालस्तु षट्पितापुत्रकस्तथा ।
पार्वतीलोचनश्चैव सिंहविक्रीडितोऽपि च ॥ ९० ॥

[3]रङ्गप्रदीपने( के ) ताले गुरू लघुर्गुरुः प्लुतः ।
[4]तत्कुट थहिं ग्डिदि ग्डिदि थहिं धें झं झिगिदत्थों ।
क्रिडि क्रिडि दथउ त्थों ।
ऽ ऽ । ऽ ऽ̒

इति रङ्गप्रदीपकः[5] ॥ ६९

षट्पितापुत्रके ताले प्लुताच्च [6]मगणप्लुतौ ॥ ९१ ॥
[7]झें नख खिण नखि रिकट्टुग झिगिता ।

---

1. P. and O.—झेंघु खुंद खुंद नग झिगि घु खुंद खुंद नग झिगि दुग झिगि झें.
2. A tāla of 10 मात्राs though included in the group of tālas of 9 मात्राs. cf. रङ्गद्योतनताळे तु मगणो लप्लुतावपि । भरता० ७.४४७ and सं० चूडा० p. 11, no. 23; also see, सं० रत्ना० ५.२६९.
3. P.—रङ्गप्रदीपे ताले तु० O omits v. 90.
4. P.—तकु थहिं ग्डिदि ग्डिदि थहिं थें झि झि गिदत्थों ऽ ऽ ऽ ऽ̒ इति रङ्गप्रदीपः ॥
O.—तक्कुट थहिं गिदि ग्डिदि ग्डि( ? ) थहिं थें झिं झिगि दत्थो क्रिडि दंथउ थों.
5. A tāla of 10 मात्राs. But in भरता० ७.४५२ (रङ्गप्रदीपताळे स्यात्सगणो गः प्लुतो यदि ।) it is of 9 मात्राs—। । ऽ ऽ ऽ̒. The text may be incorrect, since सं० चूडा०, which usually follows भरता० reads—रङ्गप्रदीपताले स्यात् तगणो गप्लुतौ यदि । सं० चूडा० p. 12, no. 30, thus making it = ऽ ऽ । ऽ ऽ̒. Also see, सं० रत्ना० ५.२६९.
6. H. & K.—मगणः प्लुतौ ।
7. P.—झें नख खिण नख खि दुग झिगि ता तत कट धिधि कट दरगता घुघु ता । झिं झिं झें ऽ̒ ऽ ऽ ऽ



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ततकट धिद्धिकट । द्रगड द्रगड ता ता

घुघुता झिझिझें

ऽ ऽ ऽ ऽ ऽ

इति षट्पितापुत्रकः[1] ॥ ७०

[2]मगणाल्लो द्रुतो गौ च पार्वतीलोचने द्रुतौ ।

[3]टकुझि टकुझि टकुझि गुटकुडि ग्डिदिग्डिदित्ता

ददत्थों तदत्थों तक्कि धिक्कि । थुंदिगण धिद्धि

थथ उदिगण तत्त

ऽ ऽ ऽ । ० ऽ ऽ ० ०[4]

इति पार्वतीलोचनः[5] ॥ ७१

---

O.—झें नख खिण गन खि—— ——पुग झिगि ता । तत्त कट धि त्रिकट द्रग झवा घुघु ता झिं झिं झें ऽ ऽ ऽ ऽ ऽ.

1. This is a tāla of 12 मात्राs. The षट्पितापुत्रक of भरतार्णव, also of 12 मात्राs, is however different पोलोगो गलपार्श्वेत्र षट्पितापुत्रकः स्मृतः । भरता० ७.४३८, also in सं० चूडा० p. 10, no. 3. There is no such tāla in सं० रत्ना०

2. H. & K.—मगणा लौ द्रुतौ.

3. P.—टकुझि ट्टकुझि टकुझि गुट कुडि गिडदि गिडदि दत्थों ना दत्थों तक्कि धिकि थुंदिगण तत्त ऽ ऽ ऽ ०। ऽ ऽ ० ०

O.—टकुझि टगुझिं टगुझि कुट कुझि गिडदि गिडदि त्थौं तकि धिक्कि थुंदिगण थउदिगण तत्त.

4. H. & K.—ऽ ऽ ऽ । । ० ऽ ऽ

5. This is a tāla of 12½ मात्राs if P. reading is accepted but if with H. we take two लघुs after मगण it would be of 13 मात्राs. Obviously, the scribe of H. has forgotten to add ० ० after ऽ ऽ ऽ । । ० ऽ ऽ.

The पार्वतीलोचन of भरतार्णव, ७.४८९ is—० ० । । ० ० ऽ ऽ । । । । ऽ । ।, a tāla of 16 मात्राs. The सं० चूडा० p. 18, no. 93 gives two varieties and since the second variety of सं० चूडा० shows ऽ ऽ ऽ । ऽ ऽ ० ०, the reading मगणाल्लो of P. is preferable. It must however be remembered that the second variety of सं० चूडा० is of 12 मात्राs, omitting one द्रुत in the middle. The पार्वतीलोचन of सं० रत्ना० ५.२९६ is—ऽ ऽ ऽ । ऽ ऽ ऽ ० ०.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सिंहविक्रीडिते ताले लौ पगौ यगणात्प्लुतः ॥ ९२ ॥

[1]तततत्ता । धिधिधिद्धि झें त्थर्हिं क्कथउ । गत्थउगा ।
त्तकट दोंता । मकट् थुंगा । नग थुगत्ता । तत्तकट
धिद्धिकट । दं थिरगि दं थिरगि दों
। । ऽ ऽ । ऽ ऽ ऽ

इति सिंहविक्रीडितः[2] ॥ ७२

पूर्णचन्द्राभिधस्तालः स्थित्या चन्द्रवदाकृतिः ।
द्रुतमाने द्रुतैर्ज्ञेयो लघुभिस्त्रिंशन्मात्रिकः ॥ ९३ ॥

एको द्वौ च त्रयश्चैव चत्वारः पञ्च च क्रमात् ।
एवं च [3]व्युत्क्रमेणैते द्रुतास्तु लघवोऽथवा ॥ ९४ ॥

[4]तातत्ता । तगधिगि ता । तग धिगि थउद्रें ।
नग झिगि दुगगि ता । झिंझि नख खिण ।
झें तकुट पुपु ता झिझिगिद्रें थिधैं ता ।
लघुभिर्वा ॥

इति पूर्णचन्द्रतालः[5] ॥ ७३

---

1. P.—झें थर्हिं कत्थउ कत्थउ गा दों दों तातग थुग तातत्त कटधिद्धि कटदं थिरगिदं थिरगिदों । । ऽ ऽ ऽ ऽ इति सिंहविक्रीडितः ॥
O follows P but reads कत्थउ only once, and gives । । ऽ ऽ । ऽ ऽ ऽ following H.
2. This is a tāla of 15 मात्राs. The सिंहविक्रीडित of भरता० ७.४४८ is a ताल of 19 मात्राs— । ऽ ऽ । ऽ ऽ ऽ । ऽ. The सं० चूडा० p. 12, no. 25 makes it a ताल of 17 मात्राs by adding लपौ at the end of the type given by our text. The सं० रत्ना० ५.२७२ gives yet another variety of 24 मात्राs.
3. H. & K.—एवं च वा क्रमेणैते.
4. P.—ता तत्ता तगधिगि ता तगधिगि थउ द्रें नगझिगि दुगझिगि ता झिं झिं नख खिण झें तटकुट पुपु ता नगझिगि धिद्रें ता ।·लघुभिर्वा ॥ O reads णगझिगि द्रें ता at the end and follows P otherwise.
5. This is a tāla of either 15 + 15 द्रुतs or 15 + 15 लघुs, i.e. of 15 or 30 मात्राs respectively. There is no such tāla in भरतार्णव,

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पृथ्वीकुण्डलतालस्तु जायते षष्टिमात्रिकः ।
[1]तालरत्नाकरं नाम तस्यास्माभिः प्रतिष्ठितम् ॥ ९५ ॥
पृथ्वीकुण्डलताले स्युर्नयौ नो नमभा यभौ ।
यभौ तो यगणश्चैव जगणाच्च गुरुः क्रमात् ॥[2] ९६ ॥

[3]ताकि धिक थुग धिद्धि । दें थउ । तकथुगु धिकि ।
थुगि थुदों । तत्ता । दिरि गिडि दत्थुउ गत्थउ गा दिगि ।
थुग थुंग थों । गत्थउ धिगि तगि ता । कत्थउ गा ।
तकि धिगि थुगु ता तत त्ता । किट कट दथों ।
थुग किथु गुगण झिगि दुग झिगि झिझ्झें ।
गण गण दुग झिझ्झिगण दुगझि दुगझिगि
झें झि घुघु । डिं घुघु । घुघु ताझें । णगझिगि झें ।

---

सं० चूडा० or सं० रत्नाकर. But cf. the following from Bharata-kośa, p. 376—

पूर्णताल:—देशीताल:

एकाद्येकान्ततो वृद्धिह्रासाभ्यां क्रमतो द्रुतैः ।
बीजपूराकृतिधरैः पञ्चविंशतिसङ्ख्यकैः ।
पूर्णतालः समादिष्टः पूर्णविश्वम्भरावृता( तः ) ॥
—कुम्भः

1. P.—तालरत्नाकरनामैतस्यास्माभिः०
2. H.—पृथ्वीकुण्डलताले स्युर्नयौ नौ नमभायभौ ।
यभौ तौ यगणश्चैव जगणाश्च गुरुः क्रमात् ॥
O.—reads नयो तो न सभायभौ in v. 96b. P.—नयौ तो नमभायभौ०
The Bharatakośa, p. 380 quotes vv. 95-96 as below :—
पृथ्वीकुण्डलतालस्तु जायते षष्टिमात्रिकः ।
तानरत्नाकरं नामे( मै )तस्यास्माभिः प्रतिष्ठितम् ॥
पृथ्वीकुण्डलताले स्युर्नौ यस्तो ननभायतौ ।
यतौ तो यगणश्चैव जगणाच्च गुरुः क्रमात् ॥
। । ।, । ऽ ऽ, ऽ ऽ ।, । । ।, ऽ ऽ ऽ, ऽ । । । ऽ ऽ, ऽ । ।, । ऽ ऽ, ऽ । ।, ऽ ऽ ।, । ऽ ऽ, । ऽ ।, ऽ–४० गुरवः, २० लघवः
—सुधा( कलश ).
3. P.—तकि धिकथुगु धिद्धिद्दें थउ तक थुगु धिकि थुगि थउ दों तत्त दिरि गडि दत्थउ गत्थउ गा । गदिगि दिगि थुगु थुगु थों गत्थउ धिगि तमिता (तागिता in O.) कत्थउ गा तकि धिगि थुगु ता ता तत्ता । किड किड दत्थों ( किट किड दौंत्थौं in O )

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तत्त । तत्त । तग धिगि कि तत्त । गधिकि ततत्त ।
तहिं खहिं त्तिकुट थहिं थहिं थरि थरि गि ।
तग थुगु धैं द्धं टें द्रें

| | | | S S S S | | | | | S | | S | | | S S S | | |
S S S | | S S | | S S | S.

प्रस्तारजाश्च ये तालाः [1]ससङ्ख्यानिर्मिताश्च ये ।
तालरत्नाकरत्वात्तेऽमुष्मिन्सोपाश्रयाः कृताः ॥ ९७ ॥

इति पृथ्वीकुण्डलतालः[2] ॥ ७४

## इति सोपाश्रयस्तालसमुच्चयो विज्ञेयः ॥

सङ्ख्यादियुक्तं कलितैकसारं प्रस्तारविस्तारममुं विदित्वा ।
यो वेत्ति सोपाश्रयतालमानं सङ्गीतविज्ञेषु स एव धन्यः ॥ ९८ ॥

इति मलधारिगच्छमण्डनश्रीराजशेखरसूरिशिष्यवाचनाचार्यश्रीसुधाकलशविरचिते स्वोपज्ञ-सङ्गीतोपनिषत्सारोद्धारे प्रस्तारादिसोपाश्रयतालप्रकाशनो नाम द्वितीयोऽध्यायः[3] ॥ छ ॥

---

थुग किथु गुणग ( गि in O ) झिगि दुग झिगि झिङ्झें । गण गण दुग झिदुग ( झिंगण दुग in O ) झिगि झें झिं घुघु डिं घुघु घुघु ता झें णग ( णग ) झिगि झें तत्त तत्त तगि धिगि तत्त नग ( तगि in O ) धिगि तत्तत्त तहिं घहिं त्तिकुट थहिं थरि थरिं गितगथु मुद्रें ( थक थुग द्रीं in O. ) | | | | S S S S S S | | | | S S S S | | | S S S | | S S S | | S S | | S S S S | S |.

The मात्रास in O are :—| | | | S S S S | | | | S S S S | | | S S S | | | S S S | | S S | | S | S.

1. P.—ससंज्ञानिर्मिताश्च०

2. There is no such tāla in भरता०, सं० चूडा० or सं० रत्ना० This tāla of 60 मात्रास, according to v. 95 of text is called ताल-रत्नाकर by Sudhākalaśa, who probably introduced this tāla, just as Śārṅgadeva introduced a tāla after his own name in his सं० रत्ना०, ५.३११.

3. O reads the colophon as—इति संगीतोपनिषत्सारे प्रस्तारादिसोपश्रयी ताल-प्रकाशनो नाम द्वितीयोध्यायः ॥

P. P. Ac. Gunratnasuri M.S.　　　　Jin Gun Aaradhak Trust

# तृतीयोऽध्यायः ।

यो [1]वीतरागस्य परात्मनोऽपि
गुणानुबद्धं[2] गणरागशुद्धम् ।
पुण्यैकलोभात् परया च भक्त्या
गायेत्सुगीतं स तु मुक्तिगामी ॥ १ ॥

उद्ग्राहादौ ध्रुवपदे तथाऽऽभोगे गणाः[3] शुभाः ।
निधेयाः शुभदास्ते [4]हि गीतकर्तुः प्रभोरपि ॥ २ ॥

के गणाः कुत उत्पन्नाः किंरूपाः किंफलप्रदाः ।
किंदेवाः कथमुच्चार्याः किञ्चित् तल्लक्ष्म तूच्यते[5] ॥ ३ ॥

सृष्टिपालनसंहारकर्तारो भुवनत्रये ।
ब्रह्म-विष्णु-हरास्तेऽतो [6]विश्वं विश्वं त्रयात्मकम् ॥ ४ ॥

सर्वशुक्रमयो ब्रह्मा विष्णुर्मांसमयः स्मृतः ।
शम्भुश्चास्थिमयो देहे पिण्डेष्वेवं (पिण्डश्चैवं[7]) त्रयीमयः ॥ ५ ॥

एका मूर्तिस्त्रयो भागा ब्रह्माविष्णुर्महेश्वरः[8] ।
एकैव हि त्रयीभूता त्रयी वाप्येकतां गता[9] ॥ ६ ॥

अतस्तत्त्रयसंयोगान्मूर्तयोऽष्टौ विजज्ञिरे ।
पृथ्व्यप्तेजांसि वायुः खं सूर्यचन्द्रात्मलक्षणाः ॥ ७ ॥

---

1. P.-- गीतरागस्य.
2. P.—गुणानुविद्धं.
3. H. & K.—गुणाः
4. P.—च गीकर्तुः
5. P.—किंचिल्लक्ष्मलत्यते ।
6. P.—विश्वं विश्वं H. & K.—विश्वविश्वं.
7. P.—पिंडं चैव.
8. H. & K.—°महेश्वरः । P.—विष्णुमहेश्वराः ।
   cf.: Bṛhaddeśī, p. 21. :— तथा चाह नारदः—
   देवकुलसमुत्पन्नाः षड्जगान्धारमध्यमाः ,
   एतेषां देवता ज्ञेया ब्रह्मविष्णुमहेश्वराः ॥
9. H & K.—गताः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पृथ्व्यादिपञ्चभूतैर्युक् सूर्यचन्द्रात्मसंयुतम् ।
नृदेहं निर्ममे स्रष्टा स्वाष्टमूर्तिमयं परम् ॥ ८ ॥

मर्त्यो महोत्तमश्चैवं गीतकर्ता[1] स एव हि ।
गीतप्रभुः स च प्रायो गणास्तच्छुभसूचकाः ॥ ९ ॥

धात्रादेशात् सरस्वत्या लोकानां हितहेतवे ।
शुभाशुभादिज्ञानार्थं विवक्षा वाङ्मये कृताः (ता) ॥ १० ॥

[2]ह्रस्वस्वरयुताश्चैव वर्णास्ते लघवो मताः ।
एवं दीर्घाश्च गुरवः पृष्ठस्था[3] युक्तवर्णतः ॥ ११ ॥

लघुगुर्वात्मका वर्णास्तैस्त्रिभिर्निर्मिता गणाः ।
[4]त्रिवर्णयोगप्रस्ताराद्रूपाण्यष्टौ भवन्ति हि ॥ १२ ॥

अष्टावपि गणास्ते च वाङ्मये त्रिकयोगजाः ।
एकस्मिन् त्र्यात्मके शम्भौ मूर्तयोऽष्टैव[5] जज्ञिरे ॥ १३ ॥

क्रमोत्पन्ना गणास्तेऽष्टौ न्यस्तास्तन्मूर्तिषु क्रमात् ।
तत्तद्देवास्तु ते जातास्तन्मयत्वाच्च तत्फलाः[6] ॥ १४ ॥

किंरूपाः किमभिधानाः क्रमोत्पन्नाः कथं तु ते ।
प्रस्तारन्यासनामादि तदुत्पत्तिरथोच्यते ॥ १५ ॥

आदावीप्सितवर्णानां रूपं [7]सर्वं गुरुं न्यसेत् ।
लिखेल्लघुं मुख्यगुरोरधः शेषं तु पूर्ववत् ॥ १६ ॥

लघोरधो गुरुर्ह्रस्वो गुरोस्त्वन्यच्च पूर्ववत् ।
[8]पूर्वतुल्यानि रूपाणि स्युर्यावत् सर्वह्रस्वकम् ॥ १७ ॥

[9]प्रस्ताररूपनिर्माणकृते च सुखबोधकम् ।

---

1. H. & K.—गीतवार्त्ता.
2. H. & K.—ह्रस्वाः स्वरयुता.
3. P.—पृ स्था.
4. H. & K.—त्रिवर्णायोग.
5. H. & K.—एकस्मिन्नात्मके शम्भौ मूर्तयोऽष्टौ च.
6. P.—तत्पलाः
7. P.—सर्व गुरु.
8. P.—पूर्वातुल्यानि.
9. H. & K.—प्रस्तारे रूपनिर्माण.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सङ्ख्याङ्कितं बालधियां प्रकारान्तरमुच्यते ॥ १८ ॥

[1]स्थानेद्विगुणिताद्याद्या(:) संक्षिप्ता वर्णपङ्क्तयः ।
गुरुभिर्लैस्तथैकाद्यैः स्थानद्विगुणवर्द्धितैः[2] ॥ १९ ॥

[3]यत्त(त)मं रूपमुद्दिष्टं नष्टं वा नीयते च यत् ।
सङ्ख्याङ्कार्द्धे समे ह्रस्वो गुरुः सैकेऽर्द्धे अर्द्धभाक् ॥ २० ॥

[4]न्यस्ताः सोपानवद्गण्याः सैका वर्णमितैकका: ।
उपर्युपरि विक्षेप्या एकैकं मुञ्चता मुखात् ॥ २१ ॥

सर्वगुरुरूपमाद्यमेकद्व्यादि लघून्यतः ।
अन्त्यं च सर्वलघुकं कलिते रुचिवर्णजे ॥ २२ ॥

इति कलितम् ।

मयराः सतजा भो नो वर्णाः स्युर्गणपूर्वगाः ।
तत्तत्त्वमयाश्चूडामणौ हि कथिता यतः ॥ २३ ॥

[5]इति संक्षेपकथनाद्गणा अष्टाप्युदीरिताः ।
प्रकटाः सुगमैर्वाक्यैः कीर्त्यन्ते ते सलक्षणाः[6] ॥ २४ ॥

---

1. P.—स्थानद्विगुणिताद्याद्याऽसंख्यिता वर्णपंक्तयः ।
2. H. & K.—०वर्द्धिते ।
3. H. & K. add before this, समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना । as $20^a$, and take as $20^b$, our v. $23^a$ of P. But obviously this order is not correct in H. verse. $20^a$ of H. is not found in P.

   v. 20 above (following P.) is omitted in H. The H. thus reads as follows :—

   समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ।
   मयराः सतजा भो ना वर्णाः स्युर्गणपूर्वगाः ॥ २० ॥
   तत्तत्त्वमयाश्चूडामणौ हि कथिता यतः ।
   सर्वगुरुरूपमग्र्यमेकद्व्यादिलघून्यतः ।
   अत्यन्तसर्वलघुकं लिखिते रुचिवर्णजे ॥ २१ ॥ इति कलितम् ॥
4. H.— न्यस्ताः सोपानवद्गण्यामैका मितैकिका ।
   उपर्युपरि विक्षेप्या एकैकं मुंचता मुखात् ॥ २२ ॥
5. This is v. 23 in H. 6. P.—सुलक्षणाः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]त्रिगुरुर्मगणः प्रोक्तो भूतत्त्वी तनुते श्रियम् ।
[2]लघुर्गुरू च यगणो वृद्धिकृज्जलतत्वगः[3] ॥ २५ ॥

[4]गुरुर्लघुर्गुरुर्दत्ते मरणं रगणोऽग्निभृत् ।
प्रवासदायी वायुस्थः सगणो लद्वयं गुरुः ॥ २६ ॥

खतत्त्वी शून्यफलकृत् तगणो गो गुरुर्लघुः ।
[5]सूर्यदेवो रोगकारी जगणो लगुरूलघुः( लगुरुर्लघुः ) ॥ २७ ॥

[6]गुरुर्लघू च भगणः कीर्तिकृच्चन्द्रदैवतः ।
नगणस्त्रिलघुश्चायं परमात्मा सुखप्रदः ॥ २८ ॥

मयौ [7]शिरस्थौ भौमाप्यौ[8] प्रान्तस्थौ[9] च गणौ भनौ[10] ।
चन्द्रात्माधिष्ठितौ नेतुर्गीतादौ ते शुभप्रदाः ॥ २९ ॥

पद्ये वर्णभवे गीते ताले स्युरुपयोगिनः ।
अष्टौ गणास्त्रिजास्त्वेवं द्विजा आर्यादिकेष्वपि ॥ ३० ॥

वृद्धेरेकादिवर्णानां षड्विंशत्यक्षरावधि ।
एकाक्षरादि पादं स्यात्[11] पद्यं भाषासु षट्स्वपि ॥ ३१ ॥

पद्येभ्योऽधिकवर्णाः स्युर्दण्डका[12] बहवोऽपि ते ।
गाथेत्यनुक्तं यच्छन्दोबन्दि( न्धि )च्छन्दांसि पिङ्गले ॥ ३२ ॥

तालान् सोपाश्रयानुक्त्वा गणोत्पत्तिमुदीर्य च ।
स्वरादिरागभाषाणामुत्पत्तिरथ कथ्यते ॥ ३३ ॥

रागरागाङ्गभाषाङ्गक्रियाङ्गोपाङ्गभेदतः ।
अखिलस्यापि नादस्य प्रकाराः पञ्च कीर्तिताः ॥ ३४ ॥

---

1. This is v. 24 in H.
2. H.—लघुर्गुरुश्च.
3. H.—॰जयतत्त्वगः.
4. The verse is omitted in H.
5. H. omits 27[b] and reads 28[a] in its place.
6. This is 25[b] in H.
7. H.—शरस्थौ.
8. H.—भौमापौ.
9. H.—तातस्थौ.
10. H.—ननौ.
11. H.—पादांशात्.
12. P.—स्युर्दंडिका.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पञ्चस्वप्येषु चैकैकः स्वैर्ग्रामैर्हि जायते ।
श्रुतिभिर्मूर्च्छनाभिश्च तन्नैरालप्तिभिस्तथा ॥ ३५ ॥
षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ।
धैवतश्च निषादश्च ते स्वराः सप्त नामतः ॥ ३६ ॥
कण्ठोरस्तालुरसनानासाशीर्षाभिधेषु च ।
षट्सु स्थानेषु जातत्वात् षड्जः स्यात् प्रथमः स्वरः ॥ ३७ ॥
कण्ठात् सञ्जायते षड्ज ऋषभो हृदयोद्भवः[1] ।
गान्धारस्त्वनुनासिक्यो मध्यमो नाभिसम्भवः ॥ ३८ ॥
उरसः शिरसः कण्ठात् सञ्जातः पञ्चमः स्वरः ।
[2]ललाटे धैवतं विद्यान्निषादः सर्वसान्धिजः ॥ ३९ ॥
सप्तस्वराणामुत्पत्तिः शरीरे परिकीर्तिता[3] ।
नादात्मकानामेतेषां रूपवर्णादि वर्ण्यते ॥ ४० ॥
षण्मुखः स्याच्चतुर्हस्तः पाणिभ्यामुत्पले वहन्[4] ।
वीणाशोभिकरद्वन्द्वः षड्जस्तामरसप्रभः ॥ ४१ ॥
कुलं सुपर्वजं जम्बूद्वीपं ब्रह्मा च दैवतं ।
शृङ्गारे च रसे[5] गेयोऽमुष्य गाता तु पावकः[6] ॥ ४२ ॥
मयूरो वाहनं त्वस्य[7] स्वरानुकरणात्पुनः ।
लक्ष्म षड्जस्वरस्योक्त्वा द्वितीयस्याथ भण्यते ॥ ४३ ॥

---

1. P.—हृदयोभवः. 2. P.—लला धैवतं विद्यान्निषादः.
3. P.—परिकीर्त्तिका.
cf. with vv. 37-40, the following from *Matanga*—
कण्ठादुत्तिष्ठते षड्जः ऋषभः शिरसः स्थितः ॥ ८५ ॥
नासायाश्चैव गान्धार उरसो मध्यमः स्वरः ।
उरसः शिरसः कण्ठादुत्थितः पञ्चमः स्वरः ॥ ८६ ॥
तालुदेशात्समुत्पन्नो धैवतस्तु यशस्विनि ।
निषादस्तु समुत्पन्नो विज्ञेयः सर्वसन्धितः ॥ ८७ ॥
—बृहद्देशी, स्वरनिर्णय, ८५, ८७, पृ. २०.
4. H. & K.—दधत्. 5. P.—शृंगारे रसे.
6. H. & K.—गेयो मुख्यगाता नु पावकः । 7. H. & K.—तस्य.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति षड्जस्वरलक्षणम् ॥

एकवक्त्रश्चतुर्हस्तः पाणिभ्यां कमले दधत्[1] ।
वीणां बिभ्रत् कराभ्यां च ऋषभो नीलवर्णभृत् ॥ ४४ ॥

अग्निस्तु दैवतं शाकं द्वीपं गाता च पद्मभूः ।
रसो हास्योऽस्य यानं गौर्गान्धारस्याथ लक्षणम् ॥ ४५ ॥

इति ऋषभलक्षणम् ॥

गान्धारस्त्वेकवदनो गौरवर्णश्चतुष्करः ।
वीणाफलाब्जघण्टाभृत्करः स्यान्मेषवाहनः ॥ ४६ ॥

शङ्करो दैवतं क्रौञ्चो द्वीपं सुपर्वजं कुलम् ।
विष्णुर्गाता रसो वीरोऽमुष्य ज्ञेयोऽथ मध्यमः ॥ ४७ ॥

इति गान्धारलक्षणम् ॥

मध्यमश्चैकवक्त्रः स्याद्धेमवर्णश्चतुष्करः[2] ।
सवीणाकलशौ हस्तौ सपद्मवरदौ[3] तथा ॥ ४८ ॥

भारतीदैवतं द्वीपं [4]कुशं वंशं सुपर्वजम् ।
गाता चन्द्रो रसः शान्तः क्रौञ्चो वाहनमस्य तु ॥ ४९ ॥

इति मध्यमलक्षम् ॥

पञ्चमोऽप्येकवदनो भिन्नवर्णश्च षट्करः ।
वीणाकरद्वये शङ्खाब्जे चापि वरदाभयौ ॥ ५० ॥

---

1. H. & K.—वहन्.

The iconography of *svaras* given here may be compared with that given in *Bṛhaddeśī* of *Mataṅga*, chp. on *svaronirṇaya*, p. 19. It will be seen that our text is later in as much as it gives in greater detail the different iconographic forms.

Also see *Saṅgītamakaranda*, p. 4, vv. 30 ff.

2. P—०श्चतुः कः ।
3. P.—सपद्मववरौ.
4. H. & K.—कुश.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्वयम्भु(म्भू)र्दैवतं[1] द्वीपं शाल्मलिः (श्च) नृवंशजः ।
कोकिला वाहनं गाता नारदः प्रथमो रसः ॥ ५१ ॥

इति पञ्चमलक्षणम् ॥

धैवतो गौरवर्णः स्यादेकवक्त्रश्चतुर्भुजः ।
[2]वीणाकमलखट्वाङ्गफलशोभितसत्करः ॥ ५२ ॥
शम्भुस्तु दैवतं श्वेतं द्वीपं स्याद्दषिजं[3] कुलम् ।
रसो भयानकश्चाश्वो यानं गाता तु तुम्बरुः[4] ॥ ५३ ॥

इति धैवतलक्षणम् ॥

निषादो गजवक्त्रः स्याच्चित्रवर्णश्चतुर्भुजः ।
त्रिशूलपद्मपरशुबीजपूरकभाक्करः ॥ ५४ ॥
गणेशो दैवतं क्रौञ्चो द्वीपं वंशं सुपर्वजम् ।
गाता च तुम्बरुः शान्तो रसः स्याद्वाहनं गजः ॥ ५५ ॥

इति निषादलक्षणम् ॥

स्वरेषु सप्तप्त्वे(स्वे)तेषु प्रत्येकं ते त्रयोऽपि हि ।
मन्द्रमध्यतारसंज्ञा ग्रामाः स्थानस्थितिप्रदाः ॥ ५६ ॥
वीणाहस्ता अमी देवाः कण्ठहृन्नाभिसम्भवाः ।
[5]पुरुषाकृतयः श्वेतपीतरक्ताङ्गशोभिताः ॥ ५७ ॥

इति ग्रामलक्षणम् ॥

सप्तस्वरस्थानकृत्सु स्वस्वस्थानस्थितेषु च ।
प्रत्येकं मूर्च्छनैकैका ग्रामेष्वेषु प्रजायते ॥ ५८ ॥
[6]बाधा लाला[7] समाधानी पूरणी चापराजिता ।
विगलिता [8]संयमिनी मद्रा च अमिताक्षरा ॥ ५९ ॥

---

1. P.—स्वयम्भुर्दैवतं.
2. P.—वीणाकलस० It is difficult to say whether कलश or कमल is the original reading.
3. P.—स्याद्दष्टिजं.
4. P.—तुम्बुरुः.
5. P.—पुरुषाः कृतयः.
6. P—बाधा.
7. P.—लंला.
8. P.—संयमनी.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]द्राविता मङ्गला रामा सुखकृज्जयशेखरा ।
रमणी शोभिता नादा तथाभिचरिता[2] मता ॥ ६० ॥

नादत्तकासिका चण्डा[3] मूर्च्छना नामतस्त्वमूः ।
वीणाहस्ता इमा देव्यो लयकृत्सुखदा मताः ॥ ६१ ॥

[4]प्रथमस्वरजो ग्रामो मन्द्रस्तद्वा च मूर्च्छना ।
निषादे तारचण्डे च भूमौ मर्त्यगलेन हि[5] ॥ ६२ ॥

एवं वीणादिलक्ष्याः[6] स्युर्मूर्च्छनास्त्वेकविंशतिः ।
भवन्त्येकोनपञ्चाशत्तानास्तांश्च भणाम्यहम् ॥ ६३ ॥

## इति मूर्छनालक्षणम् ॥

(अथ तानाः)

[7]तत्र तेन्ना यदुच्यन्ते तानास्ते स्वरसंस्थिताः ।
[8]आलप्तिश्रुतिसंस्थानव्यापकर्तार एव ते ॥ ६४ ॥

ताना-नाता-नतानन्ता-[9]तन्न-तेन्नक-तन्नकाः[10] ।
[11]विज्ञेयास्ते क्रमात् तानाः [12]सप्त सप्त स्वरे स्वरे ॥ ६५ ॥

---

1. H.—द्रविता. 2. P.—तथाभिसरिता.
3. P.—चन्द्रा.
The list of *mūrchanās* given here differs from other lists given in *Cūḍāmaṇisāra*, etc., see *Bharatakośa*, p. 501. The list also differs from *Saṅgītaratnākara*, I. 4. vv. 12 ff; *Nāṭyaśāstra*, Ch. XXVIII. vv. 30 ff., and *Saṅgītamakaranda*, p. 7; *Dattila*, p. 3, vv. 21 ff. For *mūrchanās*, esp. cf. *Bṛhaddeśī*, pp. 22 ff.
4. P.—प्रथमः स्वरजो. 5. H. & K.—तर्त्यगलेन हि.
6. H. & K.—एवं वीणादिलक्ष्मा० 7. H. & K.—उन्ततत्रा.
8. H. & K —आलिप्तिः श्रुति० 9. H. & K.—उन्त०
10. H. & K.—नन्नकाः. 11. H. & K.—विज्ञेयाः क्रमजास्तानाः.
12. H. & K.—सप्त सप्तस्वरेषु च। Acc. to Nārada there are 49 तानाs while according to Bharata they are 84 in number, see *Bharatakośa*, pp. 244-46.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विचित्रं जन्तुवद्वक्त्रं तेषां देहं नराकृतिः ।
[1]तत्तत्स्वरकृतावीणाकरास्ताना(:) प्रकीर्तिताः ॥ ६६ ॥

## इति तानालक्षणम् ॥

अथ श्रुतयः ॥

नादान्ता निष्कला गूढा सकला मधुरा तथा ।
कामाङ्गा मधुरा श्यामा तारा चन्द्रानना शुभा ॥ ६७ ॥

असम्पूर्णा वरा पूर्णा रञ्जिका वातिका[2] परा ।
[3]प्रसन्नमदना वामा बाला मधुमती तथा ॥ ६८ ॥

द्वाविंशतिश्च श्रुतय एता ज्ञेयाः स्वरानुगाः ।
[4]श्रुतिभिः कियतीभिस्तु युक्तास्ते च स्वराः क्रमात् ॥ ६९ ॥

चतुःश्रुतिस्त्रिश्रुतिः स्याद्विश्रुतिश्च[5] चतुःश्रुतिः ।
[6]त्रिश्रुतिश्चतुःश्रुतिश्च [7]द्विश्रुतिश्च स्वरा मताः ॥ ७० ॥

## इति श्रुतिलक्षम् ॥

श्रुतिभिर्मूर्च्छनाभिश्च ग्रामैस्तैश्च संहिताः ।
[8]मताः सप्तस्वरास्तैस्तु[9] रागभाषादयः कृताः ॥ ७१ ॥

## (अथ रागाः)

तावन्तस्ते तु रागाः स्युर्यावन्त्यो जावजातयः ।
षोडशसहस्रसङ्ख्यास्ते[10] रागा गोपीकृता मताः ॥ ७२ ॥

---

1. P.—तत्तत्स्वरकृतो.
2. H. & K.—राजका रातिका.
3. H. & K.—प्रसन्ना वदना. P.—प्रसन्ना मदन्ना.
4. H. & K.—Omit this $69^b$ and insert $70^a$ below in its place. For श्रुतिs see *Bharatakośa*, pp. 682 f., 955 f.; *Saṅgītaratnākara*, 1.3.10 ff. Our list differs from the lists of *Nāṭyaśāstra*, and *Saṅgītaratnākara* etc.
5. P. omits च.
6. H. & K.—त्रिश्रुतिश्च चतुःश्रुतिः.
7. P.—त्रिश्रुतिश्च.
8. P.—मता.
9. H. & K.—॰स्तै तु.
10. P.—सु.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

बुद्धिदौर्बल्यतस्तेऽपि न ज्ञायन्ते कथंचन ।
अतोऽल्पबुद्धिज्ञानार्थं तेऽधुना नियताः कृताः ॥ ७३ ॥

श्रीरागप्रमुखा रागाः षट् षड्भाषाभिरन्विताः ।
प्रत्येकं ते [1]च विज्ञेयास्ताँस्तु वक्ष्ये सलक्षणान् ॥ ७४ ॥

श्रीरागो( ऽथ ) वसन्तश्च भैरवः पञ्चमस्तथा ।
मेघरागश्च विज्ञेयो षष्ठो नट्टनरायणः ॥ ७५ ॥[2]

[3]रूपवर्णादिकं किञ्चिदमीषां प्रतिपाद्यते ।
श्रीरागोऽथ गौरवर्णः सोऽष्टहस्तश्चतुर्मुखः ॥ ७६ ॥

[4]पाशाब्जपुस्तकाङ्कुशबीजपूरकभृत्करः ।
वीणा करद्वयेऽस्य[5] स्यादेकश्च वरदः करः ॥ ७७ ॥

विख्यातोऽयं हंसयानो ब्रह्ममूर्त्तिरिवापरः[6] ।
[7]एतस्यानुगभाषाणां नामानि स्युर्यथाक्रमम् ॥ ७८ ॥

गौडी कोलाहलान्धाली[8] द्रविडी मालवकैशिकी[9] ।
षष्ठी स्याद्देवगान्धारी तासां वर्ण्यादि ( वर्णादि ) वर्ण्यते ॥ ७९ ॥

गौडी भाषा पीतवस्त्रा गौराङ्गी गजवाहना ।
कोलाहला रक्तवस्त्रा गौरा तु शुकवाहना ॥ ८० ॥

---

1. P.—तेऽपि.
2. Cf.—श्रीरागोऽपि वसन्तश्च भैरवः पञ्चमस्तथा ।
   मेघरोजस्तु विज्ञेयो नटनारायणश्च षट् ॥
   सङ्गीतमकरन्द, ३, ७४, p 20.
3. Our text is the earliest known datable work giving iconography of different rāgas. For other early texts, see, Gangoly O.C., *Rāgas and Rāgiṇīs*, p. 106.
4. P.—पाशाब्ज॰
5. H. & K.—वीणाकरद्वयः स स्यादेकश्च॰
6. H. & K.—॰रिवापरा.
7. H. & K.—एषां तु रागभाषाणां
8. P.—कोलाहलाधाली.
9. H. & K.—मालवकौसकी. These have been classified as wives of *Śrī-Rāga* in a sixteenth century work ascribed to Nārada, see, Gangoly, O. C., *op. cit.*, p 201.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

धूम्राभा कृष्णवसनान्धाली शूकरवाहना ।
द्रविडी रक्तचीरा स्याद्धेमाभा[1] मत्स्यवाहना ॥ ८१ ॥

मालवकैशिकी[2] गौरा क्रौञ्चगा[3] रक्तचीवरा ।
रक्ताभा देवगान्धारी पीतचीराश्वयायिनी[4] ॥ ८२ ॥

श्रीरागानुगता भाषा वीणाहस्ता षडप्यमूः ।
रागस्याथ वसन्तस्य रूपवर्णादि कीर्त्यते ॥ ८३ ॥

## इति सभाषाश्रीरागलक्षणम् ॥

षड्वदनो दशकरो वसन्तो विद्रुमप्रभः ।
सुतालशङ्खखट्वाङ्गफलचक्राब्जभृत्करः[5] ॥ ८४ ॥

सवीणौ च करौ यस्य वरदाभयदौ तथा ।
वाहनं कोकिला चैत्रे वैशाखे गीयते स च[6] ॥ ८५ ॥

[7]आन्दोला [8]कैशिकी चैव तथा प्रथममञ्जरी ।
गुण्डगिरी देवशाखा[9] रामग्री षट्(ड्) वसन्तजाः ॥ ८६ ॥

अथासां [10]लक्ष्म चान्दोला दोलारूढा सुवर्णभा ।
शेषा अपि च गौराङ्ग्यो दोलास्था नादपूरिताः ॥ ८७ ॥

## इति सभाषवसन्तलक्षणम् ॥

भैरवः श्वेतवर्णः स्यादेकवक्त्रोऽष्टहस्तभाक् ।
वृषयानः कृत्तिवासाः [11]कल(काल)भैरवरूपभृत् ॥ ८८ ॥

सर्पत्रिशूलखट्वाङ्गजपमालाभिरन्वितैः ।
वीणापाशफलाब्जैश्च पाणिभिर्भूषितोऽह्ययम् ॥ ८९ ॥

---

1. H. & K.—स्याद्धूम्राभा०
2. H. & K.—मालवकोशिकी.
3. H. & K.—क्रौंचगा.
4. H. & K.—०श्वगामिनी ।
5. P.—०फलवक्राऽऽब्जत्मृकरः.
6. H. & K.—सदा.
7. P.—अन्दोला.
8. P.—कोशिकी.
9. P.—चैवशाखा.
10. P.—लक्षणांदोला.
11. P.—किल.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भैरवी गुर्जरी चैव भाषा वेलाकुली तथा ।
कर्णाटी रक्तहंसा च भाषाः षट्(ड्) भैरवानुगाः ॥ ९० ॥

नीलांशुका रक्तवर्णा भैरवी शुकवाहना ।
गौरवर्णा पीतवस्त्रा गुर्जरी मेषगामिनी ॥ ९१ ॥

श्यामाङ्गी कृष्णवसना भाषा गरुडवाहिनी ।
वेलाकुली रक्तचीरा गौरा स्याद्वृषयायिनी ॥ ९२ ॥

कर्णाटी हस्तिगमना नीलाङ्गी रक्तचीवरा ।
हंसयाना पीतवस्त्रा रक्तहंसा प्रवालभा ॥ ९३ ॥

## इति सभापभैरवलक्षणम् ।

पञ्चमस्य च रागस्य सभापस्याथ लक्षणम् ।
पञ्चमः पञ्चवक्त्रः स्याद्दशहस्तो गजेन्द्रगः ॥ ९४ ॥

वीणापाशफलाङ्कुशखट्वाङ्गाब्ज(ज्वर)भृत्करः[1] ।
[2]तालाभयादियुक्पाणिः श्यामलाङ्गश्च कीर्त्यते ॥ ९५ ॥

पञ्चमरागस्य अमूः(पञ्चमस्य च रागस्यामूः) षड् भाषा मतान्तरे[3] ।
त्रिगुणा स्तम्भतीर्थी स्यादाभीरी[4] ककुभा[5] तथा ।
[6]वइराडी च सामेरी षड् भाषाः पञ्चमे मताः ॥ ९६ ॥

---

1. P.—॰अब्जवरभृत्करः । In H. also it was originally ॰अब्जवरभृत्करः । but either the scribe or some later reviser has corrected it.
2. P.—तालाभया हि॰
3. From P. between v. 100 and v. 101 where it is out of place. H. rightly omits this line. P. reads here मतान्तरे मेघरागोमूःषडपि भाषा ज्ञेया । This does not seem to be part of a verse, even though P. makes it 95a. This changes the different पादs of the following verses which is adjusted by P. by making v. 98 a three line verse. Moreover this line of P. is out of place here and could have been between v. 100 and v. 101 where also it seems to be out of place.
4. H.—स्यादाभेरी. 5. P.—ककुता. 6. P.—वप्पेराडी.

९

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

त्रिगुणा महिषयाना च[1] श्यामला कृष्णचीवरा ।
स्तम्भतीर्थी पीतवस्त्रा रक्ताङ्गा सर्पवाहना ॥ ९७ ॥

नीलाम्बरा च गौरा स्यादाभीरी[2] केकिगामिनी ।
ककुभा रक्तसिचया रक्ताङ्गी बकवाहना ॥ ९८ ॥

[3]वईराडी भिन्नवर्णा च कृष्णवस्त्रोष्ट्रयायिनी ।
श्वेतवर्णा नीलवस्त्रा सामेरी स्यान्मृगासना ॥ ९९ ॥

## सभापपञ्चमरागलक्षणम् ॥

अथ मेघाभिधो राग एकवक्त्रोऽष्टपाणिभृत् ।
मेघवर्णः केकिगामी पीताम्बरधरोऽपि च ॥ १०० ॥

शङ्खचक्रगदावीणापद्माभयवरासिभृत् ।
करोच्चयो यस्य बभौ तस्य भाषा षडप्यथ ॥ १०१ ॥

[4]बङ्गाला मधुरा चैव कामोदा चोक्ष(चाक्ष)साटिका ।
देवगिरी च देवाला तासां लक्षणमुच्यते ॥ १०२ ॥

बङ्गाला पीतवसना गौराङ्गी खड्गगामिनी ।
पीतवस्त्रा च नीलाङ्गी[5] मधुरा सारसासना[6] ॥ १०३ ॥

नीलाम्बरा गौरदेहा कामोदा क्रौञ्चयायिनी ।
गौराङ्गी पीतवसना हंसगा चाक्षसाटिका[7] ॥ १०४ ॥

---

1. P. omits च.
2. H.—स्यादाभेरी.
3. P.—वप्पेराडी.
4. P. adds before this पञ्चमरागस्य अमूः षड् भाषा मतान्तरे । which is out of place here and should rather have been after v. 95 where P. reads मतान्तरे मेघरागोमूः (गोऽमूः) षडपि ज्ञेया । which again should have been here. But both may be interpolations as मतान्तरs do not follow in succeeding verses.
5. H.—नीलाङ्गा.
6. P.—सा सासना । H.—सारसवाहना.
7. P.—चोक्षसाटिका. H.—चाक्षसाटिका.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]तार्क्ष्यासना देवगिरी मेघाभा रक्तचीवरा ।
मयूरवाहना श्यामा देवाला नीलचीवरा ॥ १०५ ॥

## इति सभाषमेघरागलक्षणम् ।

नट्टनारायणो रागो नीलवर्णश्चतुर्भुजः ।
शङ्खचक्रगदावीणाकरः[2] स्याद्गरुडासनः[3] ॥ १०६ ॥

तोटिका मोटिका चैव नट्टा डुम्बी तथैव च ।
मल्ला(ल्हा)री[4] सिन्धुमल्हारी[5] नट्टनारायणाश्रयाः ॥ १०७ ॥

अथासां लक्षणं रक्ता तोटिका सम्बरासना ।
मोटिका नीलवसना गौरा[6] कुर्कुट(कुट)वाहना ॥ १०८ ॥

नट्टा क्रौञ्चासना पीतचीवरा मेघदेहभा ।
हेमवर्णा रक्तचीरा डुम्बी स्यान्नरवाहिनी ॥ १०९ ॥

नीलाभा रक्तवसना मल्लारी(ल्हारी) च कपोतगा[7] ।
सिन्धुमल्ला(ल्हा)रिका गौरा पीतचीरा गजासना ॥ ११० ॥

वीणाहस्ता नादरूपा भाषा[8] षट्त्रिंशदात्मगाः ।
रागभाषे त(षास्त)थोक्त्वाथ रागाङ्गादिकमुच्यते ॥ १११ ॥

## इति सभाषनट्टनारायणलक्षणम् ॥

देवशाखा मालवश्रीर्धनश्रीर्दीपकादयः ।
स्वचतुर्जातिसंयुक्ता रागाङ्गा(:) कथिता अमी ॥ ११२ ॥

## इति रागाङ्गाः ॥

बृहती पुलन्धिका[9] चैव सैन्धवी ललितादयः ।
भाषाङ्गा विविधा भीमपलासीप्रमुखा अपि ॥ ११३ ॥

## इति भाषाङ्गाः ॥

---

1. H.—तार्क्षासना.
2. H.—वीराकरः
3. P.—स्याद्गरुसनः.
4. H. reads गांधारी which however is corrected as मल्लारी in margin.
5. P.—सिन्धुमल्लारी.
6. H.—गौरी.
7. P.—कपोतगा.
8. P.—भाषाः.
9. H. & K.—पुलिन्द्रिका.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वैराटिका वृद्धहंसा तथा सौराष्ट्रिकादयः ।
[1]शोकः शकादयश्चान्यैः क्रियाङ्गेषु प्रकीर्तिताः ॥ ११४ ॥

इति क्रियाङ्गानि ॥

[2]केदारवर्णस्थानाख्यास्तथा मालविकादयः ।
कर्णाटबङ्गालमुखाः सर्वे गौडा उपाङ्गगाः ॥ ११५ ॥

इत्युपाङ्गानि ॥

ज्ञेया [3]रागेषु रागाङ्गाः क्रियाङ्गोपाङ्गकावपि[4] ।
तथा भाषासु भाषाङ्गाः[5] स्वस्वदेशभवा[6] अपि ॥ ११६ ॥

रागाश्चतुर्विधा देश्यशुद्धसालिगछाइलाः[7] ।
ओडवः षाडवः पूर्णोऽपूर्णोप्येति[8] चतुर्विधाः ॥ ११७ ॥

नृसंज्ञिता मता देवा देव्यश्च महिलाभिधाः ।
वीणाहस्ता नादरूपाः सर्वे ज्ञेया अमी बुधैः ॥ ११८ ॥

इति रागरागाङ्गक्रियाङ्गोपाङ्गभाषाभाषाङ्गलक्षणम् ॥

रचितास्ते त्वलङ्काराः सप्तस्वरमुखाक्षरैः ।
एषु सर्वेषु रागेषु स्वराणां कारणं हि तत् ॥ ११९ ॥

[9]अन्योन्यस्वरवर्णानां सान्तानां तु प्रयोगतः ।
ये जायन्ते वर्णगुम्फास्तेऽलङ्काराः[10] प्रकीर्तिताः ॥ १२० ॥

तेऽलङ्कारा द्वादशैवमाद्याः शिवमते मताः ।
साद्या अष्टादशमतास्ते तु गौरीमते तथा ॥ १२१ ॥[11]

---

1. P.—शोकप्रकाशकाश्चान्ये.
2. P.—केदारनर्णौ० 3. P.—रोगेषु.
4. H. & K.—क्रियाङ्गोपाङ्गगावपि.
5. P.—भाषाङ्गा. 6. P.—स्वस्वदेवभवा.
7. H. & K.—०छायला: 8. P.—पूर्णोऽपूर्णोऽथेति.
9. P.—अन्योन्यं. 10. H. & K.—०स्ते त्वलङ्काराः.
11. For a different view, see, *Saṅgītasamayasāra* of Pārśvadeva, I. 44 ff. p. 4.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अष्टादशान्तर्लीनास्तु द्वादशैते शिवोद्भवाः ।
अतो गौरीमतोद्धृतांस्तानेवाष्टदश ब्रुवे ॥ १२२ ॥

प्रसन्नश्च परावृत्तो निवृत्तः[1] परिवर्तकः ।
आक्षिप्तः सम्प्रदानश्चोद्ग्राहश्चोपलोलकः ॥ १२३ ॥

क्रामको (क्रमको) बहुमानश्च घातको मलिनस्तथा ।
हुङ्कारोद्योतविद्योताः सुबाहुप्रौढसन्मुखाः ॥ १२४ ॥

अष्टादशेत्यलङ्कारा नामतः कथिता अमी ।
[2]क्रमव्य(व्यु)त्क्रमविन्यस्ताष्टवर्णानां क्रमो ह्यथ ॥ १२५ ॥

सारीगमपधनीसा ॥ प्रसन्नः ॥ १ ॥

सानीधपमगरीसा ॥ परावृत्तः ॥ २ ॥

[3]सारी (।) सारीग (।) सारीगम (।) सारीगमप [सारीगमपध]
सारीगमपधनी (।) सारीगमपधनीसा ॥ निवृत्तः ॥ ३ ॥

[4]सानीसा (।) नीधसा (।) नीधपसा (।) नीधपमसा (।) नीधपमगसा (।)
नीधपमगरीसा (।) नीधपमगरीसा ॥ परिवर्त्तकः ॥ ४ ॥

रीसा (।) गरीसा (।) मगरीसा (।) पमगरीसा[5] (।) धपमगरीसा (।)
नीधपमगरीसा (।) सानीधपमगरीसा ॥ आक्षिप्तः[6] ॥ ५ ॥

[7]सानी (।) सानीध (।) सानी सानीधप (।) सानीधपम (।)
सानीधपमग (।) सानीधपमगरी (।) सानीधपमगरीसा (।)
सम्प्रदानः ॥ ६ ॥

---

1. P.—निवृत्तः. H.—निवर्त्तः.
2. H. & K.—क्रमविक्रम॰ Cf. with the alaṁkāras treated here, the section on alaṁkāras in Sangītaratnākara, 1. 6.
3. H. & K.—सारी२ व सारीगम सारीगमपध सारीगम प सारीगमपधनी सारीगमपधनीरीसा ॥ निवृत्तः ॥ ३ ॥
4. H. & K.—सानीसा नीपसा नीपसा नीपमसा नीपमधाधानीसा नीपमगसानीषं पमसारीगमपधनी मरीसा (॥) परिवर्त्तकः ॥ ४ ॥
5. Omitted by P. 6. H. & K.—आक्षिप्तकः ॥
7. P.—सानी सानी सानीधप सानीधपम सानी धपमग सानीधपमगरी सानीधपमगरीसा । संप्रदानः ॥ ६

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]रीसा । गरी । मग । पम । धप । नीध । सानी ।　　उद्ग्राहः ॥ ७ ॥
[2]सानी । नीध । धप । पम । मग । गरी । रीसा ।　　उपलोलकः ॥ ८ ॥
[3]सारी । रीग । गम । मप । पध । धनी । नीसा ।　　कामकः ॥ ९ ॥
[4]सानी । नीध । धप । पम । मग । गरी । रीसा ।　　बहुमानः ॥ १० ॥
[5]साग । सारी[6] । रीम । गप । मध । पनी । सनीसा( धसा )[7] ।
घातकः ॥ ११ ॥
[8]सानी । साध । नीप । धम । पग । मरी । गसारीसा ( गसा । रीसा )
मल्लिनः ॥ १२ ॥
सारीगम मगरीसा । सानीधप पधनीसा ।　　हुंकारः ॥ १३ ॥
[9]सासा । रीनी । गध । मप । पम । धग । नीरीसासा ।
( नीरी । सासा ) ।　　उद्योतः ॥ १४ ॥
[10]सामपसा (।) सारीग (।) धनीसा (।) सानीध (।) गरीसा ।
सापमसा ।　　विद्योतः ॥ १५ ॥
[11]सारीसा सामसा । सामनीसा । साधपसा[12] ।　　सुबाहुः ॥ १६ ॥

---

1. P. does not give the daṇḍa marks.
2. P.—सासानी । नीनी धधध पपप ममम गगग रीरीरीसा । उपलोलकः ॥ ८ ॥
3. P. does not give the daṇḍa marks.
4. P.—सानी नीधधपपममगगरीरीसा । बहुमानः ॥ १० ॥
   H. reads मप for पम.
5. P. does not give daṇḍa marks.
6. सारी is here not necessary but both P. and H. read it.
7. P. reads सा for सनीसा.
8. P. omits daṇḍa marks.
9. P. omits daṇḍa marks, and reads उद्योतकः for उद्योतः.
   H. reads सासारी ॥ नी । गध । etc. which seems to be a scribal error for the text given above.
10. H.—reads सापमसा । सारीग । etc. P. omits daṇḍa marks.
11. P.—सारीसा सागसा सामनीसा साधपसा ॥ etc.
12. H. reads सापधसा for साधपसा.

P. P. Ac. Gunratnasuri M.S.　　Jin Gun Aaradhak Trust

[1]मपगध । रीनीसासा । सासानीरी । धगमप । प्रौढः ॥ १७ ॥

[2]सागपनीसा । सारीमधसा । साप (।) रीध (।) गनी (।)
मसा (।) सरिगरीसा । गमपमगा । पधनीधपा ।
सानीधनीसा । धपमपधा । मगरीगमा । साम । रीप ।
गध । मनी (।) पसा । साप (।) नीम (।) धग (।) परी (।)
मसा । इति सन्मुखः ॥ १८ ॥

एवमलङ्कारा ज्ञेयाः ॥ १८ ॥

| | |
|---|---|
| १ २ ३ ४ ५ ६ ७ ८<br>सा रीं ग म प ध नी सा<br>सूचिकावत् सूक्ष्म स्वर आद्यः<br>प्रौढः प्रान्तेश्चेति प्रसन्नः । १ | ८ ७ ६ ५ ४ ३ २ १<br>सा नी ध प म ग री सा<br>सर्पकाय इव पतत् स्वर<br>इति परावृत्तः । २ |
| १ २ ३ ४ ५ ६ ७ ८<br>सा री ग म प ध नी सा<br>बालचन्द्रवत् क्रमेण स्वरै-<br>र्वर्द्धित इति निवृत्तः । ३ | ८ ७ ६ ५ ४ ३ २ १<br>सा नी ध प म ग री सा<br>घण्टानादवत् पूर्वोक्तस्वरा<br>ह्रीयन्ते इति परावर्त्तकः । ४ |
| १ २ ३ ४ ५ ६ ७ ८<br>सा रीं ग म प ध नी सा<br>गोवत्सवदग्रे गत्वा गामेवाभ्येति<br>इति आक्षिप्तः । ५ | व्युत्क्रमस्वरा विजयिनृपवत्स्वस्थानस्थः<br>पृष्टस्थान्देशान्मन्दं२ सर्वान्भुनक्ति<br>( इति ) सम्प्रदानः । ६ |
| क्रमस्वरा सुवंशवत्परः परेण<br>प्रकाश्यते इति उद्वाहः । ७ | व्युत्क्रमस्वराः पूर्वजवत् वृद्धान्२<br>प्रकाशयन्ते ( इति ) उपलोलकः । ८ |
| क्रमस्वराः पितृपुत्रवत् पितुः<br>पुत्रः स एव पिता तस्यान्यः<br>पुत्र इति कामकः । ९ | व्युत्क्रमस्वराः राज्यक्रमवत्<br>पूर्वपूर्वराज्यं गृह्णाति इति<br>बहुमानः । १० |

1. P. omits daṇḍa marks and reads धगम for धगमप.
2. According to H.
P.—सागनीसा । सारीमधसा । सापरीध । गनीमसा । सरिगरीसा । गमपमगा । पधनीधपा । सानीधनिसा । धपमपधा । मगरिगमा । सामरीपगधमनी । पसासाप । नीम । धगपरीमसा । इति संमुखः ॥ १८ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust




P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

छत्रचक्रासिशङ्खाब्जजालीगोमूत्रिकादयः ।
[1]स्युर्विचित्राणि चित्राणि बुद्ध्या कार्या तदाकृतिः ॥ १२६ ॥

[2]क्रमव्युत्क्रमविन्यासादन्योन्यं स्वरयोगतः ।
जायन्ते बहवो भेदास्तेऽस्मिन्नष्टादश[3] स्मृताः ॥ १२७ ॥

एवमष्टादश प्रोक्ता अलङ्काराः स्वरानुगाः ।
न्यस्ता अमी प्रबन्धस्थकरणे[4] स्वरपूर्वके ॥ १२८ ॥

पाटानां करणे चेयमेव[5] रीतिर्मता हिता ।
[6]अष्टवाद्योत्थपाटानां योगात्तत्स्वरवद्भवेत् ॥ १२९ ॥

अष्टौ ते भूतला( भुङ्गला )वंशौ[7] वीणापट्टाउजौ तथा ।
[8]मृदङ्गतवि( त्रिव )ली तालकांस्यतालौ स्वभेदिनौ ॥ १३० ॥

## इत्यलङ्कारस्वरकरणपाटकरणानां लक्षणम् ॥

स्वरकरणसुदक्षः पाटवन्धैकधुर्यः
स्वरनियमितरागप्रौढभेदप्रवीणः ।
सरसवचनगुम्फो गीतनिर्माणकृद्यः
स हि भवति यशस्वी सर्वराज्ञां सदस्सु ॥ १३१ ॥

**इति श्रीमलधारि( गच्छमण्डन )श्रीराजशेखरसूरिशिष्यवाचनाचार्यश्रीसुधाकलशविरचिते स्वोपज्ञ-सङ्गीतोपनिषद्ग्रन्थसारोद्धारे गणस्वररागादिप्रकाशनो नाम तृतीयोऽध्यायः ॥ ३ ॥ छ ॥**

---

1. H. & K.—सर्वचित्राणि चित्राणि बुद्ध्या कार्या तदाकृति ॥
2. H. & K.—क्रमविक्रमविन्नासादन्योन्यं०
3. P.—०न्नष्टादशे स्मृताः । H. in margin अस्मिन्—ग्रन्थे.
4. H. & K.—प्रवन्धास्ते करणे.
5. H. & K.—चैवेषामेव.
6. H. & K.—अष्टवाद्यादिपाटानां.
7. P.—अष्टौ तं भुगलावंशौ. H.—अष्टे ते०
8. P.—मृदंगातिवलीतोल०



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# चतुर्थोऽध्यायः ।

सरभसमिलितानां नाकलोकाङ्गनानां
  [1]ततघनशु(सु)पिराख्यानद्धवाद्यैश्च नृत्यैः ।
[2]त्रिभुवनजनतायाः सौख्यकृद्यः स्ववाण्या[3]
  समवसरणभूमौ वीतरागो मुदे सः ॥ १ ॥

अथ वाद्यानि कथ्यन्ते [4]बन्धा वर्णाश्च तद्भवाः ।
वाद्यानीह चतुर्धाः[5] स्युस्तज्जा वर्णास्त्वनेकधा ॥ २ ॥

ततं वीणादिकं वाद्यं तालप्रभृतिकं घनं ।
वंशादिकं तु शु(सु)पिरमानद्धं मुरजादिकम् ॥ ३ ॥

केचिदूचुस्त्रिधा वाद्यमङ्क्यालिङ्ग्यूर्ध्वगं त्विति ।
पुङ्कापुटतालगात्रयन्त्राणीति तु पञ्चधा ॥ ४ ॥

---

1. P.—ततघनसुषिरानद्ध०
2. H.—त्रिभुवनजनितायाः.
3. H.—सुवाण्या.
4. P.—बन्धाद्वर्णाश्च.
5. Cf. :—

पञ्चधा च चतुर्धा च त्रिविधं च मते मते ।
कोहलस्य मते ख्यातं पञ्चधा वाद्यमेव च ॥
सुषिरं च घनं चैव चर्मवद्धं तथैव च ।
तन्त्रीगानं पुरा ख्यातं पञ्चधा वाद्यलक्षणम् ॥

चतुर्विधं दत्तिलेन—

आनद्धं ततमेव स्यात् घनं च सुषिरं तथा ।
एवं चतुर्विधं वाद्यं दत्तिलेन प्रकीर्तितम् ॥

नारदमते तु-चार्मणं तन्त्रिकं चैव घनं च त्रिविधं मतम् ।
एवं त्रिधा नारदस्य मते वाद्यस्य लक्षणम् ॥

चिक्क: quoted in *Bharatakośa*, p. 599.

According to Bharata, *vādya* is fourfold.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आहतोऽनाहतश्चैव दण्डाहतकराहतौ ।
वाताहतश्चेत्यथवा पञ्चशब्दा[1] उदीरिताः ॥ ५ ॥

तते वीणादिके वीणाः पिनाकीकिन्नरीमुखाः ।
पिनाकी सधनुस्तुम्बा किन्नर्यो द्वित्रितुम्बिकाः ॥ ६ ॥

वीणास्तु [2]देववीणाद्यास्तास्त्विमा नादपूरिताः ।
शिवस्य [3]वीणानालम्बी सरस्वत्यास्तु कच्छपी ॥ ७ ॥

विश्वावसोस्तु बृहती महती नारदस्य च[4] ।
कलावती तुम्बरोस्तु गणानां च प्रभावती ॥ ८ ॥

तथा घोषवती वीणा विपञ्ची कण्ठकूणिका ।
वल्लकी ब्रह्मवीणेति वीणाभेदास्त्वनेकशः ॥ ९ ॥

वीणास्त्वेकतन्त्र्याद्यास्तन्त्रीसङ्ख्याङ्किताभिधाः ।
एकविंशतितन्त्र्यन्ता मानव्यो दैवता अपि ॥ १० ॥

एकतन्त्री द्वितन्त्री च त्रितन्त्री सप्ततन्त्रिका ।
एकविंशतितन्त्री चेत्युत्तमा मध्यमापराः ॥ ११ ॥

भजते सर्ववीणासु [5]सैकतन्त्री प्रधानताम् ।
ब्रह्महत्यां हरत्येषा दर्शनात् स्पर्शनादपि ॥ १२ ॥

दण्डः शिवः शिवा तन्त्री नाभिभूर्नाभिरुच्यते ।
तुम्बं विष्णुः कला ब्राह्मी वासुकिर्दोरकस्त्वतः ॥ १३ ॥

---

1. Cf. :—अनाहतः आहतश्चेति स नादो द्विविधो मतः ।

× × × ×

सोऽप्याहतः पञ्चविधो नादस्तु परिकीर्तितः ।
नखवायुजचर्मण्यलोहशारीरजास्तथा ॥ ७ ॥

—सङ्गीतमकरन्द, १,४-७, पृ. १-२.

2. P.—देववाद्यास्तास्त्विमा. *Bharatakośa*, p. 629 reads—वीणासु देववीणाद्या विज्ञेया नादपूरिताः । For different lists of वीणाs see, Bharatakośa, pp. 628-29.

3. P.—वीण नालम्बी. वीणाऽनालम्बी acc. to *Bharatakośa*, p. 629.

4. P.—तु.

5. P.—चैकतंत्री प्रधात्रताम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्वरान्ग्रामान्मूर्च्छनाश्च तालालप्तिश्रुतीस्तथा ।
संसाध्य तस्यां रागास्तु सर्वे वाद्या(:) सुबुद्धिभिः ॥ १४ ॥

स्वरसाधनसंस्थानबिन्दुसप्तकदण्डया ।
वीणया निर्मिताभ्यासो नादः शुद्धिकरः परः[1] ॥ १५ ॥

गुरूपदेशादन्येऽपि भेदा वाद्याश्च कौतुकात् ।
संक्षेपान्नाममात्रेण वक्ष्ये भेदास्तु कत्यपि ॥ १६ ॥

[2]कत्रवाडो [2]बूटवाडश्छन्दो धारा च कैकुटी[3] ।
कङ्कालो हांफ[5] हूंफेति तिरिपो[6] वहणिर्वलिः[7] ॥ १७ ॥

वयणिः कोमलिस्तीपिश्चोपिर्भरितपूरितौ ।
[8]ओहरः [9]प्रसरंत्राणः प्राणाद्या[10] वैणिका मताः ॥ १८ ॥

घातः पातश्च संलेखो लेखोल्लेखा च लेखकाः ।
घोषोऽ[11]र्द्धकर्त्तरी रेफो भेदा एवं घना मताः ॥ १९ ॥

आलप्तयोऽप्यथ ज्ञेया व्यक्ताव्यक्तात्मकाकुकाः ।
परकाकुर्देशकाकु(:) शुद्धा सालङ्कृता तथा ॥ २० ॥

---

Also see *Vīṇālakṣaṇa and Vīṇāprapāṭhaka* (G.O.S. No. 131) for वीणाs.

1. P. omits this verse.
2. H. & K.—कत्तवाडो. *Bharatakośa* (quoting our vv. 17-18, under वीणाप्राणाः, on p. 628)—कत्रत्राड. P.—कत्रवाडो.
3. P.—बोटवाट. *Bharatakośa*,—बूटवाड.
4. P.—कैकुटी. H.—कैकुटी. *Bharatakośa*—कौङ्कुटी.
5. H. & K.—कंकाले हींफ. P.—कंकालो हां(फ). *Bharatakośa*—कङ्कालो हांफगुंफेति.
6. H. & K.—तरिपा. P.—तिरिपा. *Bharatakośa*—तिरपो.
7. P.—चहणिर्वलिः. H. & K.—वहणिर्वलिः. *Bharatakośa*—वहणिर्बलिः.
8. H. & K.—ओंहरः. P.—उहरः (or ओहरः indistinct). Bharata-kośa—तुहरः.
9. P. H. & K.—प्रसरः *Bharatakośa*—प्रहरः.
10. P.—प्राद्या.
11. H.—०षोर्द्धकरी०

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सन्यासा निरलङ्कारा पदहीना पदान्विता ।
अनिबद्धा निबद्धा चेत्येवमालप्तयः स्मृताः ॥ २१ ॥

एकैकस्य च वाद्यस्य तद्धन्धस्य च निर्मितेः ।
तद्वाद्यपाटवर्णानां सम्यग् विज्ञा सरस्वती ॥ २२ ॥

यद्यत् कार्यकरं वाद्यं [1]सुसाध्यं लोकवल्लभम् ।
तत्तत् प्रकीर्त्यते चात्र नान्यद्ग्रन्थस्य गौरवात् ॥ २३ ॥

इति [2]ततवाद्यवीणादिलक्षणम् ॥

तन्त्रीयुतानि वाद्यानि तथा पट्टाउजादयः ।
कराङ्गुलिघृष्टवाद्यास्ते तु सर्वे तताः स्मृताः ॥ २४ ॥[3]

इति ततवाद्यानि ॥

[4]घनवाद्यान्यतो वच्मि तालप्रभृतिकानि तु ।
तालौ च कांस्यतालौ च [5]झल्लरीप्रमुखान्यपि ॥ २५ ॥

सुकुमारस्वरा शक्तिः शिवः स्यात् कर्कशस्वरः[6] ।
शिवशक्त्यात्मकौ तालौ स्वराल्लक्ष्यौ तु कांस्यजौ ॥ २६ ॥

कालमानकरौ गीते वाद्ये च निपतत्स्वरौ ।
फुल्लपद्माकृती तुल्यौ तालौ सङ्गीतसाधकौ ॥ २७ ॥

तालाकृतीकांस्यतालौ ततौ प्रौढौ च वर्तुलौ ।
कांस्यजा च दृढा प्रौढा झल्लरी स्थालरूपिणी ॥ २८ ॥

इति घनवाद्ये तालकांस्यतालझल्लरीलक्षणम् ॥

---

1. P.—साशाध्यं.
2. P.—ततवाद्ये.
3. P. omits this verse.
4. P.—घना०
5. H.—झल्करी.
   Cf. :—इदानीं घनवाद्यस्य ब्रूमो नामानि लक्ष्म च ।
   तालश्च कांस्यतालश्च जयघण्टा च भल्लरी ।
   डगुरुः किरिकिल्यश्च कम्रा घर्घरिका तथा ॥ सोमराजदेव, quoted in *Bharatakośa*, p 831.
6. P.—कर्कशः स्वरः.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वाद्यानि सुषिरे चाथ वंशशङ्खश्चभुङ्गला ।
भेरी शृङ्गं वंसुली च मुखवाद्यान्यनेकशः ॥ २९ ॥[1]

वैणवः खादिरो दान्तश्चान्दनो रक्तचन्दनः[2] ।
आयसः कांस्यजस्तारो भवेद्दण्डश्च हेमजः ॥ ३० ॥

खादिरो वर्तुलः श्लक्ष्णो ग्रन्थिभेदव्रणोज्झितः ।
कनिष्ठाङ्गुलिविस्तारं [3]गर्भेऽस्य सुषिरं मतम् ॥ ३१ ॥

त्यक्त्वा च तत्र दण्डे त्रीण्यङ्गुलानि शिरःस्थलात् ।
मुक्तासूक्ता(क्त्वा फूत्का)रसुषिरं कार्यमङ्गुलिसम्मितम् ॥ ३२ ॥

द्विहस्ताङ्गुलिवाद्यानि दण्डप्रान्ते द्वितीयके ।
एकाङ्गुलान्तराणि स्युश्छिद्राण्यन्यानि सप्त च ॥ ३३ ॥

[4]तान्यष्टौ वदरीवीजसदृशानि भवन्ति हि ।
नादहेतोर्मारुतस्य निर्गमाय कृतानि तु ॥ ३४ ॥

भवन्ति मुखरन्ध्रस्यताररन्ध्रस्य चान्तरे ।
[5]एकैकाङ्गुलिवृद्धाः स्युर्वंशाश्च द्वादश क्रमात् ॥ ३५ ॥

[6]द्वाविंशत्यङ्गुलमितं वंशं यावद्भवन्त्यमी ।
अविस्पष्टश्रुतित्वात्ते वंशा नोक्तास्तु नीरसाः ॥ ३६ ॥

---

1. For सुषिरवाद्यs according to various texts, see, *Bharatakośa*, p. 734.
2. P.—राक्तचन्दनः. For वंश and its varieties according to Kumbha and others see, *Bharatakośa*, pp. 576-77; pp. 934 ff.
3. P. omits from here upto v. 32ᵈ and कार्यमङ्गुलिसम्मितम् is read in 31ᵈ in P.
4. P.—तान्यष्टौ वरीवीज० H. & K.—तानिष्टौ वदिरीवीज०
5. H. & K.—एकैकाङ्गुलिवृद्धाः. P.—एकैकाङ्गुलवृद्धाः.
6. Acc. to Someśvara (quoted in *Bharatakośa*, p. 577) the maximum length is 18 aṅgulas.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

जयो नवाङ्गुलो ज्ञेयो विजयो द्वादशाङ्गुलः ।
त्रयोदशाङ्गुलो नन्दो महानन्दश्चतुर्दशः ॥ ३७ ॥

अमी [1]प्रशस्ताश्चत्वारः सरङ्गाः सरसा इति ।
फुंकाश्चतस्र एतेषां तासां संज्ञा(:) क्रमादमूः[2] ॥ ३८ ॥

इरला विरला चैव पौरा प्रौढा च नामतः ।
इरला सूक्ष्मनादा स्याद्विरला ज्योतिरन्विता[3] ॥ ३९ ॥

पौरा तु काहलानादा प्रौढा रङ्गविनाशिनी ।
घनत्वं [4]सुस्वरत्वं च पूरत्वं फूत्कृतेर्गुणाः ॥ ४० ॥

## इति सुशिरे वंशलक्षणम् ॥

अभग्नं शङ्खमुत्ताननाभिकं[5] सागरोद्भवम् ।
एकाङ्गुलं तस्य मुखे रन्ध्रं शब्दस्य[6] कारकम् ॥ ४१ ॥

## इति शङ्खलक्षणम् ॥

भुङ्गला ताम्रघटिता गोपुच्छाकारधारिणी ।
प्रलम्बबाहुदण्डाङ्गी[7] वाद्या मङ्गलकर्मसु ॥ ४२ ॥

## इति भुङ्गलालक्षणम् ॥

नृपवाद्यं भवेद्भेरी भद्रा कालनिवेदिनी ।
धत्तूरकुसुमाकाराऽखण्डा प्रौढनिनादिनी ॥ ४३ ॥

## इति भेरीलक्षणम् ॥[8]

महिषशृङ्गजं शृङ्गं वक्राकारं च[9] तत्तनु ।

---

1. P.—प्रशस्या० 2. P.—क्रमादथ.
3. P.—व्योतिरन्विता. H. & K.—ज्योतिरद्धिता.
4. H. & K.—शुषिरत्वं च.
5. H. & K.—शंखमुत्तानं सुनाभिं. For remarks of Someśvara, Kumbha and Nānya on Śaṅkha, see, *Bharatakośa*, p. 654.
6. H. & K.—स्पष्टस्य.
7. H. & K.—० बाहुखंडांगी. भुङ्गला is भूंगळ in Gujarati.
8. For भेरी, see also, *Bharatakośa*, p. 443 and p. 902.
9. P.—वक्राकारं पतत्तनु । H.—चक्राकारं च तत्तनु ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

श्यामं सूक्ष्माग्रवदनं गोपवाद्यं त्रुटत्स्वरम् ॥ ४४ ॥

इति शृङ्गलक्षणम् ।

वंशवद्वंसुली ज्ञेया वंशखण्डा[1] समाङ्गभृत् ।
गोपप्रियानेकविधा वाद्या [2]साऽहिंधृतामपि ॥ ४५ ॥

इति वंसुलीलक्षणम् ।

काहला श्वापचं वाद्यं तुररीयं तु नाद्यगम् ।
रणवाद्यं मधुकरी [3]चास्यजं सुपिरं विदुः ॥ ४६ ॥

इति सुपिरवाद्यलक्षणम् ।

[4]मुरजादिपदानद्धं [5]तद्वाद्यमथ वच्म्यहं ।
[6]मृदङ्गढक्कानिस्साण त्रिवलीपटहादिकम् ॥ ४७ ॥

[7]मुरजस्तु मते जैने जातः शङ्खान्महानिधेः ।
लोके तु स्वयमीशेन स वाद्यो मुरजः कृतः ॥ ४८ ॥

कथं रुद्रेण तद्वाद्यं मुरजाख्यं विनिर्मितं ।
कथं पाटभवा वर्णा न्यस्तास्तस्मिँश्च बन्धिनि ॥ ४९ ॥

[8]कैलासाद्रौ स्थितं रुद्रमन्यदा ध्यानतत्परम् ।
ज्ञात्वा स्वघातकमिति तत्रागान्मुरजासुरः ॥ ५० ॥

प्राप्तब्रह्मवरं मां तु न हन्तुं कोऽप्यलं परः[9] ।
ऋते हरात्तपोयुक्तादतस्तं पातयाम्यतः ॥ ५१ ॥

---

1. P.—वंशखंडसमांगभृत् । H.—वंशदंडा.
2. P.—साहिभृतामपि ॥ ४५ ॥ इति वंसुललक्षणम् ।
3. P.—मधुकरीलास्यजं. 4. H.—मरुजादि०
5. P.—तद्वाक्यमवच्म्यहं ।
6. H.—मृदङ्गढक्कालानिःस्यानातिवलीपडहादिकम् ॥
P.—मृदङ्गढक्कानिःस्वासतिवलीपटहादिकम् ॥
7. H.—मरुजस्तु. 8. H.—कैलाशाद्रौ.
9. P.—कोऽप्यलं पुरः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विमृश्यैवं तपोविघ्नरूपं निर्मापयन्मधुं[1] ।
तत्र कैलासशिखरे वने बहुतरौ च सः ॥ ५२ ॥
ध्यानं विसृज्य रुद्रोऽपि पश्यति स्म तपोवनम् ।
तपोलोपि च तज्ज्ञात्वा तत्कृतं ज्ञानचक्षुषा ॥ ५३ ॥
तपोलोपिनि तस्मिंस्तु कुपितो निर्ययौ ततः ।
रुद्रो रुद्रमनास्तं च दृष्ट्वा प्रोवाच राक्षसम् ॥ ५४ ॥
तपोभङ्गोद्यमं कृत्वा रे रे रक्षः क यास्यतः ।
व्रजन्नित्युक्त एवायं युयुत्सुर्हरमापतत् ॥ ५५ ॥
[2]स चिरं योधयित्वा तं पशुमारममारयत् ।
कण्ठपाण्यंह्रि(ण्यङ्घ्रि)हीनं तद्देहं कृत्वात्यजद्भुवि ॥ ५६ ॥
शिवे स्वस्थानमायाते सार्द्रं तद्देहपञ्जरम् ।
उत्पाट्य मांसलोभेन गृध्रैर्नीतं नभस्तले ॥ ५७ ॥
मांसं तत्पञ्जरस्थं तैः किञ्चिद्भुक्त्वाऽतिभारतः ।
[3]पातिते स्वमुखेभ्यस्तत्सान्त्रं[4] वृक्षोपरि स्थितम् ॥ ५८ ॥
अन्त्रावलीभिः संलग्नं तरुशाखावलम्बि तत्[5] ।
सूर्यातपेन [6]संशुष्कं चर्मानद्धं मुखद्वये[7] ॥ ५९ ॥
निर्म्मांसत्वात्तदन्तस्तु सुषिरं वायुयोगतः ।
शब्दायमानं [8]श्रीकण्ठः सु(शु)श्रावाथ वने[9] भ्रमन् ॥ ६० ॥
तच्छब्दितं समाकर्ण्य श्रुतिसौख्यकरं परं ।
कौतुकात्तत्र गत्वेशस्तं ददर्श तथा स्थितम् ॥ ६१ ॥
किमेतदिति तद्रूपं पश्यन्सस्मार तं शिवः ।
विचिन्त्य स्वहतं पूर्वं वामहस्तेन चास्पृशत् ॥ ६२ ॥

---

1. P.—मधु ।
2. H.—सुचिरं बोधयित्वा.
3. P.—पातितं.
4. H.—॰स्तं सांत्रं.
5. P.—तरुशाखाविलं तत् ।
6. P.—सशुष्कं.
7. P.—मुखद्वयोः ।
8. P.—श्रीठंकः.
9. P.—वनो.



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विशेषशब्द उत्पेदे ता इत्यस्मिन्सनादके[1] ।
कौतुकाद्दक्षिणेनापि करेण प्रहृतं ततः[2] ॥ ६३ ॥

उत्पन्नो धीत्ययं शब्दस्तं जघान पुनः शिवः ।
करेण वामेन परो जजृम्भे [3]थों इति स्फुटम् ॥ ६४ ॥

दक्षिणेन करेणापि मुरजाच्च पुनर्हतात् ।
जज्ञे द्रैमित्ययं शब्दः स चाथ[4] स्वाश्रयं ययौ ॥ ६५ ॥

कियत्यपि गते काले [5]प्रावृडर्त्तौ( ड्रतौ ) समेऽन्तरि[6] ।
विज्ञप्तः शम्भुरुमया नवोटजकृते तदा ॥ ६६ ॥

[7]पलाशसर्ग( र्ज )पत्राणां शाड्वलानां निवेशनात् ।
गणेभ्यः कारयामास [8]शर्वस्तत्रोटजं नवम् ॥ ६७ ॥

एकदोटजपत्रेषु शुष्केषु परिपातितान् ।
नवाब्देनाम्बुबिन्दूँस्तु[9] शुश्रावोमायुतो हरः ॥ ६८ ॥

उक्तं च शिवया स्वामिन्पत्रेष्वासारयोगतः ।
सञ्जाता यादृशाः शब्दास्तादृशान्स्थापय क्वचित् ॥ ६९ ॥[10]

इत्युक्ते विमृशन्नीशः स्मृत्वा मुरजमोमिति ।
ऊचे च[11] पूर्ववृत्तान्तं तच्छब्दांस्तत्र च न्यधात् ॥ ७० ॥

ते शब्दाः कीदृशास्तत्र कथं न्यस्तास्तु मर्दले[12] ।
तत्प्रसङ्गेन तत्पाणौ[13] उत्पन्नाः कीदृशास्त्विति ॥ ७१ ॥

---

1. P.—ते इत्यस्मिन्समादके.
2. P.—प्रहृतात्ततः ।
3. P.—थों.
4. H.—चाप्य. Cf.: पुरा मुरासुरं भित्त्वा भगवान्देवकीसुतः । तत्कलेवरमादाय मर्दलं कृतवान्भुवि ॥ etc. from चिक्कः quoted in *Bharatakośa*, p. 499.
5. H.—प्राविडर्तौ.
6. P.—समेतरि.
7. P.—पलाशसग्र०
8. H.—सर्व०
9. H.—स्तत.
10. P. omits this verse.
11. H.—ऊचैव.
12. H.—मर्द्दले.
13. P.—पाण्योरुत्पन्नाः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तद्यथा—

[1]तक्कड दरगड । धिक(क्क)ड दरगड । ताधिक्कड । दाधिक्कड । दरगड ।
धिद्धिकड । तातक्कड । दरगड । तक्कड । दाधिक्कड । दरगड ।
धिक्कड । दरगड । दरगड । ताधिथ(त्थ)उ द्रैं ।

शुष्कपत्रोद्भवाः पूर्वमुत्पन्ना मुरजेऽपि ते ।
उक्ताः शब्दाः पञ्चत्रिंशदथ पाटाः करोद्भवाः[2] ॥ ७२ ॥

नागबन्धः स्वस्तिकश्च शुद्धाख्यः स्यादलग्नकः[3] ।
समखली (समस्खली) चेति पञ्च मुख्याः पाटाः प्रकीर्त्तिताः ॥ ७३ ॥

प्रत्येकं [4]पञ्च सप्तैते पञ्चत्रिंशद्भवन्त्यतः ।
नागबन्धश्च पणव एका एकसरा तथा ॥ ७४ ॥

[5]दूसारा चैव सञ्चारो विचारो नागबन्धगाः ।
अथ सप्त स्वस्तिकाद्याः स्वस्तिको बलिकोहलः ॥ ७५ ॥

फुल्लविक्षेपकश्चैव चारश्च विनिपण्णकः[6] ।
खण्डनागश्च विश्वासः शुद्धाद्यं सप्तकं त्वथ[7] ॥ ७६ ॥

[8]शुद्धः स्यात्स्वरस्फुरणा[9] उत्फुल्ला[10] सुप्रियो दमः ।
नकारो मानवल्ली स्यादमी थालग्नकसप्तकम्[11] ॥ ७७ ॥

अलग्नकः शुद्धरूपो विश्रामो[12] विषमाखली (विषमस्खली)[13] ।
आनन्दः शुचिस्स्फुरणा समखल्यादिकं ततः ॥ ७८ ॥

---

1. P. reads—
तक्कड दरगड । धिक्कड दरगड ताधिक्कड दाधिक्कड दरगड धिद्धिक्कड दातक्कड दरगड तक्कड दाधिक्कड दरगड$_{२}$ दरगड$_{६}$ ताधित्थो उद्रैं.
2. H.—पाटकरोद्भवाः ॥
3. H.—शुद्धः स्यादथऽलग्नकः ।
4. P.—सप्त.
5. P.—दूसरा.
6. P.—विनिषिण्णकः
7. H.—तथा.
8. H.—शुद्धं.
9. P.—॰स्फुरण.
10. P.—उच्छला.
11. H.—स्यादमी लग्नकसप्तकम् ।
12. H.—विश्रामा.
13. P.—विषमा॒ (?) खली.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]समखली( समस्खली ) च विकटा सुघटाऽवघटा शुभा ।
[2]अङ्खली( अड्डुखली ) त्वनुच्छल्ला पाटा एषां क्रमादथ[3] ॥ ७९ ॥

[4]ननननगि । नागबन्धः ॥ १ ॥

---

1. P.—समली. 2. P.—अड्डुखली.

3. The following verses from some work of King Vema (c. 1400 A.D.), quoted under हस्तपाटाः in the *Bharatakośa*, p. 771, may be compared with verses 73-79 of our text--

नागबन्धः स्वस्तिकश्चालगश्शुधिस्तथैव च ।
समस्खलित इत्येते हस्तपाटास्तु पञ्च च ॥
× × × एते च सर्वपाटानां मुख्यत्वेन प्रकाशिताः ।
नागबन्धे नागबन्धः प्रणवश्च ततः परम् ॥
एकश्चैव सरश्चैव ततो दूसरसंज्ञिणः( नः ) ।
संचारश्चाथ विज्ञेय इति सप्तभिदा मताः ॥
अथ स्वस्तिकभेदास्तु स्वस्तिको वल्किोहलः ।
तथा च फुल्लविक्षेपः सञ्चारविलिखी ततः ॥
कुण्डली विक्षेपकश्च पूरकाख्यस्ततः परम् ।
खण्डपूर्वो नागबन्ध इति सप्त स्मृताः क्रमात् ॥
अलगश्च तथाऽऽसारो विश्रामाख्यस्तथैव च ।
ततः परं स्याद्विषमखिलीस्फुरणकस्तथा ॥
सरिः स्फुरी च सप्तस्युरलगश्च भिदा इमाः ।
शुद्धस्वरः स्फुरणकश्चाङ्कुलिर्वलितकाभिधः ॥
ततोऽवघटसंज्ञश्च तकाराख्यस्ततः परम् ।
माणिक्यवल्लीका चेति सप्त शुद्धैर्भिधा मतः ॥
समस्खलितसंज्ञश्च विघटस्सदृशस्तथा ।
खली चाङ्कखली चैवानुत्फुल्लो खुत्तसंज्ञकः ॥
समस्खलितकस्यैते सप्तभेदाः प्रकीर्तिताः । × × × ×

Also see, सङ्गीतरत्नाकर, 6. vv. 828-838.

4. H.—तत नगि ॥ cf. the नागबन्धपाट in Saṅgītasamayasāra, 5. 90, p. 48.

The different हस्तपाटs given in our text may also be compared with सङ्गीतरत्नाकर, vv. 840 ff. and commentraies of Mallinātha and Simhabhūpāla, published in the Adyar ed., Vol. III. pp. 400 ff.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

| | |
|---|---|
| ननगिड । गिडदृगि ॥ | पणवः[1] ॥ २ ॥ |
| ग्डिदि ग्डिदि ॥ | एका ॥ ॥ ३ ॥ |
| ननग्डिदि ॥ | एकसरा[2] ॥ ४ ॥ |
| नखुं नखुं ॥ | दूसरा ॥ ५ ॥ |
| [3]ख च ट किट ॥ | संचारः ॥ ६ ॥ |
| [4]धिकट धिकट ॥ | विचारः ॥ ७ ॥ १ ॥ |
| थों गि ॥ | स्वास्तिकः[5] ॥ १ ॥ |
| [6]धों हंत ॥ | बलिकोहलः ॥ २ ॥ |
| [7]थों गिणि । थों थों गि ॥ | फुल्लविक्षेपः ॥ ३ ॥ |
| [8]थुंदि गण ॥ | चारः ॥ ४ ॥ |
| किट थों ॥ | विनिपि(प)ण्णकः[9] ॥ ५ ॥ |
| थों गि खें खें[10] ॥ | खण्डनागः ॥ ६ ॥ |
| थिरकट थों[11] ॥ | विश्वासः ॥ ७ ॥ २ ॥ |
| [12]नहिं खहिं गि ॥ | शुद्धः ॥ १ ॥ |
| ननगि खह्रिं ॥ | स्वरस्फुरणः ॥ २ ॥ |
| ननगि नखह्रिं नखह्रिं[13] ॥ | उच्छला ॥ ३ ॥ |
| ग्डिदि ग्डिदि खह्रिं ॥ | सुप्रियः[14] ॥ ४ ॥ |
| थोंगि खह्रिं[15] ॥ | दमः ॥ ५ ॥ |

1. पवनः acc. to सं० रत्ना० *op. cit.*, p. 400.
2. H.—एकसिरी. एकसरः, दूःसरः etc. in सं० रत्ना०, p. 400.
3. H.—ख च न हि ट ॥
4. P.—धिक धिकट ॥
5. H.—था गि ॥ सस्तिकः ॥
6. P.—धौत हंत ॥ बलिकोहरः ॥
7. P.— थों गिण०
8. H.—थुंदि । गणचारः । P. थुंदि गण चार ।
9. H.—विनिखिन्नकः ।
10. P.—थों गि खे खे ।
11. P.—थिर कट्ट थों ।
12. H —जहिं खहिं गि ।
13. P.—ननगि नखरिं खहिं ।
14. H.— सुप्रिया ॥
15. H.—थोगि खहिं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

| | |
|---|---|
| ग्डिदि तत्ता[1] ॥ | नकारः ॥ ६ ॥ |
| [2]धिद्धि ॥ | मानवल्ली ॥ ७ ॥ ३ ॥ |
| ननगिड ग्रिडि दा ॥ | अलमकः ॥ १ ॥ |
| थुंदिगण कत्थउ ॥ | शुद्धरूपः[3] ॥ २ ॥ |
| ताकि धिकि ॥ | विश्रामः ॥ ३ ॥ |
| टगु टगु टगु नगु ॥ | विषमखली ॥ ४ ॥ |
| तत्तत्त कट ॥ | आनन्दः ॥ ५ ॥ |
| झें टिंगु डि[4] ॥ | शुचिः ॥ ६ ॥ |
| तत्त गट धिद्धि कट ॥ | फुरणा ॥ ७ ॥ ४ ॥ |
| नगि झें नगि झें ॥ | समखली ॥ १ ॥ |
| [5]गिद्दि गु गिद्दि गु ॥ | विकटा ॥ २ ॥ |
| तक्कत्थउ धि ॥ | सुघटा ॥ ३ ॥ |
| झें दथों ॥ | अवघटा[6] ॥ ४ ॥ |
| [7]तग्डि तत्ता । ताद्धि तत ॥ | शुभा ॥ ५ ॥ |
| नगिदि नगि ॥ | अड्डखली[8] ॥ ६ ॥ |
| थरकट । थरकट ॥ | अनुच्छल्ला ॥ ७ ॥ |

पाटा अमी मृदङ्गस्य पञ्चत्रिंशदुदाहृताः ।
अन्येऽपि बहवो भेदाः कर्त्तरी समकर्त्तरी ॥ ८० ॥

समनखः पाणिहस्तः स्वस्तिकः(को) भ्रमरादयः ।
हस्ताभ्यां वाद्यरीतिश्च नोक्ता ग्रन्थगुरुत्वतः ॥ ८१ ॥

हस्ताभ्यां वाद्यते वाद्यमतस्तद्देवता[9] ब्रुवे ।
अङ्गुष्ठे दैवतं ब्रह्मा तर्जन्यामाधिपः शिवः ॥ ८२ ॥

---

1. P.—ग्डिदिं तत्त्वत्ता । 2. H.—द्धिधिः मानवल्ली.
3. H.—थुंदिगण कथउ । शुद्धरूप । 4. P.—झें टिंगु झि.
5. H.—गिड्ड गु गिड्डि (?) गु विकटाः ।
6. H.—अवघट्टदाः 7. P.—ताद्धि तत्ता तद्धि तत्त ।
8. P.—अड्ड (?) खली.
9. P.—हस्ताभ्यां वाद्य वाच्यमतस्तद्देवता. H.—॰मतस्ता देवता.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मध्यमायां प्रभुर्विष्णुः [1]सर्वदेवा त्वनामिका ।
[2]ऋपिस्थानं कनिष्ठा स्यात्सूर्यः करतलाधिपः[3] ॥ ८४ ॥

मृदङ्गो मर्दलस्तूर्यं मुरजं शिवनिर्मितम् ।
तूरं नद्धं महावाद्यं द्विमुखं पाटसागरः ॥ ८५ ॥

रुद्रेण नाट्यनृत्यार्थं वाद्यं मुरजसंज्ञया ।
निर्मितं कौतुकादेव तत्संज्ञाः कल्पितास्त्विवति ॥ ८६ ॥

वाद्यं लोककृते [4]चान्तः सुपिरं काष्ठजं ततः ।
चर्मावनद्धं द्विमुखं कृतं तन्मुरजाकृतिः( ति ) ॥ ८७ ॥

[5]वसास्थाने निर्मिताश्च चर्मणो [6]वध्रिका इमाः ।
[7]गङ्गायमुनके मुख्ये[8] नागपाशाभिधाः पराः ॥ ८८ ॥

एवमानद्धवाद्येषु[9] मुरजाख्यं प्रकीर्तितम् ।
साम्प्रतं शेषवाद्यनां किञ्चिल्लक्षणमुच्यते ॥ ८९ ॥

## इति मुरजलक्षणम्[10] ॥

चर्मानद्धमुखा ढक्का प्रायेण भूपतेर्हिता ।
[11]निःस्वनो भूपतेर्वाद्यं राज्यकार्येषु वाद्यते ॥ ९० ॥

वज्राकृतिस्तु ति( त्रि )वलिर्द्विमुखा नृत्यवाद्यगाः[12] ।
पटहा [13]मार्गदेशाद्या भूपदेवगृहादिषु ॥ ९१ ॥

[14]आउजो लोकभाषायां [15]धाउजयश्च खाउजा( खंदाउजपखाउजौ ) ।
मताः पट्टाउजश्चेति स्वस्वनामानुसारिणः ॥ ९२ ॥

---

1. H.—सर्वदेवास्त्वनामिका ।
2. P.—ऋगिस्थानं.
3. P.—करतलाभिधः ॥
4. P.—लोककृते वी ( ? ) तः.
5. P.—स्नसास्थाने.
6. H.—वध्रिकास्त्विमाः.
7. P.—गङ्गायमुनिके.
8. H.—मुख्याः.
9. P.—एवमानद्धवाद्येऽदो.
10. H. uses मरुज for मुरज everywhere above.
11. P.—निःस्वानो नृपते०
12. P.—नृत्यवाद्यगा.
13. P.—माऽग्रे०
14. P.—आउजो,
15. P.—खंधाउज पट्टा त्रजाः.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तथैव म्लेच्छवाद्यानि ढोल्लतव्लमुखानि[1] तु ।
डफा च [2]टामकी चैव डउंडिः[3] पादचारिणाम् ॥ ९३ ॥

तथा डमरुको बुक्का [4]दुद्दडी कुण्डली घटः ।
[5]चर्मावनद्धान्यन्यान्यथानद्धे सकलान्य(पि) ॥९४॥

इति आनद्धवाद्यलक्षणम् ॥

व्यासायामादिकं मानं रूपं वर्णाकृति(:)स्फुटम् ।
वाद्याक्षरोत्पत्तिरीतिः [6]स्वस्वस्थानकवादनम् ॥ ९५ ॥

इत्यादि यन्मयानोक्तं ग्रन्थेऽस्मिन्बहुताभयात् ।
[7]वाद्यवादनदक्षेभ्यो ज्ञेयं तत्तद्यथारुचि ॥ ९६ ॥ युग्मम् ॥

एकैकस्मिन्सुवाद्ये तु सदभ्यासपरायणः[8] ।
सर्ववाद्योद्भवान्पाटान्प्रयुञ्जति(नक्ति) विचक्षणः[9] ॥ ९७ ॥

ततघनसुषिराख्यानद्धवाद्यानि तानि
प्रततविविधपाटैर्वादितानि प्रयत्नात् ।
[10]य इह सकलतालान्तेषु संयोज्य सद्यो
रचयति च सुनृत्यं सोऽग्रणीर्विज्ञपङ्क्तेः[11] ॥ ९८ ॥

इति [12]श्रीमलधारिगच्छमण्डन[13]वादीन्द्रश्रीराजशेखरसूरिशिष्यवाचनाचार्यश्रीसुधाकलशविरचिते स्वोपज्ञसङ्गीतोपनिषद्ग्रन्थसारोद्धारे चतुर्विधवाद्यप्रकाशनो नाम चतुर्थोऽध्यायः ॥ ४ ॥ छ ॥

---

1. H.—ढोल्लवल्लमुखानि. 2. H.—टांमकी.
3. H.—डलंडिः. 4. H.—दुडदडी.
5. H.—चर्मावद्धान्यानिप्यानद्धे सकलान्यपि.
6. P.—स्वस्थानकवादनं.
7. H.—वाद्यानां च कुशलेभ्यो.
8. P.—सदाभ्यासपरायणाः । 9. P.—प्रयुंजंति विचक्षणाः ।
10. H.—यदिह सकलतालान् वेणु संयोज्य. P.—॰संयोद्य.
11. P.—सोग्रणी विज्ञपंक्तेः ॥ 12. H.—मलयगच्छमंडन.
13. H. omits वादीन्द्र.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# पञ्चमोऽध्यायः ।

प्राकारत्रयभूषिते मणिचिते यद्देशनाभूतले[1]
सङ्गीतत्रयतत्परस्त्रिजगतीलोकः सहर्षोऽजनि ।
सच्छत्रत्रितयोपशोभिततनू रत्नत्रयोद्योतक-
[2]स्तस्याः प्राप्तिसुबोधिदो जिनपतिर्देयादमेयां[3] मुदम् ॥ १ ॥

यस्मात् पञ्चेन्द्रियप्रीतिर्भवेच्च दुःखविस्मृतिः ।
सदा सौख्यकरं तत्तु नृत्यं मूलादथ ब्रुवे ॥ २ ॥

प्रवेशे तीर्थयात्रायां तथा भूपाभिषेचने ।
विवाहे पुत्रजन्माद्ये उत्सवे नृत्यमिष्यते ॥ ३ ॥

[4]इन्द्राभ्यर्थनया पूर्वं वसिष्ठाय महर्षये ।
उपदिष्टा [5]नृत्यविद्या ब्रह्मणा ज्ञानमूर्त्तये ॥ ४ ॥

नृत्यं सम्यक् परिज्ञाय स्वपुत्राणां शतेऽपि तत् ।
निवेश्य तच्च पुत्रेभ्यो धात्रग्रे स त्वदर्शयत्[6] ॥ ५ ॥

शतपुत्रयुतो गत्वा स्रष्टुरादेशतस्ततः ।
दर्शयामास तन्नृत्यं शक्राग्रे स्वसुतैर्मुनिः ॥ ६ ॥

[7]इन्द्रोपरोधात्तन्नृत्यं लास्यताण्डवसंयुतं ।
रम्भोर्वशीमेनकाद्या [8]ऋषिः पुत्रैरशासयत् ॥ ७ ॥

[9]नृत(त्तं) नरकृतं ज्ञेयं नृत्यं नारीकृतं मतं ।
तथा नाट्यं नाटकं च नरनारीविनिर्मितम् ॥ ८ ॥

---

1. H.—यद्दर्शनाद्भूतले.
2. P.—तस्याप्राप्ति०
3. P.—०दमंदां.
4. P.—इन्द्राभ्यर्चनया.
5. H.—नृत्यविदा.
6. H.—स तद्दर्शयत्.
7. P.—इन्द्रोपरोधनात्.
8. H.—ऋषिपुत्रै०
9. H.—नृत्तं. P.—नृत.



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सुकुमारं [1]तु तल्लास्यं ताण्डवं विषमाङ्गभृत् ।
सर्वभेदान्वितं स्वर्गे नृत्यं [2]प्रववृते ततः ॥ ९ ॥

[3]स्वाङ्गेऽनुभूतं यद्गौर्या लास्यं तच्छक्तिजं स्मृतं ।
विषमं ताण्डवं रौद्रं [4]रुद्रेण स्वाङ्गनिर्मितम् ॥ १० ॥

यथा स्वर्गेऽभवन्नृत्यं मर्त्यलोकेऽप्यथाजनि[5] ।
तेभ्यो वसिष्ठपुत्रेभ्यो भक्तभूपाङ्गनादिषु ॥ ११ ॥

ततः प्रवृत्तः(त्तं) बहुधा भूतले कुशलैः कृतः(तम्) ।
उषानाम्न्यां बाणपुत्र्यां लास्यं गौर्यास्ततोऽभवत् ॥ १२ ॥

गन्धर्वविश्वावसुनाऽभ्यस्य नृत्यं त्रिविष्टपे ।
शिक्षितं चित्ररथाय स च पार्थमशासयत् ॥ १३ ॥

शिक्षिता चार्जुनेनापि विराटदुहितोत्तरा ।
साभिमन्योश्च मरणाद्विससाराखिलं तु तत् ॥ १४ ॥

हरमाराध्य तत्तस्मात् प्राप्तं पालकभूभृता ।
विस्तृतं पृथिवीपीठे तन्नृत्यं [6]तु ततो जने ॥ १५ ॥

शास्त्राण्यालोक्य [7]तत्किञ्चिन्मयापि प्रतिपाद्यते ।
नृत्यं गात्रस्य विक्षेपो नृतेर्धातोर्भवत्पदः[8] ॥ १६ ॥

स्यादङ्गोपाङ्गप्रत्यङ्गभेदेन त्रिविधं पुनः[9] ।
प्रत्येकं तेऽपि [10]षड् भेदास्तेऽपि स्युः स्वस्वभेदिनः ॥ १७ ॥

शीर्षं हस्तौ च हृदयं तथा पार्श्वं कटिः[11] पदौ ।
इत्यङ्गा षडथो दृष्टिस्तथा भ्रूनासिकाधराः ॥ १८ ॥

---

1. P.—च.
2. H.—प्रवर्त्तते सदा ।
3. H.—स्वागेनभूतं.
4. H.—रौद्रेण.
5. P.—मर्त्यलोकेथवाजनि.
6. P.—च.
7. P.—किंचित्तन्मयापि.
8. P.—नृते द्धातोर्भवत्पदा ॥
9. P.—॰भेदात्तत् त्रिविधं पुनः ।
10. H.—तद्भेदास्तेपि च स्वस्वभेदिनः ॥
11. P.—कटि

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कपोलौ [1]चिबुकं चेत्युपाङ्गाः षडपि नामतः ।
ग्रीवांसौ पृष्ठमुदरमूरूजङ्घायुगं[2] तथा ॥ १९ ॥

प्रत्यङ्गाः षडमी ज्ञेयाः शीर्षभेदाः क्रमादथ ।
शीर्षं दृग्दर्शनं तारापुटभ्रूनासिकाधराः ॥ २० ॥

कपोलौ [3]चिबुकं चैव वक्त्रं रागश्च (वक्त्ररागश्च) शीर्षगाः ।
क्रमादेतान्प्रवक्ष्यामि पूर्वग्रन्थानुसारतः ॥ २१ ॥

रेचितं च परावृत्तमवधूतमधोमुखम् ।
निकुञ्चितं तथोत्क्षिप्तमञ्चितं[4] लोलितं शिरः ॥ २२ ॥

परिवाहितमाधूतं धूतमाकम्पकम्पितौ ।
[5]त्रयोदश स्युः शीर्षाणि तेषां लक्ष्माऽथ किञ्चन ॥ २३ ॥

---

1. P.—चिबुकश्चेत्युपांगाः.
2. P.—॰युतं.
3. P.—चिबुकं चक्ररागश्चेते तु षा शीर्षगाः ।
4. P.—अंचितलोलितं.
5. Cf.:—धुतं विधुतमाधूतमवधूतं च कम्पितम् ।
आकम्पितोद्वाहिते च परिवाहितमञ्चितम् ॥ ४९ ॥
निहञ्चितं परावृत्तमुत्क्षिप्ताधोमुखे तथा ।
लोलितं चेति विज्ञेयं चतुर्दशविधं शिरः ॥ ५० ॥
तिर्यङ्नतोन्नतं स्कन्धानतमारात्रिकं समम् ।
पार्श्वाभिमुखमित्यन्यान्भेदान्पश्चापरे जगुः ॥ ५१ ॥
*Saṅgītaratnākara*, 7. 49-51, (Adyar ed.), Vol. IV. pp. 17-18.

*Saṅgītaratnākara* borrows the above verses from *Bharatārṇava* of Nandikeśvara, chp. IV. 204-206, p. 92. Also cf. *Bharatakośa*, p. 661—"त्रयोदश कर्माणि भरतमते । तद्व्याख्यातृमते चतुर्दश । नन्दिमते नव । नन्द्यनुयायिनः पञ्चापराणि च प्राहुः । भरतस्य त्रयोदशकर्मभिर्मतङ्गः पुनः एकादशकर्माण्यधिकान्याह ।"

Also cf., *ibid.*, p. 661—
आकम्पितं कम्पिताख्यं धुतं विधुतमञ्चितम् ।
परिवाहितमाधूतमवधूतं निहञ्चितम् ॥
अधोमुखं परावृत्तमुत्क्षिप्तं लोलितं शिरः ।
त्रयोदशविधं वृत्तं मुनिना समुदीरितम् ॥
—उमायनः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रेचितं [1]तु शिरस्तिर्यग्यानं स्याद्विस्मयादिषु ।
[2]शीघ्रयानात् परावृत्तमवधूतं निषेधने[3] ॥ २४ ॥

अधोमुखं [4]प्रणामादौ भूम्यालोके निकुञ्चितं ।
ऊर्ध्वालोके तथोत्क्षिप्तं मनाग्नम्रं शिरोऽञ्चितम्[5] ॥ २५ ॥

[6]लोलनाल्लोलितं चैव दोलादौ परिवाहितं ।
मदादौ तिर्यगाधूतं धुतं कोपेऽथ विस्मये ॥ २६ ॥

भयेऽवतारे चाकम्पं संज्ञादिषु च कम्पितं ।
पूर्वाण्यष्टौ शिरांस्याहुर्नाट्ये सर्वत्र पञ्च तु ॥ २७ ॥

इति शिरोलक्षणम्[7] ॥

---

प्राकृतमिति चतुर्दशतमं अन्ये प्राहुः ।
समम् आरात्रिकं नराजितं तिर्यङ्नतोन्नतम् ।
पार्श्वाभिमुखमुन्नीतं सकम्पपरिवाहितम् ॥
सकम्पधुतनामान्यदुद्धतं पार्श्वकम्पितम् ।
पार्श्वकम्पितमित्येकादशभेदाः प्रकीर्तिताः ॥
— ज्यायनः

तिर्यङ्नतोन्नतं स्कन्धानतमारात्रिकं समम् ।
पार्श्वाभिमुखमित्यन्यान्भेदान्पञ्चापरे जगुः ॥
—शार्ङ्गदेवः

For Bharata & Abhinavagupta's Comm. on the same, see *Nāṭyaśāstra*, Vol. II ( G.O.S. no. LXVIII ), pp. 3 ff.

1. P.—तु शिरस्तिर्यग् जातं. H.—च शिरस्तिर्यग्यानं.
2. H.—शीघ्रमानात्. 3. H.—निषेवने.
4. P.—प्रमाणादौ. 5. P.—शिरोचितं.
6. H.—लावनाल्लोलितं.
7. Pārśvadeva, in his *Saṅgītasamayasāra*, ६, ७, refers to thirteen types of heads but, in v. 17 and vv. 19 ff., describes only nine varieties, namely, आकम्पित, कम्पित, धुत, आधूत, अवधूत, अञ्चित, निहञ्चित, उत्क्षिप्त & अधोगत. Kumbha in his *Nṛtyaratnakośa*, १. १. ४८४ ff. gives 14 types. The *Abhinayadarpaṇa* of Nandikeśvara, vv. 49-65, describes 9 शिरोभेदs only.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

क्रुद्धा दृप्ता च दीना च हृष्टा स्निग्धा भयान्विता ।
सलज्जा मुकुला शून्या विषण्णा मलिनाधरा ॥ २८ ॥

शङ्किता ललिता भ्रान्ता केकरा[1] विप्णुता (विप्लुता) चला ।
त्रस्ता च मलिना ग्लाना स्मेरा क्रूराभिनन्दिता ॥ २९ ॥

स्थिरोद्विग्ना परिम्लाना सकामा सभयाद्भुता ।
हास्या वीरा सकरुणा शान्ता रौद्रा जुगुप्सिता ॥ ३० ॥

षट्त्रिंशद् दृष्टयोऽमूस्तु सान्वर्थत्वात्सलक्षणाः ।
इत्युक्ता व्यभिचारिण्यः पूर्वाः शेषा रसान्विताः ॥ ३१ ॥

इति दृष्टिलक्षणम् ॥[2]

दर्शनं चाष्टधा साचि विलोकितनिवर्तिते ।
अवलोविकितमुल्लोकं समं वृत्तानिवर्तिते[3] ॥ ३२ ॥

तिर्यग्वीक्षणतः साचि [4]सस्पृहं तु विलोकितं ।
निवर्तितं व्याघुटितं सरलं त्ववलोकितम्[5] ॥ ३३ ॥

[6]ऊर्ध्वदर्शनमुल्लोकं विकाररहितं[7] समम् ।
पुनः प्रवृत्तं [8]तद् वृत्तं स्थिरस्थमनिवर्तितम् ॥ ३४ ॥

इति दर्शनलक्षणम्[9] ॥

---

1. H.—भ्रान्ताकैकरा.
2. For Bharata's list see, *Nāṭyaśāstra*, 8. 41-95, *op. cit.*, Vol. II, pp. 7-14. Also see, *Bharatakośa*, p. 853; *Saṅgītaratnākara*, ७. ३७७-४३१, *op. cit.*, Vol. IV, pp. 135-150; *Bharatārṇava* of Nandikeśvara (Tanjore, 1957), Chp. IV, vv. 233 ff., pp. 106 ff. Kumbharāja, *Nṛtyaratnakośa*, १.३. ५-५९.
3. P.—वृत्तानुवर्त्तिते.
4. H.—सस्पदं.
5. P.—त्ववलोकिते.
6. P.—ऊर्द्ध.
7. H.—विकारसहितं
8. H.—तं वृत्तं.
9. *Saṅgītaratnākara*, 7. 454-460 describes eight *darśanas* and calls them विषयनिष्ठानि ताराकर्माणि, distinguishing them from nine स्वनिष्ठानि ताराकर्माणि described in *ibid.*, vv. 446-453,

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रवेशनं समुद्वृत्तं चलनं वलनं भ्रमः ।
निष्क्रामः प्राकृतं पातो नवमं च विवर्तनम्[1] ॥ ३५ ॥

ताराकर्मेति नवधाऽधुना तल्लक्ष्म तूच्यते ।
प्रवेशनं प्रवेशान्तः समुद्वृत्तं तु निर्गतम्[2] ॥ ३६ ॥

विलोकने च चलनं वलनं[3] तिर्यगीक्षणात् ।
भ्रमश्च जायते मोहे निःक्रामो (निष्क्रामो) बाह्यदर्शनात् ॥ ३७ ॥

मूर्खेक्षणे प्राकृतं च [4]पातोऽधोवीक्षणाद्भवेत् ।
[5]विवर्तनं समुद्वृत्तं नाश्यनृत्यानुगं च तत् ॥ ३८ ॥

इति ताराकर्मलक्षणम्[6] ॥

नवधा पुटकर्माणि विश्लेषः कुञ्चितं समं ।
प्रसृतं विवर्तितं च निमेषश्च वितालितम्[7] ॥ ३९ ॥

भ्रान्तं च स्फुरितं चैषां लक्षणं कथ्यतेऽधुना ।
विश्लेषः पुटपार्थक्यं वक्रीभूतं तु कुञ्चितम् ॥ ४० ॥

---

*op. cit.* Vol. IV, pp. 155 ff. These are—समम्, साचि, अनुवृत्तम्, अवलोकितम्, विलोकितम्, उल्लोकितम्, आलोकितम्, प्रविलोकितम्. Bharata, *Nāṭyaśāstra*, 8.105-111, *op. cit.*, Vol II., p. 15 gives the same classification. For remarks of Vipradāsa, Vema and Śāradātanaya, see, *Bharatakośa*, p. 269. Also see, *Saṅgītasamayasāra*, 6. 118-121.

1. H.— निवर्तनं.
2. P.—निर्ग्रतं.
3. P.—चलनं.
4. P.—णतो०
5. P.—निवर्त्तनं.
6. ताराकर्म of nine types is referred to by Bharata, *Nāṭyaśāstra*, 8. 96 ff, *op. cit.*, Vol. II, p. 15. *Bharatakośa*, p. 247 quotes nine ताराकर्मs from Aśoka, where निवर्तनं is given for विवर्तनं of Bharata. Also see *Nṛtyaratnakośa*, I. 3. 77-84 where it is विवर्तनं.
7. H.—विभालितं.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

समं समावलोकाच्च प्रसृतं तु प्रसारणात् ।
विवर्तितं समुद्वृत्तं निमेषस्तु निमीलनम् ॥ ४१ ॥

वितालं च भवेद्रौद्रं भ्रान्तं मोहादिसम्भवम् ।
स्फुरितं स्पन्दितं चैतन्नृत्ये नाट्ये प्रयुज्यते ॥ ४२ ॥

इति पुटकर्मलक्षणम्[1] ॥

चतुरं रेचितोत्क्षेपौ भ्रुकुटिः पातनं तथा ।
कुञ्चितं सहजं चेति भवेद् भ्रूकर्म सप्तधा ॥ ४३ ॥

चतुरं [2]त्वीषदुच्छ्वासं रेचितं ललितं[3] मनाक् ।
उत्क्षेपश्चोर्ध्वदृष्टित्वाद् भ्रुकुटिः कोपविह्वला ॥ ४४ ॥

अधोगतिः पातनं स्याद्वक्रीभूतं तु[4] कुञ्चितं ।
सहजं च स्वभावस्थं नाट्ये नृत्ये रसेषु तत् ॥ ४५ ॥

इति भ्रूकर्मलक्षणम्[5] ॥

---

1. The nine पुटकर्मs acc. to Bharata, *Nāṭyaśāstra*, 8. 110 ff. are—

उन्मेषश्च निमेषश्च प्रसृतं कुञ्चितं समम् ।
विवर्तितं प्रस्फुरितं पिहितं सविताडितम् ॥ १११.

*Nāṭyaśāstra*, Vol. II. ( G.O.S. ), p. 15.

Also see, *Saṅgītaratnākara*, 7. 440-446, *op. cit.*, Vol. IV. pp. 153-155. *Bharatakośa* p. 371 quotes Vema who reads, like Śārṅgadeva, विताडितम् for वितालितम्. MSS. of Nāṭyaśāstra give v.l. सवितालिकम् & सवितालितम् for सविताडितम् quoted from the text. Also see, *Nṛtyaratnakośa*, 1. 3. 67-68.

2. P.—त्तीषदुत्स्वासं.    3. H.—चलितं.

4. H.—च.

5. For similar types of भ्रूकर्म see, *Nāṭyaśāstra*, 8.119-128, *op. cit.*, Vol. II. pp. 16-17. The रसभावप्रयोजन of each of these seven भ्रूकर्मs is also given. Also, see, *Saṅgītaratnākara*, 7. 432-439, *op. cit.*, Vol. IV. pp. 151-153. Also, *Bharatakośa*, p. 449.

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

विकूणिता च निभृता विकृष्टा सहजा नता ।
सोच्छ्वासा[1] चेति कथिता नासिका षड्विधा बुधैः ॥ ४६ ॥

विकूणिता जुगुप्सायां निभृता निश्चला क्रमात् ।
विकृष्टा चाभ्यसूयायां प्रसन्ना सहजा मता ॥ ४७ ॥

नता श्लिष्टपुटा शोके सोच्छ्वासा[2] हर्षयोगतः ।
नृत्ये नाट्ये प्रयोक्तव्या नासिकेयं रसेष्वपि ॥ ४८ ॥

इति नासालक्षणम्[3] ॥

सन्दष्टकं निसर्गं च श्लिष्टं च परिवर्तितम्[4] ।
वेपितं चापि रोषादौ [5]पञ्चधाऽधरकर्म तु[6] ॥ ४९ ॥

इत्यधरलक्षणम्[7] ॥

कुञ्चितः कम्पितः फुल्लः क्षामः पूर्णः समस्तथा ।
कपोलः[8] षड्विधस्त्वेवं वामो वा दक्षिणोऽपि वा ॥ ५० ॥

---

1. P.—सोत्स्वसा. 2. P.—सोत्स्वासा.
3. Cf. :—नता मन्दा विकृष्टा च सोच्छ्वासाथ विकूणिता ।
स्वाभाविका चेति बुधैः षड्विधा नासिका स्मृता ॥ १३० ॥
—*Nāṭyaśāstra*, 8. 130ff., Vol. II. p. 18.
Also see, *Bharatakośa*, p. 330 quoting *Vipradāsa* and *Saṅgītaratnākara*, 7. 465-470, Vol. IV pp. 160-61.
4. H.—परिकीर्त्तितं. 5. P.—पञ्चधाधारकर्म.
6. H.—च.
7. Cf. Bharata notes six *karmas* of अधर and also explains their uses in *Nāṭyaśāstra*, 8. 141-146. They are—
विवर्तनं कम्पनं च विसर्गो विनिगूहनम् ।
संदष्टकं समुद्गं च षट् कर्माण्यधरस्य तु ॥
*Nāṭyaśāstra*, Vol. II. p. 19.
Śārṅgadeva in his *Saṅgītaratnākara*, 7. 448-495, gives two opinions, first which follows Bharata and the second which gives only four types of अधरs. Also see, *Bharatakośa*, p. 12 for quotations from Kumbha, Someśvara and Aśokamalla. 8. H.—कपोलं.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुञ्चितः शीतभीत्यादौ कम्पितो रोषभाषणे ।
फुल्लो हर्षे तु[1] रोगादौ क्षामः पूर्णसमौ सुखात् ॥ ५१ ॥

इति कपोललक्षणम्[2] ॥

लेहनं कुट्टनं दष्टं खण्डनं वु(चु)क्कितं[3] समम् ।
छिन्नं च सप्तधा कर्म चिवुकस्याथ लक्षणम् ॥ ५२ ॥

लेहनं लेह्यलेहादौ भीतत्रस्तेषु कुट्टनम् ।
दष्टं तु दन्तदष्टादौ खण्डनं रोदनादिषु ॥ ५३ ॥

[4]वु(चु)क्कितं जृम्भिकादौ च[5] स्वभावेषु समं मतम् ।
व्याधौ भयादिके[6] छिन्नं व्यवहाराश्रितं च तत् ॥ ५४ ॥

इति चिवुककर्मलक्षणम्[7] ॥

---

1. P.—च.
2. Cf.: क्षामं फुल्लं च घूर्णं च कम्पितं कुञ्चितं समम् ॥ षड्विधं गण्डमुद्दिष्टमस्य लक्षणमुच्यते । *Nāṭyaśāstra*, 8. 136-137, Vol. II. p. 19.
   One of the Mss. of Nāṭyaśāstra reads पूर्णं for घूर्णं.
   Also see, *Saṅgītaratnākara* 7. 461-465, and *Bharatakośa*, p. 107.
3. H.—कुंचितं.
4. H.—कुंचितं.
5. H.—तु.
6. P.—भयादिषु.
7. Cf. *Nāṭyaśāstra*, 8. 147-153; but *Saṅgītaratnākara*, 7, 496-502 gives कुट्टनम्, खण्डनम्, छिन्नम्, चुक्कितम्, ग्रहणम्, समम्, दष्टम् & निष्कर्षणम् among दन्तकर्मs whereas it gives the following eight varieties of चिवुक—

   जिह्वोष्ठदन्तक्रियया चिवुकं लक्ष्यते ततः ।
   उक्तप्रायं सुखार्थं तु वक्ष्ये लक्ष्मानुसारतः ॥ ५०७ ॥
   व्यादीर्णं श्वसितं वक्रं संहतं चलसंहतम् ।
   स्फुरितं वलितं लोलमेवं चिवुकमष्टधा ॥ ५०८ ॥

   *Saṅgītaratnākara*, Adyar ed.,
   Vol. IV, pp. 173 ff.

   Also cf.:—व्यादीर्णं श्वसितं वक्रं संहतं चलसंहतम् ।
   स्फुरितं चलितं लोलमेवं चिवुकमष्टधा ॥

   *Kumbha* quoted in *Bharatakośa*, p. 215.



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रसन्नं सहजं रक्तं श्यामं वक्त्रं चतुर्विधम् ।
प्रसन्नमद्भुतप्राप्तौ सहजं तु स्वभावजम् ॥ ५५ ॥
रक्तमत्युग्ररोषादौ श्यामं दुःखादिसंस्मृतौ[1] ।
एवं [2]स्वभेदयुक् शीर्षं प्रथमाङ्गं प्रकीर्तितम् ॥ ५६ ॥

इति सभेदप्रथमाङ्गशीर्षलक्षणम्[3] ॥

शिरःकर्मानुगानीति ग्रीवाकर्माणि तानि तु ।
ज्ञेयानि तद्विचारज्ञै रसे कण्ठे च[4] तानि तु ॥ ५७ ॥

इति ग्रीवाकण्ठस्कन्धलक्षणम् ॥

द्वितीयाङ्गस्य हस्तस्य संज्ञा लक्ष्माप्यथोच्यते[5] ।
हस्तकर्माणिं चारश्च क्रियाबाह्वादिहस्तकाः[6] ॥ ५८ ॥
अथ श्लेषो दोलनं च रक्षा विक्षेपधूनने[7] ।
परिग्रहाकर्षणे च [8]वियोगाच्छेदनं ध्रुवम् ॥ ५९ ॥
तर्जनं स्फोटनं यानं [9]पार्थक्यं विरतिर्भ्रमः ।
वृत्तिः प्रवृत्तिरुद्वृत्तिर्वेपनं चेति विंशतिः ॥ ६० ॥
हस्तकर्माणि चैतानि युज्यन्ते नाट्यनृत्ययोः ।
एषामन्वर्थनामत्वान्न लक्ष्म पृथगीरितम् ॥ ६१ ॥

इति हस्तकर्माणि ॥[10]

---

ज्याग्रनः quoted in *Bharatakośa*, p. 215, however, follows Bharata and our text.

1. H.—॰संस्मृतं.
2. H.—स्वभावयुक्.
3. This has been described under मुखरागप्रकरणम् in *Saṅgītaratnākara*, 7. 526-531, Vol. IV. pp. 180-181. Bharata, *Nāṭyaśāstra*, 8. 161-166, Vol. II, p. 22, gives the four types of मुखरागs.
4. P.—कंठेपि. Cf. Bharata, *Nāṭyaśāstra*, 8. 170-177, Vol. II. pp. 23-24.
5. P.—लक्ष्माद्यथो॰
6. H.—॰वह्वादिहस्तका ।
7. H.—॰विक्षपने तथा ।
8. H.—वियोगच्छेदनं
9. H.—पार्थव्यं विरति भ्रमः ।
10. The *Saṅgītaratnākara*, 7. 543-545 gives twenty करकर्मs—

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उरोगः [1]पृष्ठगश्चापि तथा पार्श्वगतोऽपि हि ।
हस्तस्य चारस्त्रिविधो नृत्ये नाट्ये प्रशस्यते ॥ ६२ ॥

इति हस्तचारः ॥[2]

---

धूननं श्लेषविश्लेषौ क्षेपो रक्षणमोचने ॥ ५४३ ॥
परिग्रहो निग्रहश्चोत्कृष्टाकृष्टिविकृष्टयः ।
ताडनं तोलनं छेदभेदौ स्फोटनमोटने ॥ ५४४ ॥
स्यादिसर्जनमाह्वानं तर्जनं चेति विंशतिः ।

*Saṅgītaratnākara*, op. cit., IV. p. 189.

Kumbha in *Nṛtyaratnakośa* gives the above verses with slight changes. Also see, *Bharatakośa*, p. 774, for a quotation from Aśokamalla. See also, *Nāṭyaśāstra*, 8. 165-168.

1. H.—पृथुगश्चापि.

2. Sudhākalaśa here follows Bharata, *Nāṭyaśāstra*, 9. 169, in so far as he accepts three basic *hastacāras*, but differs from him in giving पृष्ठग for अधोमुख. Śārṅgadeva in his Saṅgītaratnākara says that others added two more to Bharata's list, namely, अग्रग and अधस्तल, which, in Bhaṭṭa's ( Abhinavagupta's ) opinion, were included in उत्तान and अधोमुख. Śāraṅgadhara himself gives fifteen *hastacāras*—

उत्तानोऽधस्तलः पार्श्वगतो हस्तोऽग्रतस्तलः ॥ ५३४ ॥
स्वसंमुखतलश्चोर्ध्वमुखोऽधोवदनस्तथा ।
पराङ्मुखः संमुखश्च हस्तोऽन्यः पार्श्वतोमुखः ॥ ५३५ ॥
ऊर्ध्वगोऽधोगतः पार्श्वगतो हस्तोऽग्रगोऽपरः ।
संमुखागत इत्येतान्प्रचारान्दश पञ्च च ॥ ५३६ ॥
लक्ष्यलक्षणतत्त्वज्ञः शार्ङ्गदेवोऽभ्यभाषत ।

*Saṅgītaratnākara*, IV. pp. 182-183.

The Bharatakośa, p. 774, quotes *Vipradāsa* who in turn quotes Śārṅgadeva and then adds—

उत्तानोऽधः पार्श्वतलौ त्रिप्रकारा इमे कराः ॥
परे तदोर्ध्वपार्श्वाधोमुखा इति करास्तु षट् ।
अन्ये त्वग्रतलाद्या ये ऊर्ध्वगाधोगतादयः ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]व्यावर्तितोद्वेष्टिता चावेष्टिता परिवर्तिता ।
हस्तक्रिया चतुर्द्धैवं लक्ष्म नामानुसारतः ॥ ६३ ॥

इति हस्तक्रियालक्षणम् ॥[2]

प्रसारितोऽपविद्धश्चाधोमुखस्तिर्यगञ्चितौ ।
ऊर्ध्वः पृष्ठानुगः पार्श्वानुगस्तु स्थिरचञ्चलौ ॥ ६४ ॥

दशधैवं बाहुचारो लक्ष्म नामानुगं मतम् ।
हस्तकानां चतुःषष्टिरथ संज्ञादिनोच्यते ॥ ६५ ॥

इति बाहुचारलक्षणम् ॥[3]

पताकस्त्रिपताकश्च तथोक्तः कर्त्तरीमुखः ।
अर्द्धचन्द्रो ह्यरालश्च शुकतुण्डश्च मुष्टिकः ॥ ६६ ॥

शिखराख्यः कपित्थश्च तथैव खटिकामुखः ।
शू( सू )चीमुखः पद्मकोशः [4]सर्पशिरास्तथैव च ॥ ६७ ॥

मृगशीर्षश्च [5]ला( का )ङ्गूलोऽलपद्मश्चतुरस्तथा[6] ।
भ्रमरो हंसवक्त्रश्च हंसपक्षस्तथा मतः ॥ ६८ ॥

---

उत्तानादिप्रचारेषु भवन्त्यन्तर्गता इति ।
निर्णीय विप्रदासेन प्रचाराष्षड्दीरिताः ॥

भट्ट इत्यभिनवगुप्ताचार्यः स तु नाट्यशास्त्रव्याख्याने नवमेऽध्याये उत्तानशब्दार्थाख्यायां त्रैविध्यं वक्ति ।

—विप्रदासः

1. H.—व्यावर्तिता द्वेष्टिता०
2. See *Bharatakośa* p. 774, under हस्तकरणानि for a quotation from Aśoka. Also see, *Saṅgītaratnākara*, 7. 537-542, and *Nāṭyaśāstra* 9. 213-219, Vol. II. pp. 80-81.
3. For *Bāhubhedas* see, *Saṅgītaratnākara*, 7. 335-338, Vol. IV. p. 99, and *Bharatakośa* p. 419, quoting Vipradāsa and Someśvara. Someśvara refers to only eight *Bāhubhedas*, while Śārṅgadeva refers to six more given by ' others '.
4. H —सर्पशरस्तथैव०
5. P.—मृगशीर्षुचुगूलो०
6. H.—चतुरस्रथा corrected by somebody as चतुरस्तथा.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सन्दंशः सुमुखश्चोर्णनाभः पक्षिरुतस्त्विति[1] ।
[2]तेष्वसंयुतहस्तानां चतुर्विंशतिसङ्ख्यया ॥ ६९ ॥[3]

अथ लक्ष्म पताकस्य [4]साङ्गुष्ठाङ्गुल्यः समाः ।
वक्रा त्वनामिका शेषं त्रिपताकं पताकवत् ॥ ७० ॥

पृष्ठगा तर्जनी शेषं पूर्ववत्कर्त्तरीमुखे[5] ।
वक्राङ्गुल्यस्त्वर्द्धचन्द्रे गलहस्तार्द्धचन्द्रवत् ॥ ७१ ॥

अराले नम्रयाङ्गुष्ठस्तर्जन्या मिलितो भवेत् ।[6]
शुकतुण्डेऽनामिका तु वक्रा शेषमरालवत्[7] ॥ ७२ ॥

---

1. P.—॰रुतस्थिति । 2. H.—तेषु संयुत॰

3. This list of names of *asamyuta-hastas* slightly differs from those of Bharata, *Nāṭyaśāstra*, 9. 4-7 and Śārṅgadeva, *Saṅgītaratnākara*, 7. 78-61; instead of सुमुख and पक्षिरुत, we find मुकुल and ताम्रचूड in the texts of Bharata and Śārṅgadeva. Also cf.—

   त्रिंशद्दामोदरेणोक्ता अमी हस्ता असंयुताः ।
   असंयुता अर्थवशादेते स्युः संयुता अपि ॥

   —*Saṅgītanārāyaṇa* quoted in *Bharatakośa*, p. 797.

   Nandikeśvara, in his *Abhinayadarpaṇa*, vv. 89-92, (Manmohan Ghosh's second revised ed., Calcutta, 1957), p. 93, gives 28 *asamyuta-hastas*. For illustrations, see Ghosh's ed., op. cit., plates opposite p. 72.

4. P.—सांगुष्ठगुलय समाः । *Nāṭyaśāstra*, 9.18. says कुञ्चितश्च तथाङ्गुष्ठः. Saṅgītaratnākara, op. cit., follows Bharata.

5. Nandikeśvara, *op. cit.* v.:105 defines *karttarī*॰ differently—cf. त्रिपताके कनिष्ठा चेद् वक्रिताऽर्धपताकिका । × × अस्यैव चापि हस्तस्य तर्जनी च कनिष्ठिका । बहिः प्रसारिते द्वे च स करः कर्त्तरीमुखः ॥ १०५ ॥ Also cf. *Nāṭyaśāstra*, 9. 39, and *Saṅgītaratnākara*, 7. 119-121.

6. Cf.: आद्या धनुर्नता कार्या कुञ्चितोऽङ्गुष्ठकस्तथा । शेषा भिन्नोर्ध्ववलिता ह्यरालेऽङ्गुलयः करे ॥ *Nāṭyaśāstra*, 9. 46; also see *Saṅgītaratnākara*, 7. 122-123; *Abhinayadarpaṇa*, v. 114.

7. Cf.: *Abhinayadarpaṇa*, v. 115 and illustration, *op. cit.*; *Saṅgītaratnākara*, 7. 137-138; *Nāṭyaśāstra*, 9. 53.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मुष्टिकेऽङ्गुष्ठ उपरि तलन्यस्ताङ्गुलीषु च ।[1]
शिखरेऽङ्गुष्ठकस्तूर्ध्वः शेषं मुष्टिकवद्भवेत्[2] ॥ ७३ ॥

अङ्गुष्ठपार्श्वगाङ्गुल्या[3] कपित्थे पूर्ववत् परं ।
कनिष्ठानामिका चोर्ध्वे वक्रे द्वे खटिकामुखे[4] ॥ ७४ ॥

शू(सू)चीमुखे तर्जनी च सरलान्यच्च पूर्ववत्[5] ।
ईषन्नम्राः पद्मकोशेऽङ्गुष्ठेऽङ्गुलीश्च मेलयेत्[6] ॥ ७५ ॥

नम्राङ्गुल्योऽङ्गुष्ठलग्नाः सान्वर्थे सर्पशीर्षके[7] ।
मृगशीर्षे कनिष्टोर्ध्वाऽङ्गुष्ठश्चोर्ध्वोऽन्यच्च(त्) पूर्ववत्[8] ॥ ७६ ॥

काङ्गुले तर्जनीमध्याङ्गुल्यावङ्गुष्ठकेवने[9](तने) ।
आवर्तिताः करतले त्वङ्गुल्यश्चालपद्मके[10] ॥ ७७ ॥

---

1. Cf.: *Abhinayadarpaṇa*, v. 116; *Nāṭyaśāstra*, 9. 55. *Saṅgīta-ratnākara*, 7. 128-129, however specifies that 'निपीड्य मध्यमां तिष्ठत्यङ्गुष्ठो'.
2. *Saṅgītaratnākara*, 7. 130; *Nāṭyaśāstra*, 9. 57; *Abhinaya-d.*, v. 118.
3. P.—°ङ्गुल्यः. The definition here is not quite explicit though the author intends to say that the thumb and the adjoining finger touch each other. cf. *Nāṭyaśāstra*, 9. 59; *Saṅgītaratnākara* 7. 132; *Abhinaya-d* , v. 121.
4. *Nāṭyaśāstra*, 9. 60; *Saṅgīta-ra.*, 7. 134; *Abhinaya-d.*, v. 124 defines a *Kaṭakāmukha* as—कपित्थे तर्जनी चोर्ध्वमुन्निताङ्गुष्ठमध्यमा । कटकामुखहस्तोऽयं कीर्तितो भरतागमैः ।

5-6-7. See, *Abhinaya-d.*, vv. 127, 134, 137; *Saṅgīta-ra.*, 7. 147, 142, 152 ; *Nāṭyaśāstra*, 9. 64 ff., 79 ff., 84 ff.

8. H. reads अन्यत्पूर्ववत्. Cf. *Nāṭyaśāstra*, 9. 86 ff., *Saṅgīta-ra.*, 7. 159; *Abhinaya-d,*, v. 139.
9. P.—°वङ्गुष्ठगे तने । H. °वङ्गुष्ठके वने. Cf. *Nāṭyaśāstra*, 9. 88 ff.; *Abhinaya-d.*, v. 144 ; *Saṅgīta-ra.*, 7. 140.
10. *Saṅgīta-ra.*, 7. 141 calls it अलपल्लव, also *Nāṭyaśāstra*, 9. 91, *Abhinaya-d.*, v. 146, calls it अलपद्म.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

चतुरे प्रसृतास्तिस्रोऽङ्गुल्यश्चोर्ध्वा कनीयसी[1] ।
भ्रमरे मध्यमाङ्गुष्ठलग्ना नम्रा प्रदेशिनी[2] ॥ ७८ ॥

तर्जनी मध्यमाङ्गुष्ठलग्नाग्रा[3] हंसवक्त्रके ।
हंसपक्षे कनीयस्यूर्ध्वाङ्गुल्यः कुञ्चिता मनाक्[4] ॥ ७९ ॥

तर्जन्यङ्गुष्ठसन्दंशः सन्दंशे मिलिताः पराः[5] ।
अङ्गुष्ठेऽङ्गुलयोर्न( यो न )प्रसंहता मुकुले समाः[6] ॥ ८० ॥

पद्मकोशवदङ्गुल्यो नम्रास्तास्तूर्णनाभिके[7] ।
मध्यमाङ्गुष्ठसन्दंशो वक्राः पक्षिरुते पराः ॥ ८१ ॥

---

1. *Abhinaya-d.*, v. 149 describes as—तर्जन्याद्यास्तत्र श्लिष्टा कनिष्ठा प्रसृता यदि ॥ १४९ ॥ अङ्गुष्ठोऽनामिकामूले तिर्यक् चेच्चतुरः करः । *Nāṭyaśāstra*, 9.93 ff. also gives a similar definition; also cf. *Saṅgīta-ra.*, 7.154 ff.

2. *Saṅgīta-ra.*, 7.167—अङ्गुष्ठमध्यमाङ्गुल्यौ श्लिष्टाग्रे तर्जनी नता ॥ १६७ ॥ यत्रोर्ध्व-विरले शेषे स करो भ्रमरो भवेत् । Also, cf. *Abhinaya-d.*, v. 152-53—मध्यमाङ्गुष्ठसंयोगे तर्जनी वक्रिताकृतिः ॥१५२॥ शेषाः प्रसारिताश्चासौ भ्रमराभिधहस्तकः । Bharata, *op. cit.*, 9.101, writes—मध्यमाङ्गुष्ठसन्दंशो वक्रा चैव प्रदेशिनी । ऊर्ध्वमन्ये प्रकीर्णे च द्व्यङ्गुल्यौ भ्रमरे करे ॥ १०१ ॥

3. *Saṅgīta-ra.*, 7.161 ff., *Nāṭyaśāstra*, 9.104; *Abhinaya-d.*, vv. 154-155.

4. Cf. *Nāṭyaśāstra*, 9.106—समाः प्रसारितास्तिस्रस्तथा चोर्ध्वा कनीयसी । अङ्गुष्ठः कुञ्चितश्चैव हंसपक्ष इति स्मृतः ॥ १०६ ॥ Also see, *Abhinaya-d.*, vv. 157-58; *Saṅgīta-ra.*, 7.163 ff.

5. Cf.—पुनः पुनः पद्मकोशः संश्लिष्टो विरलो यदि ॥ १५९ ॥ सन्दंशाभिधहस्तोऽयं कीर्तितो नृत्यकाविदैः ॥—*Abhinaya-d.*, vv. 159-60. According to Bharata, तर्जन्यङ्गुष्ठसन्दंशस्त्वरालस्य यदा भवेत् । आभुग्नतलमध्यस्थः स सन्दंश इति स्मृतः ॥ *Nāṭyaśāstra*, 9.110 ff. Bharata further gives three types of *saṁdaṁśas*.

6. *Abhinaya-d.*, v. 161; Bharata writes-समागताग्रास्सहिता यस्याङ्गुल्यो भवन्ति हि । ऊर्ध्वा हंसमुखस्यैव स भवेन्मुकुलः करः । *Nāṭyaśāstra*, 9.117. Also see *Saṅgīta-ra.*, 7.160.

7. *Nāṭyaśāstra*, 9.120; *Saṅgīta-ra.*, 7. 173-74.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## (इति असंयुतहस्ताः ।[1])

इत्यसंयुतहस्तानां लक्ष्मोक्त्वाऽथ त्रयोदश ।
संयुताः कथयिष्यन्ते हस्ताश्च सप्तविंशतिः[2] ॥ ८२ ॥

अञ्जलिश्च कपोतश्च कर्कटः खटिकासनः[3] ।
खटिकावर्धमानश्चोत्सङ्गश्च[4] निषधस्तथा ॥ ८३ ॥

दोला (दोलः) पुष्पपुटश्चैव मकरो गजदन्तकः ।
वर्धमानः सुनन्दश्चेत्युक्ता हस्तास्त्रयोदश[5] ॥ ८४ ॥

चतुरस्रौ तथोद्वृत्तौ तथा तलमुखौ स्मृतौ ।
स्वस्तिकौ विप्रकीर्णौ चाप्यरालखटिकामुखौ ॥ ८५ ॥

---

1. Also see, Kumbhakarṇa's *Nṛtyaratnakośa*, Vol. I (Rājasthān Purātana Granthamālā, no. 24), pp. 43-52.
2. H. in margin reads—२४
   १३
   २७
   —
   ६४ हस्तक.

   The *Nāṭyaśāstra*, ch. 9, names 13 *samyuta-hastas* and 64 (32) *Nṛtta-hastas*, but the *Abhinaya-darpaṇa* gives 23 *samyuta-hastas* and 13 *Nṛtta-hastas*. Acc. to *Saṅgīta-ratnākara*, 7.90 there are 30 *Nṛtta-hastas*.
3. H.—खटिकामुखः । 4. H.—श्चोत्संगलो.
5. The *Saṅgītaranākara*, 7.82-84, read स्वस्तिक for खटिकासन, डोल for दोला, अवहित्थक for सुनन्द. Our text vv. 83-84 above are almost similar to *Nāṭyaśāstra*, 9.8-10, with the difference that the *NS*. reads स्वस्तिकस्तथा for खटिकासनः, दोलः for दोला, अवहित्थ for सुनन्द. For the list of 23 *samyuta-hastas* of Nandikeśvara, see, *Abhinaya-darpaṇa* vv. 172-175. It is surprising to find *Abhinaya-darpaṇa* stating त्रयोविंशतिरित्युक्ताः पूर्वगैर्भरतादिभिः ॥ १७५ ॥ when Bharata's *NS*., *op. cit.*, gives only 13 of them. The *Bharatarṇava*, ch. 2, pp. 28-42, gives 16 *samyuta-hastas* and 27 *asamyutahastas* in ch. 1, pp. 1-27.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ललितौ चैव शून्यास्यौ (सूच्यास्यौ)[1] रेचितावर्धरेचितौ ।
उत्तानावञ्चितौ चैव पल्लवौ सुनितम्बकौ ॥ ८६ ॥

लताख्यौ करिहस्तौ च पक्षवञ्चितकौ तथा ।
कुञ्चितौ गरुडपक्षौ दण्डपक्षौ तथैव च ॥ ८७ ॥

ऊर्ध्वमण्डलिनौ पार्श्वमण्डलिनौ तथैव च ।
उरोमण्डलिनौ चोरःपार्श्वार्धमण्डलौ तथा[2] ॥ ८८ ॥

मुष्टिकस्वस्तिकौ चैव नलिनीपद्मकोशकौ ।
[3]शीर्षानुवलितौ स्यातामुल्वणौ चेति संयुताः[4] ॥ ८९ ॥

सप्तविंशतिसङ्ख्यास्ते चैकत्र मिलिता युताः ।
चत्वारिंशत् करा जाता एषां लक्ष्माथ कथ्यते ॥ ९० ॥

पताकाकारहस्ताभ्यां श्लिष्टाभ्यामञ्जलिर्नतौ[5] ।
कपोतो मध्यसुषिरौ[6] विपरीतौ करौ यदा ॥ ९१ ॥

[7]कर्कटे च कराङ्गुल्यो भवन्त्यन्योन्यमध्यगाः ।
अरालौ मणिबन्धस्थौ हस्तौ चेत्खटिकासनः[8] ॥ ९२ ॥

---

1. P.—शून्यास्यौ.
2. H.—चारःपार्श्वार्द्धमलिनौ तथा ।
   P.—चोरः । पार्श्वार्द्धमंडलौ तथा ।
3. H.—शीर्षानुचलितौ.
4. H.—उल्वणश्चोर्वसंयुताः ॥
5. For *Añjali-hasta*, see, *Bharatakośa*, p. 8 quoting from Umā, Śārṅgadeva, Jyāyana, Someśvara and Haripāla. *Nāṭyaśāstra*, 9.128 ff.; *Abhinaya-d.*, v. 176.
6. P. and H.—मध्यशुषिरौ. For *Kapota*, compare, *Bharatakośa*, p. 107; *Nāṭyaśāstra*, 9.131; *Abhinaya-d.*, v. 177.
7. Cf. *Bharatakośa*, p. 116; *Nāṭyaśāstra*, 9.133-34; *Abhinaya-d.*, v. 178.
8. H.—खटिकासमः ॥ *Khaṭikāsana-hasta* is not mentioned by other writers. But the definition given here is similar to that of *Svastika-hasta*, compare, *Bharatakośa*, p. 759, quoting from Vipradāsa, Vema, Aśoka and Śārṅgadeva. Also cf. *Nāṭyaśāstra*, 9.135.

१४

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

खटिकावर्द्धमानश्चेत् सन्मुखौ खटिकामुखौ[1] ।
उत्सङ्गस्थौ करौ चेत् स उत्सङ्गो जिनमूर्तिगः ॥ ९३ ॥

[2]निषधोऽयं पद्मकोशतुल्यौ लग्नौ करौ तथा ।
द्वे द्वे लग्ने समेऽङ्गुल्यौ दोलाख्यः[3] समहस्तयोः ॥ ९४ ॥

जलाञ्जलौ पुष्पपुटौ[4] नम्रौ हस्तावधःस्थितौ ।
ऊर्ध्वाङ्गुष्ठौ च मकरे[5] पताकाख्यावधोमुखौ ॥ ९५ ॥

पताकौ मणिबन्धस्थौ हस्तौ चेद्गजदन्तकः[6] ।
[7]वर्द्धमाने करे स्यातां हंसपक्षौ पराङ्मुखौ ॥ ९६ ॥

[8]सुनन्दे मणिबन्धस्थौ शुकतुण्डौ करौ मतौ ।
इति त्रयोदशकरास्संयुता नाट्यनृत्ययोः ॥ ९७ ॥

(इति त्रयोदशसंयुतहस्ताः ।)

---

1. P.—संमुखौ खटिकामुखौ । H. omits खटिकामुखौ ।
For *Khaṭakāmukha-hasta* see, *Bharatakośa*, p. 159 quoting Śārṅgadeva.
2. H.—निषद्धायं. Cf. *Bharatakośa*, p. 336 quoting from Vema, Aśoka, Śārṅgadeva, and Jyāyana. Also, *Nāṭyaśāstra*, 9.141, 147.
3. Cf., *Bharatakośa*, p. 285 quoting Śārṅgadeva only on *Dola-hasta*, also *Nāṭyaśāstra*, 9.148.
4. *Nāṭyaśāstra*, 9. 150 defines it as यस्तु सर्पशिराः प्रोक्तस्तस्याङ्गुलिनिरन्तरः । द्वितीयः पार्श्वसंश्लिष्टः स तु पुष्पपुटः स्मृतः ॥ whereas *Abhinaya-d.*, v. 182 agrees more with our text. Also cf., *Bharatakośa*, p. 375 quoting Śārṅga° and Vipradāsa.
5. Cf. Śārṅga° and Vema, in *Bharatakośa*, p. 450; *Nāṭyaśāstra*, (*NŚ*.), 9. 152.
6. Cf. *NŚ*., 9. 154; Aśoka, Someśvara, Veda, Kumbha, Vipradāsa & Śārṅgadeva in *Bharatakośa*, p. 164.
7. Cf. ज्ञेयो वै वर्धमानस्तु हंसपक्षौ पराङ्मुखौ । *NŚ*., 9. 158; also, Aśoka, Śārṅgadeva and Vipradāsa in *Bharatakośa*, p. 588.
8. *NŚ*, 9. 156 describes *Avahittha* for *Sunanda*, cf., शुकतुण्डौ करौ कृत्वा वक्षस्याभिमुखाञ्चितौ । शनैरधोमुखाविद्धौ सोऽवहित्थ इति स्मृतः ॥ १५६ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वामोऽवामे [1]परो वामे चतुरस्रौ[2] करौ समौ ।
हंसवक्त्रौ समुद्वृत्तावुद्वृत्तौ[3] च तदा करौ ॥ ९८ ॥

अन्योन्यं सन्मुखीभूतौ करौ तलमुखौ[4] तदा ।
मणिबन्धे [5]भ्रमराख्यौ स्वस्तिकौ[6] स्वस्तिकाकृती ॥ ९९ ॥

पूर्वं तु स्वस्तिकौकृत्वा पर्यस्तौ चेत्प्रकीर्णकौ[7] ।
खटिकाख्योऽ[8]प्यरालश्चेदरालखटिकामुखौ[9] ॥ १०० ॥

[10]आवर्तितौ तु [11]ललितावबाङ्मुखतलौ करौ ।
मध्याङ्गुष्ठौ च शूच्याख्यौ( सूच्याख्यौ )[12] करौ कुञ्चितकूर्परौ ॥ १०१ ॥

---

1. H.—परौ.
2. Cf. वक्षसोऽष्टाङ्गुलस्थौ तु प्राङ्मुखौ खटकामुखौ । समानकूर्परांसौ तु चतुरस्रौ प्रकीर्तितौ ॥ *NŚ.*, 9. 184; also *Bharatakośa*, p. 198 for descriptions by Someśvara, Jyāyana, Aśoka and Śārṅgadeva.
3. Cf. हंसपक्षकृतौ हस्तौ व्यावृत्तौ तालवृन्तवत् । उद्वृत्ताविति विज्ञेयावथवा ताल-वृन्तकौ ॥ १८५ ॥ *NŚ.* 9. 185; also see, *Bharatakośa*, p. 78.
4. P.—तमुखौ. Cf. *NŚ.* 9. 186; *Bharatakośa*, pp. 242-43.
5. *Bhramara* is not mentioned in verses 85 ff above, but here Sudhākalaśa seems to treat *bhramara-hastas*; for *bhramara-hasta*, see, *Bharatakośa*, p. 448.
6. See, *NŚ.* 9. 188; *Bharatakośa*, p. 757.
7. Also cf. *NŚ.*, 9.187 calling them *Viprakīrṇkau*. See also, *Bharatakośa*, p. 614 on *Viprakīrṇau-hastau*.
8. H.—॰परालश्चदरालः.
9. Cf. *NŚ.*, 9. 188-190, *Bharatakośa*, p. 27. *Saṅgītaratnākara*, 7. 225-229.
10. H.—आवर्तितौ तु लिताव॰
11. Others add *āviddha-vakrau*, see *NŚ.*, 9. 190, *Bharatakośa* p. 62. *NŚ.*, 9. 209 gives *Lalitau*, also *Saṅgīta-ra.*, 7. 278-80, and *Bharatakośa*, p. 572.
12. P.—शून्याख्यौ. See *NŚ.*, 9. 191-192; *Bharatakośa*, p. 737; *Saṅgītaranākara*, 7. 232-234.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भ्रान्तौ हस्तौ हंसपक्षौ रेचितौ[1] पार्श्वविस्तृतौ ।
रेचितोद्वर्तितौ स्यातां करौ तावर्धरेचितौ[2] ॥ १०२ ॥

त्रिपताकौ कपोलस्थौ चेत्तावुत्तानवञ्चितौ[3] ।
मणिवन्धे पद्मकोशौ शिथिलौ पल्लवौ[4] करौ ॥ १०३ ॥

नितम्बे कोशबन्धाच्च करौ प्रोक्तौ नितम्बकौ[5] ।
[6]लताख्यौ त्रिपताकौ चेल्लम्बितौ भ्रामितौ ततः ॥ १०४ ॥

[7]त्रिपताकौ दोलितश्च पार्श्वस्थौ करिहस्तकौ[8] ।
यौ करौ शीर्षलग्नाग्रौ स्यातां तौ पक्षवञ्चितौ[9] ॥ १०५ ॥

[10]कुञ्चितौ तौ तु शिरसः पूर्वौ च परिवर्तितौ ।
तौ करौ गरुडपक्षौ[11] पताकौ पक्षवच्चलौ ॥ १०६ ॥

---

1. Cf. *NŚ.*, 9. 193; *Bharatakośa*, p. 559; *Saṅgītaratnākara*, 7.235-36.
2. Cf. चतुरस्रो भवेद्भ्रामः सव्यहस्तश्च रेचितः । विज्ञेयौ नृत्ततत्त्वज्ञैरर्धरेचितसंज्ञितौ ॥ १९४ ॥ *NŚ.*, 9.194, also *Saṅgītaratnākara*, 7.237; also see, *Bharatakośa*, pp. 31-32 quoting from Aśoka, Vipradāsa and Someśvara.
3. Cf. *NŚ.*, 9.195; *Bharatakośa*, p. 71 quoting Someśvara and Aśoka; *Saṅgītaratnākara*, 7.244-245.
4. H.—समौ चेत् पल्लवौ करौ. cf. मणिवन्धनमुक्तौ तु पताकौ पल्लवौ स्मृतौ । *NŚ.*, 9.196; cf. तिर्यग्वा पुरतो वापि प्रोन्नतौ नमितावपि । शिथिलौ मणिवन्धे तु पद्मकोशौ तु पल्लवौ । Someśvara quoted in *Bharatakośa*, pp. 360-361. *Saṅgītaratnākara*, 7.239-242.
5. P. reads, निवंधे केशवंधाच्च etc., H —नितंबे कोशबन्धाश्च. *NŚ.* 9. 196-197 describe, *Nitambau* and, *Keśabandhau.*, also, *Saṅgītaratnākara*, 7.238-39 and 242-43; see *Bharatakośa*, p. 331.
6. Cf. *NŚ.*, 9.198., *Bharatakośa*, p. 565 and *Saṅgīta-ra.*, 7.246-47.
7. P.— त्रिपताको.
8. P.—करहस्तकौ. Cf. *NŚ.*, 9.199. Also see, *Bharatakośa*, pp. 113-114 for quotations from Aśoka, Vipradāsa and Kumbha ; and *Saṅgītaratnākara* 7.248-254.
9. *NŚ*, 9. 200 ; *Saṅgītaratnākara*, 7. 255 ; *Bharatakośa*, p. 343.
4. *Kuñcitau-hastau* are not treated by Bharata and others. But cf. *NŚ.*, 9. 201 on *Pakṣa-pradyotakau.*
5. Cf. *NŚ.*, 9. 201., *Saṅgītaratnākara*, 7. 259-60; *Bharatakośa*, p. 168.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]दण्डपक्षौ हंसपक्षौ व्यावृत्तौ परिवर्तितौ ।
आरालावूर्ध्वदेशस्थावूर्ध्वमण्डलिनौ[2] तदा ॥ १०७ ॥

तावेवावर्तितौ पार्श्वे पार्श्वमण्डलिनौ[3] करौ ।
[4]उरोमण्डलिनौ वक्षस्यरालौ परिवर्तितौ ॥ १०८ ॥

ज्ञेयौ हस्तौ तथान्वर्थावुरःपार्श्वार्धमण्डलौ[5] ।
खटिकाख्यौ मणिबन्धे मुष्टिकस्वस्तिकौ[6] ततः ॥ १०९ ॥

पद्मकोशौ तथा स्यातां नलिनीपद्मकोशकौ[7] ।
मुष्टिकस्वस्तिकौ शीर्षे शीर्षानुवलितौ[8] मतौ ॥ ११० ॥

ऊर्ध्वदेशे प्रसृतौ तूद्वेष्टिताङ्गौ[9] तथोल्बणौ[10] ।
इत्युक्ताः संयुताः सर्वे चतुःषष्टिकरास्त्विति ॥ १११ ॥

एकस्मिहस्तकास्त्वेते हस्तेऽवाङ्मुखसम्मुखाः ।
ऊर्ध्वाधोमध्यगाः पश्चाभाभ्यां दश च तद्विदः[11] ॥ ११२ ॥

---

1. H. reads व्यावत्तो for व्यावृत्तौ. Cf. *NŚ.*, 9. 202 ; *Saṅgītaratnākara*, 7. 257-258 ; *Bharatakośa*, p. 266.
2. *NŚ.*, 9. 203 ; *Saṅgītaratnākara*, 7. 260-61 ; *Bharatakośa*, p. 87.
3. *NŚ.*, 9. 203 ; *Saṅgīta-ra.*, 7. 262-63 ; *Bharatakośa*, p. 368.
4. *NŚ.*, 9 204 ; *Saṅgīta-ra.*, 7. 264-67 ; *Bharatakośa*, p. 84.
5. H.—तथान्वर्थावुदरः पार्श्वमंडलो.
   *NŚ.*, 9. 205 ; *Saṅgīta-ra.*, 7. 267-269 ; *Bharatakośa* p. 84.
6. *NŚ.*, 9. 206 ; *Saṅgīta-ra.*, 7. 270-271; *Bharatakośa*, p. 500.
7. *NŚ.*, 9. 207., *Saṅgīta-ra.*, 272-276 ; *Bharatakośa*, p. 311.
8. H.—शीर्षानुवलिनौ. *NŚ.*, 9. 209 mentions *valitau*, cf., कूर्परस्वस्तिकगतौ लताख्यौ वलिताविति ॥ २०९ ॥ also *Saṅgīta-ra.*, 7. 281-282; *Bharatakośa*, p. 590.
9. H.—तूद्वेष्टितां तौ०
10. *NŚ* 9. 208 ; *Saṅgītaratnākara*, 7. 277-78 ; *Bharatakośa*, pp. 84-85.
11. Cf.: *Nāṭyaśāstra*, 9. 169 ( G.O.S. ed., Vol. II, p. 65 )—
    उत्तानः पार्श्वगश्चैव तथाधोमुख एव च । हस्तप्रचारस्त्रिविधो नाट्यतत्त्वसमाश्रयः ॥
    In the G.O.S. ed., p. 69, in the foot-note on *NŚ.*,

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति चतुःषष्टिहस्तकलक्षणम्[1] ॥

स्वभेदयुग्द्वितीयाङ्गमुक्त्वाङ्गानां चतुष्टयम् ।
प्रत्यङ्गभेदसंयुक्तमतो ब्रूमः क्रमादथ ॥ ११३ ॥

हृदयोदरपार्श्वाणि कटिरूरुयुगं पुनः ।
जङ्घायुगं पदाः (पदः) कर्म स्थानकानि पदो यथा[2] ॥ ११४ ॥

[3]उद्वाहितं समं चैवाभुग्नं निर्भुग्नमुन्नतम्[4] ।
वक्षः पञ्चविधं चेत्युद्वाहितं तूर्ध्वदर्शने ॥ ११५ ॥

---

9. 181 we find ड ms. giving a verse noting five *hasta-pracāras,* whereas म ms. gives a verse giving three only. On p. 71 of this ed., we find NŚ. 9. 182, giving five *hasta-pracāras,* quoted with अन्ये तु. It would, therefore, seem that the tradition of ड ms. in NŚ. 9. 181 is not original. It is also likely that NŚ. 9. 182 with अन्ये तु crept into *NŚ.* text from marginal notes at some early stage. This is further supported by a quotation from *Saṅgītanārāyaṇa* in *Bharatakośa,* p. 980.

1. About the no. 64 of the different varieties of *hastas,* cf.—
भट्टाभिनवगुप्ताद्यैरिदमभ्युपगम्यते । सर्वे च मिलिताः सन्तः सप्तषष्टिरिमे कराः ॥ ९३ ॥
चतुःषष्टित्वमेतेषां न युक्त्यागमगोचरः । चतुषष्टित्वमेवं वा तेषां सूरिभिरुह्यताम् ॥ ९४ ॥
*Saṅgīta-ra.,* 7. 93-94. *Bharatakośa,* pp. 772-773 refers to opinions of Haripāla, Vipradāsa and Śārṅgadeva in a quotation from Jyāyana, and gives lengthy citation from Bharata and Vipradāsa. According to Haripāla there are 70 *hastas,* according to Vipradāsa, there are 80. The *Bharatārṇava* of Nandikeśvara (Tanjore, 1957), Ch. III, pp. 43-62 gives 22 *Nṛttahastas.* These with 16 *samyuta-hastas* (Ch. II) and 27 *asamyutahastas* (Ch. I) make a total of 65 *hastas.* This differs from *Abhinayadarpaṇa* of Nandikeśvara which gives 28 *asamyuta-hastas,* 23 *samyuta-hastas,* and 13 *Nṛttahastas* (vv. 248-249).

2. P.—जङ्घायुगं पदाःकर्म स्थामकानि पदोर्यथा ॥
H.—जङ्घायुगं पदाकर्म स्थानकानि पदो यथा ॥

3. H.—ऊर्द्वाहतं. 4. H.—॰निर्भग्नमुन्नतम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

समं [1]स्वभावसंस्थानादाभुग्नं मूर्च्छने नतं ।
निर्भुग्नं निम्नपृष्टं स्याद्वर्धनादावुन्नतं मतम् ॥ ११६ ॥

इति हृदयलक्षणम्[2] ॥

खल्लमावर्तितं चैव क्षामं सहजमेव च ।
प्रौढं पञ्चविधं चेत्युदरं खल्लमुत्क्रुधः (मुत्क्षुधम्)[3] ॥ ११७ ॥

आवर्तितं तु [4]सान्वर्थं क्षामं हास्यादिना भवेत् ।
सहजं च स्वभावस्थं प्रौढमुच्छ्वसितं त्विति ॥ ११८ ॥

इत्युदरलक्षणम्[5] ॥

प्रसारितं चापसृतं नतं व्यावर्तितं तथा ।
समं पञ्चविधं पार्श्वमायामात्तत्[6] प्रसारितम् ॥ ११९ ॥

---

1. H.—स्वभावसंज्ञस्थानादाभुग्नं.
2. *NŚ*. 9. 223-233 defines five types of *urah*. Instead of *prakampita* of Bharata, our text gives *unnata*. Aśoka quoted in *Bharatārṇava*, p. 582 and *Saṅgītaratnākara*, 7. 296-302, follow *NŚ*.
3. H.—उत्क्रुध (? उत्क्रधः ?). Cf. *Saṅgītaratnākara*, 7. 355—निम्नं खल्लं क्षुधार्ते स्यादातुरे श्रमकर्शिते । Acc. to *NŚ*. 9. 241, नतं खल्वं. *Nāṭya-śāstra-Saṃgraha*, 516, p. 447 gives the same definition as *Saṅgītaratnākara* cited above.
4. P.—सान्वर्थं क्षामं स्यादिना. H.—सत्वार्थं क्षामं हास्यादिना.
5. Acc. to Bharata, *udara* is of three varieties, cf. क्षामं खल्वं च पूर्णं च सम्प्रोक्तमुदरं त्रिधा । *NŚ*. 9. 241. In the G.O.S. ed., *NŚ*. Vol. II. p. 85 we further read—अन्ये तु—क्षामं खल्लं समं पूर्णमुदरं स्याच्चतुर्विधम् ॥ २४३. This according to foot notes is not found in Mss. ज to म. This, again, seems to have crept into the text from marginal notes. *Saṅgītaratnākara*, 7. 354 gives क्षाम, खल्ल and पूर्ण and in v. 356 adds रिक्तपूर्ण as opinion of 'others'. Aśoka quoted in *Bharatakośa*, p. 74 gives four types including रिक्तपूर्ण.
6. H.—पार्श्वमायामानप्रसारितम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अपसृतं व्याघुटितं नश्री( श्री )भूतं नतं मतं ।
व्यावर्तितं भ्रामणाच्च समं स्यात् सहजं त्विति ॥ १२० ॥[1]

इति पार्श्वलक्षणम्[2] ॥

रेचितोद्वाहिता छिन्नोन्नता प्रोक्ता समा तथा ।
कटिः पञ्चविधा [3]चैव भ्रामणाद्रेचिता कटिः ॥ १२१ ॥

उद्वाहिता नता किञ्चित् छिन्ना मध्यस्य कर्षणात् ।
उन्नतोच्छ्वासिता[4] चोर्ध्वं स्वभावस्था समा त्विति ॥ १२२ ॥

इति कटिलक्षणम्[5] ॥

निवर्तितोद्वर्तिते च कम्पिता चलिता तथा ।
स्तम्भिता पञ्चधा चैवमूरुश्चापि प्रकीर्तिता ॥ १२३ ॥

निवर्तिताभ्यन्तरस्था भ्रामितोद्वर्तिता मता ।
कम्पिता चलिता चापि सान्वर्था स्तम्भिता स्थिरा ॥ १२४ ॥

इति ऊरुलक्षणम्[6] ॥

उद्वर्तितावर्तिता च भ्रामितोद्वाहिता नता ।
समा स्थिरा रेचिता चेत्यष्टौ जङ्घास्तु सान्वयाः ॥ १२५ ॥

इति जङ्घालक्षणम्[7] ॥

---

1. P. omits this verse.
2. *NS.* 9. 234 gives नत, समुन्नत, प्रसारित, विवर्तित and अपसृत. *Saṅgīta-ratnākara* 7. 303-304 and Aśoka quoted in *Bharatakośa*, p. 366 give similar classification.
3. P.—चैवं.
4. H.—उन्नतोच्छ्वसिता०
5. *NS.* 9. 244-249 refer to five *kaṭis*, namely, छिन्ना, निवृत्ता, रेचिता, कम्पिता, उद्वाहिता. *Saṅgītaratnākara*, 7.307 f., gives कम्पिता, उद्वाहिता, छिन्ना, विवृता, and रेचिता. Also see Aśoka in *Bharatakośa*, p. 101.
6. *NS.* 9.250-251 give similar five *uru-karmas*, namely, कम्पनं, वलनं, स्तम्भनं, उद्वर्तनं and विवर्तनं. Also see, *Saṅgītaratnākara*, 7.357-360.
7. cf.: आवर्तिता नताक्षिप्तोद्वाहिता परिवर्तिता । इति पञ्चविधा जङ्घा शार्ङ्गदेवेन कीर्तिता ॥ ३६१ ॥ निःसृता च परावृत्ता तिरश्चीना वहिर्मता । कम्पितेत्यपराः पञ्च जङ्घाः संचक्षते

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुञ्चितश्चाञ्चितश्चैव रेचितोद्घटितौ पदाः ।
नम्रस्तु कुञ्चितो मध्ये द्वितीयः सपदोऽञ्चितः ॥ १२६ ॥

यत्र भूस्पृग् भवेत् पार्ष्णिरूर्ध्वे चाग्रतले कृते ।
तिर्यक्कृतश्च सूच्यंह्रि( च्यङ्घ्रिः )र्भ्रामितो रेचितो भुवि ॥ १२७ ॥

स्थित्वा पादतलाग्रेण पार्ष्ण्या भूमिर्विघट्यते ।
उद्घाटितः स विज्ञेयस्तथैवाग्रतलेन च ॥ १२८ ॥

इति पादाः[1] ॥

ऊर्ध्वाङ्गुष्ठं तथा स्थाणु घट्टितं चार्द्धघट्टितम् ।
[2]रेचितघट्टितं चैव परिवेषं च कुण्डलम् ॥ १२९ ॥

सप्तैवं पादकर्माणि तल्लक्ष्माप्यधुनोच्यते ।
पादः पादस्य कर्माणि[3] सर्वं पार्ष्णितलाश्रयम् ॥ १३० ॥

यथा पट्टाउजे हस्ताङ्गुष्ठः कम्पयुतश्चलेत् ।
[4]ऊर्ध्वाङ्गुष्ठः पदस्तद्वदङ्गुष्ठे घृष्टभूतले ॥ १३१ ॥

[5]स्थाणुकर्मस्थिते पादे घट्टितं पार्ष्णिघट्टनात् ।
अङ्गुष्ठघट्टनात् पार्ष्णेर्घट्टनाच्चार्द्धघट्टितम् ॥ १३२ ॥

हत्वांह्रि( त्वाङ्घ्रि )मंह्रि( मङ्घ्रि )णा घट्टन् [6]तिर्यग्रेचितघट्टितम् ।
परिवेषमङ्गुलीभिः क्रियते मण्डलाकृतिः ॥ १३३ ॥

---

परे ॥ ३६२ ॥ *Saṅgītaratnākara*, 7.361-62. Also see, *NŚ*. 9.257-258. Vema quoted in *Bharatakośa*, pp. 222-223, gives ten types of जङ्घा. Someśvara and Jyāyana quoted in *Bharatakośa*, *op. cit.*, give five only but the names differ.

1. *NŚ*. 9.265-266 give उद्घट्टित, सम, अग्रतलसञ्चर, अञ्चित and कुञ्चित. *Saṅgītaratnākara*, 7.312. gives six types of चरण and in verses 313-314 adds seven more types according to 'others.' Also see, *Bharatakośa*, p. 364 for quotations from Someśvara, Jyāyana, Vipradāsa and Aśoka.
2. H.– रेचितं घट्टितं चैव.
3. H.— पादस्य कर्मादि.
4. P.—ऊर्ध्वांगुष्टपदस्तद्वद्.
5. H.—स्थास्तु.
6. P.—तिर्यग्रेरित.



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुण्डलं पार्ष्णिना स्थित्वा परितो ह्यग्रचालनात् ।
उक्त्वेति पादकर्माणि स्थानकानि तु वच्म्यथ[1] ॥ १३४ ॥

इति पादकर्मलक्षणम्[2] ॥

[3]आयतं स्थानकं पूर्वं ललितं चावहित्थकं ।
स्थानकत्रितयं चैतत् करणानां त्ववस्थितौ ॥ १३५ ॥

दक्षिणः स्यात् समः पादस्त्र्यस्रो वामस्तथायते ।
[4]शूच्या( सूच्या )विद्धमविद्धं वा करणं ललिते न्यसेत् ॥ १३६ ॥

अश्वप्लुतादिकं योज्यं स्थानके चावहित्थके ।

इति स्थानकानि[5] ॥

---

1. P.—वच्म्यहं.
2. It is shown above that the *NŚ.*, the *Saṅgītaratnākara,* etc., do not separate पाद and पादकर्म. The उद्घट्टितपाद of *NŚ.* and *Saṅgītaratnākara,* for example, is found in the list of पादकर्म in our text. Also note—पादजङ्घोरुकरणं समं कार्यं प्रयोक्तृभिः । पादस्य करणे सर्वं जङ्घोरुकृतमिष्यते ॥ *NŚ*, 9.281.
3. H.—आश्रितं. 4. P.—शूद्राविद्ध.
5. Sudhākalaśa separately treats स्थानकs and स्थानs. But Vipradāsa writes:—

निष्पद्यते स्थागतिनिवृत्ताविल्वस्मात्कृते ल्युटि ।
भावेऽयं स्थानशब्दोऽतः स्वार्थे कः प्रत्ययो भवेत् ॥

अङ्गानां यस्सन्निवेशो विशेषो निश्चलो भवेत् ।
तदुच्यते स्थानमिति भिद्यते तदपि त्रिधा ॥

ऊर्ध्वोपविष्टसुप्ताख्याविशेषणनियोजनात् ।
तत्रोर्ध्वस्थानकं मार्गदेशीभेदाद् द्विधास्थितम् ॥

स्थानकं तूपविष्टं यत्सुप्तं चैतद्द्वयोः समम् ।
स्थानं स्थितिः स्थानकमित्येते नानार्थवाचकाः ॥

—*Bharatakośa,* p. 747.

Jyāyana writes—

करणाधारभावेषु स्थानशब्दो निरुच्यते ।
भाविगत्यनुकूलेन स्थानकेन हि केनचित् ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वैष्णवं समपादं च वैशाखं मण्डलं तथा ।
प्रत्यालीढं तथालीढं षट् स्थानानि विदुर्बुधाः ॥ १३७ ॥

पादयोरन्तरं [1]सार्द्धतालयुग्मं च वैष्णवे ।
समपादे समौ पादौ तालमात्रान्तरस्थितौ ॥ १३८ ॥

वैशाखे चरणौ त्र्यस्रौ[2] सार्द्धतालत्रयान्तरौ ।
मण्डले तु कटिसमौ [3]त्र्यस्रौ तालान्तरौ पदौ ॥ १३९ ॥

दक्षिणोऽङ्घ्रिः पृष्ठनतो [4]वामोऽग्रे यदि कुञ्चितः ।
प्रत्यालीढं पञ्चतालमालीढं वैपरीत्यभृत् ॥ १४० ॥

## इति षट्स्थानलक्षणम् ॥

केचिद्गीतविदः परे च विविधान्रागान्स्वरान्जानते
केचित्सूडसुबन्धविज्ञहृदयाः केचित्प्रबन्धोद्धुराः ।
केचिद्वाद्यविवादनैकमनसः केचिच्च तालोन्नताः
ये केचिच्च परं सुनृत्यमखिलं जानन्ति [5]तज्ञां( तज्ज्ञां )स्तुमः ॥ १४१ ॥

इति मलधारिश्रीराजशेखरसूरिशिष्यवाचनाचार्यश्रीसुधाकलशविरचिते स्वोपज्ञसङ्गीतोपनिषद्ग्रन्थसारोद्धारे नृत्याङ्गोपाङ्गप्रत्यङ्गप्रकाशनो नाम पञ्चमोऽध्यायः ॥ छ ॥

---

स्थिता गच्छति गन्तापि तिष्ठेदित्यत्र कश्चन ।
प्रयोगो न विना येन तस्मादेतन्निरूप्यते ॥
शरीरस्याङ्गविन्यासविशेषो भावपोषकृत ।
नेत्रयोः सहजः कोऽपि निश्चयः स्थानमुच्यते ॥

—*Bharatakośa*, p. 747.

*Saṅgītaratnākara*, 7.1019 ff. describes six *sthānas* of males and three of females. The latter are आयत, अवहित्थ and अश्वक्रान्त. cf. also Aśoka quoted in *Bharatakośa*, p. 747. Of these, आयत and अवहित्थ are found in the list of three *sthānakas* given by Sudhakalaśa in our text, while the six of males are described by Sudhakalaśa as six *sthānas* in verses 137-140 of our text. Bharata describes six *sthānas* in *NŚ*., 10.50 ff. *Saṅgītaratnākara*, 7.1022 ff. further give 30 *deśī-sthānakas*, 9 *upaviṣṭa-sthānakas*, and 6 *supta-sthānas*.

1. H.—सार्द्धः तालयुग्यं. 2. H.—त्रिश्रौ. 3. H.—त्रिस्रो.
4. P.—वामेऽग्रे. 5. P.—तानज्ञानस्तुमः ( ? स्तुमः ).

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# षष्ठोऽध्यायः ।

नाट्यं केऽपि च ताण्डवं च कतिचिल्लास्यं च केचिद्वरं
प्रोन्मीलत्करणाङ्गहारललितं नृत्यन्ति हृष्टाः सुराः ।
प्राकारत्रितये निजस्थितिपरा वाद्यैस्तु यद्भक्तितो
ज्ञानोत्पन्नमहः स वोऽस्तु सुखदस्तीर्थङ्करः[1] सद्गिरा ॥ १ ॥

लास्याङ्गनृत्यधारीणि करणानि भवन्ति हि ।
अष्टोत्तरं शतं तेषां सङ्ख्या [2]पूर्वर्षिकीर्तिता ॥ २ ॥

सनामान्येव लक्ष्माणि करणानां समासतः ।
वक्ष्येऽहं विषमादीनां तेषामन्यच्च किञ्चन ॥ ३ ॥

यथैको जायते रागः स्वरग्रामादिभिर्घनैः ।
स्वस्वाङ्गोपाङ्गप्रत्यङ्गनृत्याङ्गैः[3] करणं तथा ॥ ४ ॥

एकैकस्मिंश्च करणे भावाँस्तान्वक्ति कस्तथा[4] ।
कीर्त्यते कार्यकर्त्र्यत्र हस्तपादादिसंस्थितिः ॥ ५ ॥

वामे पुष्पपुटः[5] पार्श्वे पादाग्रे तल(पादोऽग्रतल)संचरः ।
यत्र तत्करणं ज्ञेयं **तलपुष्पपुटाभिधम्**[6] ॥ ६ ॥

---

1. H.—विघ्नेश्वरः.
2. H.—पूर्वार्द्ध०
3. H.—नृत्याङ्गे.
4. H.—०स्तान्यक्षि कस्तथा ।
5. H.—वामे पुष्पं पुरः.
6. H.—तलपुष्पपुटाभक्रम् ॥
6. For तलपुष्पपुट करण, see, *Bharatakośa*, p. 242, quoting Bharata, Sāriṅgadeva, Jyāyana and Kumbhakarṇa.
   Cf. : वामे पुष्पपुटः पार्श्वे पादोऽग्रतलसञ्चरः ॥ ६१ ॥
   तथा च सन्नतं पार्श्वे तलपुष्पपुटं भवेत् ।
   —*Nāṭyaśāstra*, 4. 61-62 ; Vol. I ( Revised second ed., G.O. Series, Baroda ), pp. 95-96 and Plate I Fig. 1.

   For illustrations of different *karaṇas* from the Chidambaram Temple, see, *NŚ.*, Vol. I *op. cit.*

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

व्यावृत्तौ परिवृत्तौ च [1]शुकवक्त्रौ यदा करौ ।
ऊरू च वलिते यत्र करणं वलितोरु तत् ॥ ७ ॥[2]

ऊरुपृष्ठे यदावृत्य शुकतुण्डश्च[3] पात्यते ।
[4]खटिकास्यः परो यत्रापविद्धं[5] करणं च तत् ॥ ८ ॥

पादौ समनखौ श्लिष्टौ हस्तौ यत्र प्रलम्बितौ ।
निसर्गस्थं समं चाङ्गं तत् स्यात् **समनखाभिधम्**[6] ॥ ९ ॥

[7]ऊर्ध्वीकृत्य करौ यत्र हृद्देशे च कृताञ्जलिः ।
किञ्चित् प्रसारिता ग्रीवा **तल्लीनं**[8] करणं भवेत् ॥ १० ॥

ततो व्यावर्त्तितौ हस्तौ मणिबन्धोपरिस्थितौ ।
रेचितौ स्वास्तिकौ यत्र तत् स्यात् **स्वस्तिकरेचितम्**[9] ॥ ११ ॥

---

1. H.—कुकवक्त्रौ.
2. This is no. 3 of *NŚ*. Vol I. p. 97. Cf.—शुकतुण्डौ यदा हस्तौ व्यावृत्तपरिवर्तितौ ॥ ६३ ॥ ऊरू च वलितौ यस्मिन्वलितोरुकमुच्यते । *NŚ*. 4. 63-64. Also see, *Bharatakośa*, p. 590 quoting from Śārṅgadeva.
3. H.—शुकतुण्डेश्च.
4. P.—खटिकास्य.
5. No. 4 of Bharata, cf.—आवर्त्य शुकतुण्डाख्यमूरुपृष्ठे निपातयेत् ॥ ६४ ॥ वामहस्तश्च वक्षःस्थोऽप्यपविद्धं तु तद्भवेत् । *NŚ*. 4. 64-65, Vol. I. pp. 97-98. Also, *Bharatakośa*, pp. 21-22, quoting Śārṅgadeva and Jyāyana.
6. No. 5 of Bharata, cf.—श्लिष्टौ समनखौ पादौ करौ चापि प्रलम्बितौ ॥ ६५ ॥ देहः स्वाभाविको यत्र भवेत्समनखं तु तत् । *NŚ*. 4. 65-66, Vol. I. p. 98. *Bharatakośa* p. 703 quotes Bharata & Śārṅgadeva.
7. P.—उद्वीकृ करौ यत्रा.
8. No. 6 of Bharata, cf. *NŚ*. 4. 66-67, Vol. I. pp. 98-99. *Bharatakośa*, p. 573 for quotations from Śārṅgadeva and Jyāyana.
9. No. 7 of Bharata, cf. *NŚ*. 4. 67-68, Vol. I. pp. 99-100. *Bharatakośa* p. 758 quotes Vema. *Saṅgītaratnākara*, 7. 600-602.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

हस्तावूर्ध्वतलौ यत्र व्यावृत्तौ मण्डलाकृती ।
पश्चाच्च स्वस्तिकाख्यौ स्यान्मण्डलस्वस्तिकं[1] तु तत् ।। १२ ।।

[2]निकुञ्चितौ यदा पादौ करौ च यदि रेचितौ ।
रेचिता च कटी यत्र करणं तच्च रेचितम्[3] ।। १३ ।।

यत्राञ्चितौ करौ स्कन्धदेशस्थौ सम्मुखाङ्गुली ।
[4]निकुट्टितौ यदा पादौ करणं तन्निकुट्टितम्[5] ।। १४ ।।

विवर्तितौ यदा हस्तौ यत्र छिन्ना कटिर्भवेत् ।
मुहुर्मुहुश्च करणात्कटीविद्धं[6] तदुच्यते ।। १५ ।।

रेचितस्तु [7]करौ वामौ दक्षिणः खटिकामुखः ।
[8]निकुट्टितपदो नम्रं पार्श्वे तच्चार्द्धरेचितम्[9] ।। १६ ।।

मनाग् निकुञ्चितौ पादौ वक्षःस्थौ स्वस्तिकौ करौ ।
कटिश्च वलिता यत्र तद्वक्षःस्वस्तिकं[10] मतम् ।। १७ ।।

---

1. No. 8 of Bharata, *NS*. 4. 68-69, Vol. I. pp. 99-100, *Bharatakośa*, p. 453 for quotations from Śārṅgadeva, Aśoka and Jyāyana.
2. P.—निकुट्टितौ.
3. *Recita-karaṇa* is not known to *NS*. and other texts.
4. H.—निकुंचितौ
5. Cf. निकुट्टितौ यदा हस्तौ स्वबाहुशिरसोऽन्तरे । पादौ निकुट्टितौ चैव ज्ञेयं तत्तु निकुट्टकम् ॥ *NS*. 4. 69-70, Vol. I. pp. 100-101; *Bharatakośa*, p. 330 quoting Śārṅgadeva on निकुट्टकम् करणम्. Jyāyana (in *Bharatakośa*, p. 330) speaks of a निकुट्टिनं करणम्.
6. No. 11 in *NS*. 4.71-72, Vol I. pp. 102-103. Bharata calls it कटिच्छिन्नम्. Also see *Bharatakośa*, p. 101 for quotations from Śārṅgadeva and Jyāyana.
7. H.—करौ वामे. 8. H.—निकुट्टितः पदो.
9. No. 12 of Bharata. cf. अपविद्धः करः सूच्या पादश्चैव निकुट्टितः ॥ ७२ ॥ सन्नतं यत्र पार्श्वं च तद्भवेदर्धरेचितम् । *NS*. 4.72-73, Vol. I. p. 103. cf. *Bharatakośa*, p. 31 quoting Jyāyana and Sārgadeva.
10. No. 13 of Bharata, cf. स्वस्तिकौ चरणौ यत्र करौ वक्षसि रेचितौ ॥ ७३ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पार्श्वे नम्रं नता दृष्टिर्यत्र हस्तौ च रेचितौ ।
उत्प्लुत्योत्प्लुत्य गमनमुन्मत्तं[1] करणं तु तत् ॥ १८ ॥

[2]यत्र वामकरः पादौ दक्षिणाधःस्थितौ च तौ ।
स्वस्तिकाकारतां यातौ **स्वस्तिकं**[3] करणं तु तत् ॥ १९ ॥

व्यावृत्तावर्त्तितौ हस्तौ तौ पृष्ठे स्वस्तिकाकृती ।
पादौ च [4]स्वस्तिकाकारौ यत्र तत् **पृष्ठस्वस्तिकम्**[5] ॥ २० ॥

हस्तौ च चरणौ यत्र स्वस्तिकाकारधारिणौ ।
[6]वामांशे स्वस्तिकाकारात्तच्च **दिक्स्वस्तिकं** [7]मतम् ॥ २१ ॥

रेचितं चरणं कृत्वा ह्यूर्ध्वजानुपरं पदं ।
[8]दक्षिणं व्यंसितं हस्तं यत्र तच्चोर्ध्वरेचितम्[9] ॥ २२ ॥

---

निकुञ्चितं तथा वक्षो दक्षस्स्वस्तिकमेव तत् । *NŚ.*, 4.73-74, p 103; *Bharatakośa*, p. 582 for Jyāyana ; *Saṅgītaratnākara*, 7.581-582.

1. No. 14 of Bharata, *NŚ.* 4.74-75, pp. 103-104; *Bharatakośa*, p. 80 P. omits 18b. This *karaṇa* is for Jyāyana and *Lakṣmaṇa*; *Saṅgītaratnākara*, 7.599.
2. P. omits 19a. H.—पादो.
3. No. 15 of Bharata, *NŚ.* 4. 75-76, p. 104; *Bharatakośa*, p. 758 for Jyāyana and Lakṣmaṇa ; *Saṅgīta-ra.*, 7. 592-93.
4. H.—स्वस्तिकौ यत्र तन् ज्ञेयं.
5. No. 16 of Bharata, cf. विक्षिप्ताक्षिप्तबाहुभ्यां स्वस्तिकौ चरणौ यदा ॥ ७६ ॥ अपक्रान्तार्धसूचिभ्यां तत्पृष्ठस्वस्तिकं भवेत् । *NŚ.* 4. 76-77, Vol. I. pp. 104-105 ; *Bharatakośa*, p. 380 quoting Jyāyana and Lakṣmaṇa ; *Saṅgītaratnākara*, 7. 589-91.
6. H.—वामांसे स्वस्तिकाकारा तच्च. P.—वामांश॰
7. No. 17 of Bharata, *NŚ.* 4. 77-78, p. 105 ; *Bharatakośa*, p. 271 ; *Saṅgītaratnākara*, 7. 587-589.
8. P.—दक्षिणव्यंसितं.
9. There is no ऊर्ध्वरेचित in *NŚ*, and other texts, but cf. No. 18 of Bharata, called *alātakam*, अलातं चरणं कृत्वा व्यंसयेद्दक्षिणं करम् ॥ ऊर्ध्वजानुक्रमं कुर्यादलातकमिति स्मृतम् । *NŚ.* 4. 78-79, p. 105 ; for *alātam*, see also, *Saṅgīta-ra.*, 7. 615-16, and *Bharatakośa*, p. 35.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पादौ निकुट्टितौ यत्र हस्तौ वक्षःकटीगतौ ।
दक्षिणे सन्नतं [1]पार्श्वे मुखं च **तत्कटीसमम्**[2] ॥ २३ ॥

आक्षिप्य रेचितो वामो हस्तः पादस्तु दक्षिणः ।
[3]आक्षिप्य रेचितो वक्रो भवे**दाक्षिप्तरेचिते**[4] ॥ २४ ॥

[5]विक्षिप्तौ तु करौ पादौ तथाक्षिप्तौ करौ पदौ ।
यत्र स्यातां क्रमादेवं **विक्षिप्ताक्षिप्तकं**[6] च तत् ॥ २५ ॥

दक्षिणः करिहस्तः स्यात् शुकतुण्डाभिधः परः ।
कटिछि(श्छि)न्ना भवेत् किञ्चिद्यत्रा**र्द्धस्वस्तिकं**[7] तु तत् ॥ २६ ॥

करिहस्तस्तु यो हस्तो व्यावृत्यपरिवर्त्तितः ।
शेषं पूर्वानुगं लक्ष्म यत्र **स्यादञ्चितं**[8] तु तत् ॥ २७ ॥

खटिकावदनं वामं विधायोद्धृत्य कुञ्चितं ।
दक्षिणोऽधोमुखो हस्तो **भुजङ्गत्रासितं**[9] तदा ॥ २८ ॥

---

1. P.—पार्श्वे.
2. No. 19 in Bharata, cf. स्वस्तिकापसृतः पादः करौ नाभिकटिस्थितौ ॥ ७९ ॥ पार्श्वमुद्वाहितं चैव करणं तत्कटीसमम् । *NŚ.* 4. 79-80, pp. 105-106; *Bharatakośa*, p. 101 quoting Aśoka; *Saṅgīta-ra.*, 7. 610-612.
3. H.—आक्षिप्तरेचितौ वक्रौ.
4. No. 20 of Bharata, cf. हस्तौ हृदि भवेद्वामः सव्यश्चाक्षिप्तरेचितः ॥ ८० ॥ रेचितश्चापविद्धश्च तत्स्यादाक्षिप्तरेचितम् *NŚ.* 4. 80-81., pp. 106-107; *Bharatakośa*, p. 47; *Saṅgīta-ra.*, 7. 583-85.
5. H.—आक्षिप्तौ तु करौ पादौ तथाक्षिप्तौ च विक्षिप्तौ ।
6. No. 21 of Bharata, cf. विक्षिप्तं हस्तपादं च तस्यैवाक्षेपणं पुनः ॥ ८१ ॥ यत्र तत्करणं ज्ञेयं विक्षिप्ताक्षिप्तकं द्विजाः । *NŚ.* 4.81-82, p. 107; *Bharatakośa*, p. 604 quoting Jyāyana, Aśoka and Vema; *Saṅgītaratnākara*, 7.616-621.
7. No. 22 of Bharata, cf. स्वस्तिकौ चरणौ कृत्वा करिहस्तं च दक्षिणम् ॥ ८२ ॥ वक्षःस्थाने तथा वाममर्धस्वस्तिकमादिशेत् । *NŚ.* 4.82.83, pp. 107-108; *Bharatakośa*, p. 32; *Saṅgītaratnākara*, 7.585-586.
8. No. 23 of Bharata, cf. व्यावृत्तपरिवृत्तस्तु स एव तु करो यदा ॥ ८३ ॥ अञ्चितो नासिकाग्रे तु तदाञ्चितमुदाहृतम् । *NŚ.* 4.83-84, p. 108; *Bharatakośa*, p. 8; *Saṅgītaratnākara*, 7.594-595.
9. No. 24 of Bharata, cf. कुञ्चितं पादमुत्क्षिप्य त्र्यश्रमूरुं विवर्तयेत् ॥ ८४ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आकुञ्च्य दक्षिणं पादं वामोऽग्रे स्रियते नतः[1] ।
व्यावृत्यावर्तितौ हस्तावूर्ध्वजानु[2] तदा भवेत् ॥ २९ ॥
कर्त्तरीवदनौ हस्तौ पादौ किञ्चिन्निकुञ्चितौ ।
कटी नम्रा भवेद्यत्र करणं तन्निकुञ्चितम्[3] ॥ ३० ॥
घूर्णयन्तौ पदौ[4] यत्र तथान्योन्यप्रसारितौ[5] ।
व्यावृत्यावर्त्तितौ हस्तौ करणं तच्च बृंहितम्[6] ॥ ३१ ॥
श्लिष्टपार्ष्णी पदौ यत्र वामो हस्तश्च[7] रेचितः ।
[8]क्रमेणावर्त्यते सोऽपि तद्भवेद् वक्त्रमरेचितम्[9] ॥ ३२ ॥
रेचितो दक्षिणो हस्तो दक्षिणोऽङ्घ्रि(णोऽङ्घ्रि)र्निकुट्टितः ।
दोलापवर्तितौ[10] हस्तौ तद् रेचितनिकुट्टितम्[11] ॥ ३३ ॥

---

कटिजानुविवर्त्ताच्च भुजङ्गत्रासितं भवेत् । *NS.*, 4.84-85, pp. 108-109; *Saṅgītaratnākara*, 7.613-614; *Bharatakośa*, p. 441.

1. H.—ततः ।
2. No. 25 of Bharata, cf. कुञ्चितं पादमुत्क्षिप्य जानुस्तनसमं न्यसेत् ॥ ८५ ॥ प्रयोगवशगौ हस्तावूर्ध्वजानु प्रकीर्तितम् । *NS.* 4.85-86; *Bharatakośa*, p. 87; *Saṅgītartnākara*, 7.526-527.
3. No. 26 of Bharata, cf. वृश्चिकं चरणं कृत्वा करं पार्श्वे निकुञ्चयेत् ॥ ८६ ॥ नासाग्रे दक्षिणं चैव ज्ञेयं तत्तु निकुञ्चितम् । *NS.* 4. 86-87, p. 109. *Saṅgīta-ra.*, 7. 621-23; *Bharatakośa*, p. 330.
4. P. omits पदौ. 5. P.—तथान्योन्यापसारितौ ॥
6. Bṛmhitam is not known to Bharata and others, but cf. No. 27 of Bharata, वामदक्षिणपादाभ्यां घूर्णमानोपसर्पणैः ॥ ८७ ॥ उद्वेष्टितापविद्धैश्च हस्तैर्मत्तल्ल्युदाहृतम् । *NS.*, 4. 87-88; pp. 109-110; for *mattalli* also see, *Saṅgīta-ra.*, 7. 630-631; *Bharatakośa* p. 457.
7. H.—हस्तस्य. 8. H.—क्रमेण वर्तितः.
9. Not known to Bharata & others, but cf. no. 28 of Bharata, स्खलितापसृतौ पादौ वामहस्तश्च रेचितः ॥ ८८ ॥ सव्यहस्तः कटिस्थः स्यादर्धमत्तल्लि तत्स्मृतम् । *NS.*, 4. 88-89, pp. 109-110; for *ardhamattalli*, also see, *Saṅgīta-ra.*, 7. 631-632; *Bharatakośa*, p. 31.
10. H.—दोलापवर्तितौ.
11. No. 29 of Bharata, cf. रेचितो दक्षिणो हस्तः पादः सव्यो निकुट्टितः ॥ ८९ ॥ दोला चैव भवेद्वामस्तद्रेचितनिकुट्टितम् । *NS.* 4. 89-90, p. 110; *Bharatakośa*, p. 559; *Saṅgīta-ra.*, 7. 633.



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कर्त्तरीवदनौ हस्तौ नाभिदेशे च संस्थितौ ।
[1]शू(सू)चीविद्धावपक्रान्तावंह्नी(वङ्घ्री) पादापविद्धके[2] ॥ ३४ ॥

वदनं [3]ललितं चैव त्रिकं च वलितं तथा ।
शू(सू)चीमुखो भवेद् हस्तो यत्र तद् वलितं [4]मतम् ॥ ३५ ॥

घूर्णितो दक्षिणो हस्तो घूर्णितं च तथा शिरः ।
घूर्णयन्तौ पदौ यत्र नम्रौ तद् घूर्णितं[5] मतम् ॥ ३६ ॥

यदा [6]विवर्त्तितौ हस्तौ वामस्तु खटिकामुखः ।
सर्वाङ्गं ललितं यत्र करणं ललितं[7] तु तत् ॥ ३७ ॥

ऊर्ध्वजानु [8]पुरः कृत्वा न्यसेत् [9]तत्र लताकरं ।
किञ्चिन्नम्रे[10] द्वितीयांह्नी(याङ्घ्री) [11]दण्डपक्षाभिधं तु तत् ॥ ३८ ॥

---

1. P.—शूचीविद्धापविद्धौ तावंह्नी.
2. Cf. No. 30 of Bharata, कार्यौ नाभीतटे हस्तौ प्राङ्मुखौ खटकामुखौ ॥ ९० ॥ सूचीविद्धावपक्रान्तौ पादौ पादापविद्धके । *NŚ.* 4. 90-91, pp. 110-111, *Bharatakośa*, p. 365, *Saṅgīta-ra.*, 7. 638-39.
3. P.—वलितं.
4. No. 31 of Bharata, cf. अपविद्धो भवेद्धस्तः सूचीपादस्तथैव च ॥ ९१ ॥ तथा त्रिकं विवृत्तं च वलितं नाम तद्भवेत् । *NŚ.* 4.91-92, p. 111; *Bharatakośa*, p. 590; *Saṅgītaratnākara*, 7.635-36.
5. No. 32 of Bharata, cf. *NŚ.* 4.92-93, p. 111; *Saṅgītaratnākara*, 7.624-625; *Bharatakośa*, p. 193.
6. P.—विवर्त्तितौ. H.—निवर्त्तितौ.
7. No. 33 of Bharata, cf. करिहस्तो भवेद्वामो दक्षिणश्च विवर्तितः ॥ ९३ ॥ बहुशः कुट्टितः पादो ज्ञेयं तल्ललितं बुधैः । *NŚ.* 4.93-94, pp. 111-112; *Bharatakośa*, pp. 567-68; *Saṅgītaratnākara*, 7.634.
8. P.—पुरा. 9. H.—तत्रलिताकरं.
10. H.—किंचिन्नम्रौ.
11. No. 34 of Bharata, cf. ऊर्ध्वजानुं विधायाथ तस्योपरि लतां न्यसेत् ॥ ९४ ॥ दण्डपक्षं तु तत्प्रोक्तं करणं नृत्तवेदिभिः । *NŚ.* 4.94-95, p. 112; *Bharatakośa*, p. 266; *Saṅgītaratnākara*, 7.636-37.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भुजङ्गत्रासितं कृत्वा वामपार्श्वस्थितौ करौ।
रेचितौ वर्त्तितोद्वृत्तौ **भुजङ्गत्रस्तरेचिते**[1] ॥ ३९ ॥

कटिनम्रा नता ग्रीवा भवेद्धस्तौ लताभिधौ[2]।
त्रिकं च [3]वलितं पादौ नूपुरौ[4] **नूपुराभिधे**[5] ॥ ४० ॥

अरालौ रेचितौ हस्तौ व्यावृत्तौ[6] परिवर्तितौ।
वैशाखं स्थानकं यत्र तत् **स्याद्वैशाखरेचितम्**[7] ॥ ४१ ॥

रेचितोद्वर्तितौ हस्तौ[8] वामस्तु वलिता कटी।
पादौ च स्वस्तिकौ यत्र **तद्भवेद्भ्रमराभिधम्**[9] ॥ ४२ ॥

नाभीदेशे करौ यत्राञ्चितश्च खटिकामुखः।
व्यावृत्य स्थानमानीता **कटिस्तच्चतुराह्वयम्**[10] ॥ ४३ ॥

---

1. No. 35 of Bharata, cf. भुजङ्गत्रासितं कृत्वा यत्रोभावपि रेचितौ ॥ ९५ ॥ वामपार्श्वस्थितौ हस्तौ भुजङ्गत्रस्तरेचितम्। *NŚ.* 4.95-96, p. 112; *Bharatakośa*, p. 440; *Saṅgītaratnākara*, 7.644.
2. P.—भवेद्हस्तो लताभिधः। 3. H.—वलितौ.
4. P.—नूपुरो.
5. H.—नूपुराभिधः ॥ No. 36 of Bharata, cf. त्रिकं सुवलितं कृत्वा लता-रेचितकौ करौ ॥ ९६ ॥ नूपुरश्च तथा पादः करणे नूपुरे न्यसेत्। *NŚ.* 4. 96-97, pp. 112-113; *Bharatakośa*, p. 340; *Saṅgītaratnākara*, 7. 639-40.
6. H.—व्यावर्त्तौ.
7. No. 37 of Bharata, cf. रेचितौ हस्तपादौ च कटी ग्रीवा च रेचिता ॥ ९७ ॥ वैशाखस्थानकेनैतद्भवेद्वैशाखरेचितम्। *NŚ.* 4. 97-98, p. 113; *Bharatakośa*, p. 645; *Saṅgītaratnākara*, 7. 657-658.
8. H.—रेचितोद्वर्तितौ हस्तौ.
9. Cf. No. 38 of Bharata, आक्षिप्तः स्वस्तिकः पादः करौ चोद्वेष्टितौ तथा ॥ ९८ ॥ त्रिकस्य वलनाच्चैव ज्ञेयं भ्रमरकं तु तत्। *NŚ.* 4. 98-99; *Bharatakośa*, p. 447; *Saṅgītaratnākara*, 7. 641-642.
10. Cf. No. 39 of Bharata, अञ्चितः स्यात्करो वामः सव्यश्चतुर एव तु ॥ ९९ ॥ दक्षिणः कुट्टितः पादश्चतुरं तत्प्रकीर्तितम्। *NŚ.* 4. 99-100; pp. 113-114; *Bharatakośa*, p. 196; *Saṅgītaratnākara*, 7. 648-49.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वामो लताकरो यत्र नितम्बे त्वञ्चितः परः[1] ।
भुजङ्गत्रासिते न्यासो भुजङ्गाञ्चितकं[2] हि तत् ॥ ४४ ॥

[3]दण्डवद्रेचिते यत्र हस्तपादौ च तूर्ध्वगौ ।
द्वितीयौ सरलौ स्यातां तद्भवेद् दण्डरेचितम्[4] ॥ ४५ ॥

दक्षिणो वृश्चिकः[5] पादः स्वभावस्थः परः पदः ।
निकुट्टितौ करौ यत्र तद् वृश्चिकनिकुट्टितम्[6] ॥ ४६ ॥

[7]निकुट्टितौ यत्र पदौ हस्तौ चैव लताभिधौ ।
कटिर्भ्रमणशीला च तदुक्तं कटिरेचितम्[8] ॥ ४७ ॥

वामो हस्तस्तथा पादो[9] वृश्चिकाकारधारिणौ ।
दक्षिणः स्याल्लताहस्तस्तद्[10] लतावृश्चिकं[11] तदा ॥ ४८ ॥

---

1. H.—नितम्बे त्वंचितं करः.
2. No. 40 of Bharata, cf. भुजङ्गत्रासितः पादो दक्षिणो रेचितः करः ॥ १०० ॥ लताख्यश्च करो वामो भुजङ्गाञ्चितकं भवेत् । *NŚ.* 4. 100-101 ; *Bharatakośa*, p. 441, *Saṅgītaratnākara*, 7. 645-646.
3. P.—दण्डवद्रेचयते यत्र हस्तपादोऽपि चोर्ध्वगौ ।
4. No. 41 of Bharata, cf. *NŚ.* 4.101-102, pp. 114-115; *Bharatakośa*, p. 267 ; *Saṅgītaratnākara*, 7.646-647.
5. H. reads वृश्चक everywhere for वृश्चिक.
6. Called *Vṛścikakuṭṭitam* by Bharata, cf. No. 42 of *NŚ.* 4.102-103, p. 115 ; *Saṅgītaratnākara*, 7.660-661 ; *Bharatakośa*, p. 634.
7. P.—निकुतौ.
8. cf. *Kaṭibhrāntam*, no. 43 of Bharata, सूचीं कृत्वापविद्धं च दक्षिणं चरणं न्यसेत् ॥ १०३ ॥ रेचिता च कटिर्यत्र कटिभ्रान्तं तदुच्यते । *NŚ.* 4.103-104, pp. 115-116 ; *Saṅgītaratnākara*, 7.649-652; *Bharatakośa*, p. 101.
9. H.—पादौ वृश्चकाकारिणौ यदा ।
10. P. omits तद्.
11. cf. no. 44 of Bharata, अञ्चितः पृष्ठतः पादः कुञ्चितोर्ध्वतलाङ्गुलिः ॥ १०४ ॥ लताख्यश्च करो वामस्तल्लतावृश्चिकं भवेत् । *NŚ.* 4.104-105, pp. 115-116; *Bharatakośa*, p. 565 ; *Saṅgītaratnākara*, 7.662-663.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

त्रिपताकौ यदा हस्तौ व्यावृत्तौ परिवर्तितौ[1] ।
वैशाखस्थानकच्छिन्ना कटी स्यात् **छिन्नकं**[2] तदा ॥ ४९ ॥

वृश्चिको दक्षिण: पादो रेचितो दक्षिण: कर: ।
किञ्चिन्नम्रा कटिर्यत्र तत्स्याद् **वृश्चिकरेचितम्**[3] ॥ ५० ॥

[4]स्यातामंसाञ्चितौ हस्तौ व्यावृत्तपरिवर्तितौ ।
निकुट्टितौ पदौ यत्र**ांसाञ्चितं**[5] करणं मतम् ॥ ५१ ॥

॥ पाठान्तरम्[6] ॥

उर:स्थौ रेचितौ हस्तावूर्ध्वाधो विप्रकीर्णितौ ।
आलीढं स्थानकं यत्र **वक्षोरेचितकं**[7] तु तत् ॥ ५२ ॥

किञ्चिन्नम्रस्तु वामोऽङ्घ्रि( मोऽङ्घ्रि )र्दक्षिणस्तु निकुट्टित: ।
[8]वामांसोपरि सन्न्यस्तं मुखं **पार्श्वनिकुट्टितं**[9] ॥ ५३ ॥

---

1. P. omits परिवर्तितौ.
2. No. 45 of Bharata, cf. अलपद्म: कटिदेशे छिन्ना पर्यायश: कटी ॥ १०५ ॥ वैशाखस्थानकेनेह तच्छिन्नं करणं भवेत् । *NS.* 4.105-106, p. 116; *Bharatakośa*, p. 221; *Saṅgītaratnākara*, 7.643-644.
3. cf. No. 46 of Bharata, वृश्चिकं चरणं कृत्वा स्वस्तिकौ च करावुभौ ॥ १०६ ॥ रेचितौ विप्रकीर्णौ च करौ वृश्चिकरेचितम् । *NS.* 4.106-107, p. 116; *Saṅgītaratnākara*, 7.661-662; *Bharatakośa*, p. 634.
4. P. reads स्यातामंशांचितौ and यत्रांशांचितं in this verse.
5. cf. *Vṛścika*, no. 47 of Bharata, बाहुशीर्षाञ्चितौ हस्तौ पाद: पृष्ठाञ्चितस्तथा ॥ १०७ ॥ दूरसन्नतपृष्ठं च वृश्चिकं तत्प्रकीर्तितम् । *NS.* 4 107-108, pp. 116-117; *Saṅgītaratnākara*, 7.658-659; *Bharatakośa*, p 634.
6. Both P. and H. read this but the पाठान्तर is not quoted, and it does not appear that अंशाञ्चितं is given as an optional *karaṇa* for वृश्चिकरेचितम्. Probably there was a verse defining वृश्चिक which is dropped in both P. and H.
7. cf. no. 48 of Bharata, आलीढं स्थानकं यत्र करौ वक्षसि रेचितौ ॥ १०८ ॥ ऊर्ध्वाधोविप्रकीर्णौ च व्यंसितं करणं तु तत् । *NS.* 4.108-109, p. 117; *Saṅgītaratnākara*, 7.652-654; *Bharatakośa*, p. 646.
8. P.—वामांशोपरि. 9 H.—पार्श्वनिकुट्टितम् ॥
cf. No. 49 of Bharata, हस्तौ तु स्वस्तिकौ पार्श्वे तथा पादौ निकुट्टित: ॥१०९॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ऊर्ध्वाधः संस्थितौ हस्तौ व्यावृत्तौ परिवर्त्तितौ ।
आललाटं पदो वामो ललाटतिलके[1] भवेत् ॥ ५४ ॥

व्यावृत्य कर्त्तरीवक्त्रौ( वक्रौ ) हस्तौ पार्श्वं तथा नतम् ।
यत्र स्याद्रेचितः पादस्तत् क्रान्तं[2] करणं मतम् ॥ ५५ ॥

भूलग्नं दक्षिणं कृत्वा कुञ्चितोऽन्यः पदो यदा ।
किञ्चिच्च कुञ्चितौ हस्तौ यत्र तत् [3]कुञ्चितं भवेत् ॥ ५६ ॥

ऊरुदेशे करौ ज्ञेयौ[4] दक्षिणश्च करोऽञ्चितः[5] ।
चक्राकारभ्रमो यत्र ज्ञेयं तच्चक्रमण्डलम्[6] ॥ ५७ ॥

---

यत्र तत्करणं ज्ञेयं बुधैः पार्श्वनिकुट्टितम् । *NŚ*. 4.109-110; pp. 117-118; *Bharatakośa*, p. 367; *Saṅgītaratnākara*, 7.669-670.

1. cf. No. 50 of Bharata, *NŚ*. 4.110-111; p. 118; *Bharatakośa*, p. 567; *Saṅgītaratnākara*, 7.668-669.

2. Cf. No. 51 of Bharata, पृष्ठतः कुञ्चितं कृत्वा व्यतिक्रान्तक्रमं ततः ॥ १११ ॥ आक्षिप्तौ च करौ कार्यौ क्रान्तके करणे द्विजाः । *NŚ*. 4. 111-112, p. 118; *Bharatakośa*, p. 155; *Saṅgītaratnākara*, 7. 655-657.

3. Cf. no. 52 of Bharata, आद्य पादो नतः कार्यः सव्यहस्तश्च कुञ्चितः ॥ ११२ ॥ उत्तानो वामपार्श्वस्थस्तत्कुञ्चितमुदाहृतम् । *NŚ*. 4 112-113, pp. 118-119; *Bharatakośa*, p. 138; *Saṅgītaratnākara*, 7. 674-675.

4. P.—करो ज्ञेयौ.     5. P.—परोऽञ्चितः.

6. The *Cakramaṇḍalam*, no. 53, of Bharata is different, cf. प्रलम्बिताभ्यां बाहुभ्यां यद्गात्रेणानतेन च ॥ ११३ ॥ अभ्यन्तरापविद्धः स्यात्तज्ज्ञेयं चक्रमण्डलम् । *NŚ*. 4. 113-114, p. 119; also it is different from *cakramaṇḍalam* of *Saṅgītaratnākara*, 7. 671-72 and of Jyāyana quoted in *Bharatakośa*, p. 195. It is comparable to *uromaṇḍalika*, no. 54 of Bharata, though possibly not identical with it, cf. स्वस्तिकापसृतौ पादावपविद्धक्रमौ यदा ॥ ११४ ॥ उरोमण्डलकौ हस्तावुरोमण्डलिकन्तु तत् । *NŚ*. 4. 114-115, p. 119; cf., चार्यौ बद्धस्थितावर्ते उरोमण्डलिनौ करौ ॥ ६७२ ॥ यत्रोरोमण्डलं तत्तु शिवबल्लभभाषितम् । *Saṅgītaratnākara*, 7. 672-673; for Jyāyana, see, *Bharatakośa*, p. 84.

P. P. Ac. Gunratnasuri M.S.     Jin Gun Aaradhak Trust

नितम्बे कुञ्चितौ हस्तौ स्वस्तिकापसृतौ पदौ ।
नम्रं च दक्षिणं पार्श्वं नितम्बस्वस्तिकं[1] च तत् ॥ ५८ ॥

[2]आक्षिप्तसंज्ञकौ हस्तौ पादौ चाक्षिप्तरेचितौ ।
दृष्टिर्नता नतं पार्श्वं यत्राक्षिप्तं[3] तदुच्यते । ५९ ॥

आवर्तितौ पताकाख्यौ तावेव हि कृताञ्जली ।
अंह्रि( अङ्घ्रि )रूर्ध्वाङ्गुलितलश्चैतत्[4] तलविलासितम्[5] ॥ ६० ॥

सार्धतालद्वयं पद्भ्यामन्तरं यत्र जायते ।
हस्तावप्यन्तरं [6]धत्तस्तादृशं चार्गलं[7] तु तत् ॥ ६१ ॥

वृश्चिकश्चरणो वामो यत्र वामो लताकरः ।
विक्षिप्तं [8]च मुखं पार्श्वं विक्षिप्तं[9] करणं तु तत् ॥ ६२ ॥

---

1. There is no such karaṇa in *NS.*, and the *nitambam,* no. 85 of Bharata, *NS.*, 4. 145-146, p. 130, or of Jyāyana, *Bharatakośa* p. 331, and *Saṅgītaratnākara,* 7. 714-715 seem to be different.
2. P.—आक्षिप्तपंकजौ.
3. Cf. no. 55 of Bharata, आक्षिप्तं हस्तपादं च क्रियते यत्र वेगतः ॥ ११५ ॥ आक्षिप्तं नाम करणं विज्ञेयं तद् द्विजोत्तमाः । *NS* 4. 115-116, pp. 119-120; *Saṅgītaratnākara,* 7. 663-664 ; *Bharatakośa,* p. 47.
4. P.—अंह्रिरूर्ध्वांगुलितश्चेत् तत्.
5. Cf. no. 56 of Bharata, ऊर्ध्वाङ्गुलितलः पादः पार्श्वेनोर्ध्वं प्रसारितः ॥ १२६ ॥ प्रकुर्यादञ्चिततलौ हस्तौ तलविलासिते । *NS.*, 4. 126-127, p. 120; *Saṅgītaratnākara.* 7. 667-668 ; *Bharatakośa* p. 243.
6. H.—धत्ते तादृशं चाग्रलातु तत् ॥
7. Cf. no. 57 of Bharata, पृष्ठतः प्रसृतः पादो द्वौ तालावर्धमेव च ॥ ११७ ॥ तस्यैव चानुगो हस्तः पुरतस्त्वर्गलं तु तत् । *NS.*, 4. 117-118, pp. 120-121 ; cf. also, *Saṅgītaratnākara,* 7. 664-665 ; *Bharatakośa,* pp. 27-28.
8. P.—तु.
9. Cf. no. 58 of Bharata, विक्षिप्तं हस्तपादं च पृष्ठतः पार्श्वतोऽपि वा ॥ ११८ ॥ एकमार्गगतं यत्र तद्विक्षिप्तमुदाहृतम् । *NS.*, 4. 118-119, p. 121 ; *Bharatakośa*, p. 604 ; *Saṅgītaratnākara,* 7. 686-687.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रलम्बितौ करौ यत्र दक्षिणश्चरणः पुरः ।
प्रसार्यावर्तयेत् शीघ्रं तदा [1]वर्तितमुच्यते ॥ ६३ ॥

पादौ च दोलयेद्यत्र कुञ्चितानन्तरं बुधः[2] ।
करौ बाह्यतलौ कुर्याद् दोलापादे[3] प्रलम्बितौ ॥ ६४ ॥

रेचितौ च करौ यत्र [4]पार्श्वं चैव विवर्तितम्[5] ।
वामो निवर्तितोऽह्रि(तोऽङ्घ्रि)स्तत् करणं विनिवृत्तकम्[6] ॥ ६५ ॥

पादौ तु स्वस्तिकाकारौ कृत्वा भ्रान्त्वा निवर्तितौ ।
हस्तावपि तथैवात्र [7]निवृत्ते करणे पुनः ॥ ६६ ॥

पार्श्वक्रान्तं पदं कृत्वा पुरतो यत्र मुच्यते ।
विवर्तितौ [8]तथा हस्तौ पार्श्वक्रान्तं[9] तदुच्यते ॥ ६७ ॥

---

1. Bharata defines an *āvartam-karaṇam,* as no. 59, cf. प्रसार्य कुञ्चितं पादं पुनरावर्तयेद् द्रुतम् ॥ ११९ ॥ प्रयोगवशगौ हस्तौ तदावर्तमुदाहृतम् । *NŚ.* 4. 119-120, p. 121 ; for *āvartam,* also see, Jyāyana quoted in *Bharatakośa,* p. 61. Bharata defines *vartitam,* no. 2, as follows—कुञ्चितौ मणिबन्धे तु व्यावृत्तपरिवर्तितौ ॥ ६२ ॥ हस्तौ निपतितौ चोर्वोर्वर्तितं करणं तु तत् । *NŚ.* 4. 62-63, pp. 96-97 ; see also *Bharatakośa,* p. 587 and *Saṅgītaratnākara,* 7. 573-575 for *vartitam.*
2. H.—कुञ्चितानन्तरावधः ।
3. Cf. no. 60 of Bharata, कुञ्चितं पादमुत्क्षिप्य पार्श्वात्पार्श्वं तु डोलयेत् ॥ १२० ॥ प्रयोगवशगौ हस्तौ डोलापादं तदुच्यते । *NŚ.* 4. 120-121, pp. 121-122 ; *Bharatakośa,* p. 237 ; *Saṅgītaratnākara,* 7. 676.
4. H.—पार्श्वे.
5. P.—वर्तितम्.
6. Cf. no. 62 of Bharata, सूचीविद्धं विधायाथ त्रिकं तु विनिवर्तयेत् ॥ १२२ ॥ करौ च रेचितौ कार्यौ विनिवृत्ते द्विजोत्तमाः । *NŚ.* 4. 122-123, pp. 122-123 ; *Bharatakośa,* p. 612 ; *Saṅgītaratnākara,* 7. 678-679.
7. H.—निवृत्तकरणं.
Cf. no. 61 of Bharata, आक्षिप्तं हस्तपादं च त्रिकं चैव विवर्तयेत् ( v. l. च परिवर्तयेत् ॥ १२१ ॥ रेचितौ च तथा हस्तौ विवृत्ते ( v. l. निवृत्ते ) करणे द्विजाः । *NŚ.* 4. 121-122, p. 122 ; *Bharatakośa,* on *nivṛttam-karaṇam,* p. 335 ; *Saṅgītaratnākara* 7. 677-678 calls it *vivṛttam.*
8. P. omits तथा.
9. No. 63 of Bharata, cf., पार्श्वक्रान्तक्रमं कृत्वा पुरस्तादथ पातयेत् ॥ १२३ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ललाटे स्यात्करो[1] यत्र पृष्ठेऽङ्घ्रिः(ष्ठेऽङ्घ्रिः) कुञ्चितो भवेत् ।
अङ्गं नम्रं कटिर्नम्रा यत्र तत्पृष्ठकुञ्चितम्[2] ॥ ६८ ॥

पृष्ठतो वलितं शीर्षं तथा पादोऽपि दक्षिणः ।
ऊर्ध्वाधः कुञ्चितौ हस्तौ तत् शीर्षवलितं[3] मतम् ॥ ६९ ॥

कृत्वा पादमतिक्रान्तं [4]पुरो यत्र प्रसार्यते ।
वामहस्तो मुखाग्रे स्याद् अतिक्रान्तं[5] तु तत्पुनः ॥ ७० ॥

वामो लताकरो[6] यत्र दक्षिणः[7] पार्श्वगः करः ।
[8]विवर्तितं त्रिकं पादावाक्षिप्तौ तद् विवर्तितम्[9] ॥ ७१ ॥

---

प्रयोगवशगौ हस्तौ पार्श्वक्रान्तं तदुच्यते । *NŚ*. 4.123-124, p. 123; *Bharatakośa*, p. 366; *Saṅgītaratnākara*, 7.680-681.

1. H.—करौ.
2. cf. no. 64 of Bharata, पृष्ठतः कुञ्चितः पादो वक्षश्चैव समुन्नतम् ॥ १२४ ॥ तिलके च करः स्थाप्यस्तन्निस्तम्भितमुच्यते । *NŚ*. 4.124-125; p. 123.

   There is no *pṛṣṭhakuñcita* known to Bharata, but *nistambhita* of Bharata and *niśumbhita* of others cited here may be compared, see, *Bharatakośa*, p. 335 quoting Jyāyana, and *Saṅgītaratnākara*, 7.682-683.
3. Though *śīrṣavalitam* is not known to other texts, it is very similar to *Vidyutbhrāntam*, no. 65 of Bharata, cf., पृष्ठतो वलितं पादं शिरोघृष्टं प्रसारयेत् ॥ १२५ ॥ सर्वतो मण्डलाविद्धं विद्युद्भ्रान्तं तदुच्यते । *NŚ*. 4.125-126, pp. 123-124; *Bharatakośa*, p. 610, *Saṅgītaratnākara*, 7.684-685.
4. P.—पुरतो.
5. Cf. no. 66 of Bharata, अतिक्रान्तक्रमं कृत्वा पुरस्तात्संप्रसारयेत् ॥ १२६ ॥ प्रयोगवशगौ हस्तावतिक्रान्ते प्रकीर्तितौ । *NŚ*. 4.126-127, p. 124; but cf. *Bharatakośa*, p. 10 quoting Jyāyana; *Saṅgītaratnākara*, 7.685-686.
6. P.—लताकरौ.
7. P.—यदिक्षः
8. P. omits our verse 72b and 73[a]. P. has no. 53 twice and hence from 53 onwards the numbering in P. is wrong, thus our v. 72 is no. 71 in P.
9. Cf. no. 67 of Bharata, आक्षिप्तं हस्तपादं च त्रिकं चैव विवर्तितम् ॥ १२७ ॥ द्वितीयो रेचितो हस्तो विवर्तितकमेव तत् । *NŚ*. 4.127-128, p. 124; *Bharatakośa*, p. 619; *Saṅgītaratnākara*, 7.688-689.



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पृष्ठतः पुरतो न्यस्य दक्षिणांह्रि( णाङ्घ्रि )र्यदा करः ।
वामोंऽह्रि( मोऽङ्घ्रि )र्यः परश्चोर्ध्वस्तद् **गजक्रीडितं**[1] तदा ॥ ७२ ॥

तलसंस्फोटितौ हस्तौ पादौ [2]भूपीठघातकौ ।
भ्रमणं च चतुर्दिक्षु **तलसंस्फोटितं**[3] तु तत् ॥ ७३ ॥

अग्रतश्चरणं न्यस्य दक्षिणश्च नतः परः[4] ।
अञ्चितश्च करो गण्डे[5] **गण्डसूचीति**[6] तद्विदुः ॥ ७४ ॥

भ्रान्ता कटी पदौ भ्रान्तौ त्रिकं च परिवर्तितम् ।
अञ्चितौ च करौ यत्र तदुक्तं **परिवृत्तकम्**[7] ॥ ७५ ॥

जानूपरि पदो वामः समः स्याद्दक्षिणः पदः ।
पार्श्वे च सन्नतौ हस्तौ यत्र तत् **पार्श्वजानुकम्**[8] ॥ ७६ ॥

---

1. Cf. no. 68 of Bharata, कर्णेऽञ्चितः करो वामो लताहस्तश्च दक्षिणः ॥ १२८ ॥ दोलापादस्तथा चैव गजक्रीडितकं भवेत् । *NŚ.* 4.128-129, p. 124; *Bharatakośa*, p. 164; *Saṅgītaratnākara*, 7.689-690.
2. H.—तौ पीठघातकौ.
3. Cf. no. 69 of Bharata, where only one foot is moved, our text thus differs slightly from *NŚ*, 4. 129-130, pp. 124-125; *Bharatakośa*, p. 243; *Saṅgītaratnākara*, 7. 694-695.
4. H.—ततः परम् ।
5. P.—गल्ले.
6. Cf. no. 71 of Bharata, सूचीपादो नतं पार्श्वमेको वक्षःस्थितः करः ॥ १३१ ॥ द्वितीयश्चाञ्चितो गण्डे गण्डसूची तदुच्यते । *NŚ.* 4. 131-132, also see comm. of Abhinavagupta, on *op. cit.*, pp. 125-126; *Bharatakośa*, p. 166; *Saṅgītaratnākara*, 7. 690-692.
7. H. reads परिवृत्तिकम्. Cf. no. 72 of Bharata, ऊर्ध्वापवेष्टितौ हस्तौ सूचीपादो विवर्तितः ॥ १३२ ॥ परिवृत्तत्रिकं चैव परिवृत्तं तदुच्यते । *NŚ.* 4. 132-133, pp. 125-126; *Saṅgītaratnākara*, 7. 703 *Bharatakośa*, p. 359.
8. Cf. no. 73 of Bharata which is slightly different, एकः समस्थितः पादः ऊरुपृष्ठे स्थितोऽपरः ॥ १३३ ॥ मुष्टिहस्तश्च वक्षःस्थः पार्श्वजानु तदुच्यते । *NŚ.* 4. 133-134, p. 126; *Saṅgītaratnākara*, 7. 695-696; *Bharatakośa*, p. 367.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पञ्चतालान्तरौ पादौ करौ चापि प्रलम्बितौ ।
पुरोऽवलोकिनी दृष्टिर्भवेद् **गृध्रावलीनके**[1] ॥ ७७ ॥

हस्तौ प्रलम्बितौ यत्र पादौ च स्वस्तिकाकृती ।
नम्रं पार्श्वं नतं वक्त्रं यत्र तत् **सन्नतं**[2] मतम् ॥ ७८ ॥

अङ्गुष्ठेन यदा भूमिस्ताड्यते पाद एव वा ।
[3]कुञ्चितश्च समौ हस्तौ यत्र **सूची**[4] तदुच्यते ॥ ७९ ॥

सर्वं सूचीगतं लक्ष्म करणे यत्र सम्भवेत् ।
[5]वामोऽञ्चितो नतो हस्तस्त्व**र्द्धसूचीति**[6] तन्मतम् ॥ ८० ॥

दक्षिणश्चरणः पृष्ठे वामः स्यादग्रतो यदि ।
सूच्यावृत्तौ करौ यत्र [7]**सूचीविद्धा**भिधं हि तत् ॥ ८१ ॥

[8]अपक्रान्तः पदो यत्र दक्षिणः स्वस्तिकाकृती(तिः) ।
करौ च मणिबन्धस्थौ करणं तद् **विलोलितम्**[9] ॥ ८२ ॥

---

1. Cf. no. 74 of Bharata, पृष्ठः प्रसारितः पादः किञ्चिदञ्चितजानुकः ॥ १३४ ॥ यत्र प्रसारितौ बाहू तत्स्यात् गृध्रावलीनकम् । *NŚ.* 4. 134-135, pp. 126-127 ; *Saṅgītaratnākara*, 7. 697 ; *Bharatakośa*, p. 181.
2. Cf. no. 75 of Bharata, उत्प्लुत्य चरणौ कार्यावग्रतः स्वस्तिकस्थितौ ॥ सन्नतौ च तथा हस्तौ सन्नतं तदुदाहृतम् । *NŚ.* 4. 135-136, p. 127 ; *Saṅgīta-ratnākara*, 7. 707-708 ; *Bharatakośa*, p. 700.
3. P.---अंकुचितश्च समो हस्तो.
4. cf. no. 76 of Bharata, कुञ्चितं पादमुत्क्षिप्य कुर्यादग्रस्थितं भुवि ॥ १३६ ॥ प्रयोगवशगौ हस्तौ सा सूची परिकीर्तिता । *NŚ.* 4.136-137, p. 127; *Bharatakośa*, p. 735 ; *Saṅgītaratnākara*, 7.698-699.
5. H.—वामांचितौ मतौ हस्तौ.
6. cf. no. 77 of Bharata, अलपद्मः शिरोहस्तः सूचीपादश्च दक्षिणः ॥ १३७ ॥ यत्र तत्करणं ज्ञेयमर्धसूचीति नामतः । *NŚ.* 4.137-138, p. 127 ; *Bharatakośa*, p. 32 ; *Saṅgītaratnākara*, 7.699.
7. cf. no. 78 of Bharata, पादसूच्या यदा पादो द्वितीयस्तु प्रविध्यते ॥ १३८ ॥ कटिवक्षः स्थितौ हस्तौ सूचीविद्धं तदुच्यते । *NŚ.* 4.138-139, pp. 127-128; *Bharatakośa*, p. 736 ; *Saṅgītaratnākara*, 7.700-701.
8. H.—अपक्रान्तपदो.
9. There is no *Vilolitam* known to Bharata and others, but cf. no. 79, *Apakrāntam* of Bharata, कृत्वोद्वलितं पादमपक्रान्तक्रमं न्यसेत्

P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

यदा निकुट्टितौ पादौ दक्षिणः कुञ्चितः करः ।
[1]लताख्यश्च परो यत्र तदिदं सर्पितं[2] स्मृतम् ॥ ८३ ॥

दण्डाकारं भवेत् पादं निकुञ्च्याग्रे धृतं परम् ।
आविद्धौ तु करौ यत्र [3]दण्डपाताभिधं च तत् ॥ ८४ ॥

अञ्चितः कुञ्चितः पृष्ठे हस्तः पादो मुखं तथा ।
उत्प्लुत्योत्प्लुत्य गमनं यत्र तद् हरिणप्लुतम्[4] ॥ ८५ ॥

अर्द्धाङ्गं वलितं पृष्ठे शेषमर्द्धं तथाग्रतः ।
[5]कुञ्चितप्रान्तहस्तत्वादेतत् प्रेङ्खोलितं[6] मतम् ॥ ८६ ॥

रेचितौ [7]च यदा बाहू हस्तौ चाभिमुखाङ्गुली ।
चरणौ स्वस्तिकाकारौ नितम्बे तूत्प्लुतिस्तदा[8] ॥ ८७ ॥

---

॥ १३९ ॥ प्रयोगवशगौ हस्तावपक्रान्तं तदुच्यते । *NŚ.*, 4.139-140, p. 128; *Bharatakośa*, p. 21; *Saṅgītaratnākara*, 7.713.

1. H.—लताक्षश्च करो.
2. cf. no. 81 of Bharata, अञ्चितापसृतौ पादौ शिरश्च परिवाहितम् ॥ रेचितौ च तथा हस्तौ तत्सर्पितमुदाहृतम् । *NŚ.* 4.141-142, p. 128-129, *Saṅgītaratnākara*, 7.708-709 *Bharatakośa*, p. 712.
3. cf. no. 82, Daṇḍapāda, of Bharata, नूपुरं चरणं कृत्वा दण्डपादं प्रसारयेत् ॥ १४२ ॥ क्षिप्राविद्धकरं चैव दण्डपादं तदुच्यते । *NŚ.*, 4. 142-43, p. 129, *Saṅgītaratnākara*, 7.704-705; *Bharatakośa*, p. 266.
4. cf. no. 83 of Bharata, अतिक्रान्तक्रमं कृत्वा समुत्प्लुत्य निपातयेत् ॥ १४३ ॥ जङ्घाञ्चितोपरि क्षिप्ता तद्विद्याद् हरिणप्लुतम् । *NŚ.* 4.143-144, p. 129; *Bharatakośa*, p. 768; *Saṅgītaratnākara*, 7.702.
5. P.—कुंचित्प्रान्तहस्त.
6. cf. no. 84 of Bharata, डोलापादक्रमं कृत्वा समुत्प्लुत्य निपातयेत् ॥ १४४ ॥ परिवृत्तत्रिकं चैव तत् प्रेङ्खोलितमुच्यते । *NŚ.* 4.144-145, pp. 129-130; *Bharatakośa*, p. 409; *Saṅgītaratnākara*, 7.706 707.
7. P. omits च.
8. No. 85 of Bharata, cf., भुजावूर्ध्वविनिष्क्रान्तौ हस्तौ चाभि(धो)मुखाङ्गुली ॥ बद्धा चारी तथा चैव नितम्बे करणे भवेत् । *NŚ.* 4.145-146, p. 130; *Bharatakośa*, p. 331; *Saṅgītaratnākara*, 7.714-715.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

व्यावृत्य [1]चरणन्यासः कुञ्चितौ च करौ नतौ ।
किञ्चिच्च सन्मुखीभूतं[2] मुखं स्यात् **स्खलिते**[3] पुनः ॥ ८८ ॥

वामः पादो भवेत्पृष्ठे दक्षिणस्त्वग्रगो यदि ।
नितम्बे कुञ्चितो वामो हस्तस्तत् **करिहस्तकम्**[4] ॥ ८९ ॥

रेचितो दक्षिणो हस्तो वामः शुकमुखो यदि ।
निकुट्टितौ तथा पादौ यत्र तत्र **प्रसर्पितम्**[5] ॥ ९० ॥

द्रुतं निवेशयेदग्रे वामोऽङ्घ्रिः (मोऽङ्घ्रिः) पृष्ठतः[6] परः ।
पृष्ठेऽवलोकनं चापि **सिंहविक्रीडिते**[7] भवेत् ॥ ९१ ॥

कुञ्चितोऽर्द्धतलः [8]पादो [9]दक्षिणः स्यान्नतं शिरः ।
कुञ्चितोऽसन्मुखौ हस्तौ [10]**सिंहाकर्षणसंज्ञके** ॥ ९२ ॥

---

1. H.—चरणं न्यासः　　2. H.—सन्मुखीभूतो.
3. cf. no. 86 of Bharata, दोलापादक्रमं कृत्वा हस्तौ तदनुगावुभौ ॥ १४६ ॥ रेचितौ घूर्णितौ वापि स्खलितं करणं भवेत् । *NS.* 4.146-147, p. 130, *Bharatakośa*, p. 745; *Saṅgītaratnākara*, 7.716.
4. cf. 87 of Bharata, एको वक्षःस्थितो हस्तः प्रोद्वेष्टिततलोऽपरः ॥ अञ्चितश्चरणश्चैव प्रयोज्यः करिहस्तके । *NS.* 4.147-148, pp. 130-31; *Bharatakośa*, p. 113; *Saṅgītaratnākara*, 7.710-711.
5. cf. no. 88 of Bharata, एकस्तु रेचितो हस्तो लताख्यस्तु तथा परः ॥ प्रसर्पिततलौ पादौ प्रसर्पितकमेव तत् । *NS.* 4.148-149, p. 131, *Saṅgītaratnākara*, 7.711-712; *Bharatakośa*, pp. 397-398.
6. P.—पृष्ठगः.
7. Cf. no. 89 of Bharata, अलातं च पुरः कृत्वा द्वितीयं च द्रुतक्रमम् ॥ हस्तौ पादानुगौ चापि सिंहविक्रीडिते स्मृतौ । *NS.* 4. 149-150, pp. 131; *Bharatakośa*, p. 728; *Saṅgīta-ra.*, 7. 717-18.
8. P.—पादौ.
9. P.—दक्षिण स्या०
10. Cf. no. 90 of Bharata, पृष्ठप्रसर्पितः पादस्तथा हस्तौ निकुञ्चितौ ॥ पुनस्तथैव कर्तव्यौ सिंहाकर्षितके द्विजाः । *NS.* 4. 150-151, pp. 131-132; *Bharatakośa* p. 729; *Saṅgīta-ra.*, 7. 718-719.

P. P. Ac. Gunratnasuri M.S.　　Jin Gun Aaradhak Trust

कुञ्चितौ कर्त्तरी वक्त्रौ( वक्रौ ) करौ वक्षसि यत्र तु ।
ऊर्वोः [1]पार्ष्ण्योश्च सङ्घट्टात् **पार्ष्णिसङ्घट्टितं**[2] मतम् ॥ ९३ ॥

वामः प्रलम्बितः पादस्तथा हस्तः प्रलम्बितः ।
दक्षिणः कुञ्चितो यत्र भवे**दुपसृतं**[3] च तत् ॥ ९४ ॥

पादाग्रे तलसञ्चाराद्घट्टितं भूतलं यदा ।
पार्श्वविवर्तितं चैव **तलसङ्घट्टितं**[4] तदा ॥ ९५ ॥

[5]लताख्यो दक्षिणो हस्तस्तथा वामश्च रेचितः ।
नम्रौ पादौ नता ग्रीवा यत्र त**ज्जनितं**[6] स्मृतम् ॥ ९६ ॥

कुञ्चितो दक्षिणः पादः पतितोत्पतितः परः ।
पादवच्च करो[7] यत्र **पतितोत्पतितं**[8] तु तत् ॥ ९७ ॥

---

1. P.—पार्ष्णोश्च.
2. There is no *karaṇa* of this name given by Bharata and others.
3. H.—उपश्रितं. Cf. no. 92 of Bharata, which seems to be different from our *upasṛtam*, आक्षिप्तश्चरणश्चैको हस्तौ तस्यैव चानुगौ ॥ आनतं च तथा गात्रं तथोपसृतकं भवेत् । *NŚ*. 4. 152-153, p. 132; *Bharatakośa*, p. 82 ; *Saṅgītaratnākara*, 7. 727-728.
4. Cf. no. 93 of Bharata, दोलापादक्रमं कृत्वा तलसङ्घट्टितौ करौ ॥ रेचयेच्च करं वामं तलसङ्घट्टिते सदा । *NŚ*. 4. 153-154, pp. 132-133 ; *Bharatakośa*, p. 243 ; *Saṅgītaratnākara*, 7. 729-730.
5. H.—लताक्षो.
6. Cf. no. 94 of Bharata, एको वक्षःस्थितो हस्तो द्वितीयश्च प्रलम्बितः ॥ तलाग्रसंस्थितः पादो जनिते करणे भवेत् । NŚ. 4. 154-155, p. 133 ; *Bharatakośa*, pp. 223-24 ; *Saṅgītaratnākara*, 7. 726-727.
7. P.—करौ.
8. Bharata gives, as no. 95, *avahittham*, cf. जनितं करणं कृत्वा हस्तौ चाभिमुखाङ्गुली ॥ शनैर्निपतितौ चैव ज्ञेय तदवहित्थकम् । *NŚ*. 4.155-156, pp. 133-34; also *Saṅgītaratnākara*, 7.720-723; *Bharatakośa*, p. 41.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ऊर्वोः [1]पा(प)दोश्च संश्लेषो मनाक् पार्श्वं नतं तथा ।
ऊर्ध्वबाहुः करो वामः [2]पादोरुश्लिष्टके भवेत् ॥ ९८ ॥

निकुट्टितौ पदौ न्यस्य यत्रोत्प्लुत्य प्रवर्तनम् ।
[3]कुञ्चितौ रेचितौ हस्तौ तदेलाक्रीडितं[4] मतम् ॥ ९९ ॥

[5]उ(ऊ)रौ विवर्तितौ पादौ रेचितौ ललितः करः ।
लताभिधे (धः) परो[6] यत्र तदूरुवृत्तमुच्यते[7] ॥ १०० ॥

लताभिधौ करौ पादौ शिथिलौ च नतं शिरः ।
हावभावान्वितं वक्त्रं **मदनस्खलितं**[8] भवेत् ॥ १०१ ॥

कुञ्चितोर्ध्वमुखे पादे द्वितीये चाग्रतः स्थिते ।
हस्तौ दोलामुखोद्वृत्तौ [9]**पादाक्रान्तं** विदुर्बुधाः ॥ १०२ ॥

---

1. P.—पदोश्च. 2.—पदोरुश्लिष्टके.

Bharata does not give this *karaṇa*, but he gives *niveśam*, as no. 96, which is different. Cf. करौ वक्षःस्थितौ कार्यावुरो निर्भुग्नमेव च ॥ मण्डलस्थानकं चैव निवेशं करणं तु तत् । *NŚ.* 4.156-157, pp. 133-134 ; also, *Saṅgītaratnākara*, 7.724 ; *Bharatakośa*, p. 335.

3. P.—कुंचितरेचितौ.
4. Cf. no. 97 of Bharata, तलसञ्चरपादाभ्यामुत्प्लुत्य पतनं भवेत् ॥ संनतं वलितं गात्रमेलकाक्रीडितं तु तत् । *NŚ.* 4.157-158, p. 134 ; *Bharatakośa*, p. 94 ; *Saṅgītaratnākara*, 7.725-726.
5. P.—उरू. 6. H.—करौ.
7. Cf. no. 98, *ūrūdvṛttam* of Bharata, करमावृत्तकरणमूरुपृष्ठेऽञ्चितं न्यसेत् ॥ जङ्घाञ्चिता तथोद्वृत्ता ह्यूरुद्वृत्तं तु तद्भवेत् । *NŚ.* 4. 158-159, p. 134 ; *Saṅgītaratnākara*, 7.742-743 ; *Bharatakośa*, p. 86.
8. Cf. no. 99 of Bharata, करौ प्रलम्बितौ कार्यौ शिरश्च परिवाहितम् ॥ पादौ च वलिताविद्धौ मदस्खलितके द्विजाः । *NŚ.* 4.159-160, pp. 134-135 ; *Saṅgītaratnākara*, 7.734-735 *Bharatakośa*, p. 460.
9. Cf. no. 100, *Viṣṇukrāntam*, of Bharata, पुरः प्रसारितः पादः कुञ्चितो गगनोन्मुखः ॥ करौ च रेचितौ यत्र विष्णुक्रान्तं तदुच्यते । *NŚ.* 4.160-161, p. 135 ; *Saṅgītaratnākara*, 7.732 ; *Bharatakośa*, p. 625.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

लताभिधः करो वामो दक्षिणः कुञ्चितो यदि ।
कटिच्छि( श्छि )न्ना पदो नम्रौ तल्लताकुञ्चितं[1] भवेत् ॥ १०३ ॥
वक्षःकटिस्थितौ हस्तौ कुञ्चितौ च नतं मुखम् ।
निकुट्टितः पदो वामस्तत् स्यात् [2]कटिनिकुट्टितम् ॥ १०४ ॥
सन्मुखस्थाङ्गुली हस्तौ दक्षिणाङ्गस्थकूर्परौ ।
वामभागास्थितः पादो वाम उद्घाटिते[3] भवेत् ॥ १०५ ॥
निकुट्टितः पदो यत्र कटिर्नम्राञ्चितौ करौ ।
कुञ्चितोऽह्रि( तोऽङ्घ्रि )र्नतं पार्श्वं [4]वृषभक्रीडिते मतम् ॥ १०६ ॥
लोलितावर्तितं शीर्षं रेचितौ च तथा करौ ।
पादौ च [5]लोलितौ यत्र करणं तच्च लोलनम्[6] ॥ १०७ ॥
स्वस्तिकापसृतौ पादौ दक्षिणाङ्गस्थितं मुखम् ।
लतारेचितकौ हस्तौ नम्रौ नागापसर्पितौ[7] ॥ १०८ ॥

---

1. This is not known to Bharata, but cf. no. 101, *sambhrāntam,* of NŚ.—करमावर्तितं कृत्वा ह्यूरुपृष्ठे निकुञ्चयेत् ॥ ऊरुश्चैव तथाविद्धः सम्भ्रान्तं करणं तु तत् । *NŚ.* 4.161-162, 135 ; *Bharatakośa,* p. 710 ; *Saṅgītaratnākara,* 7.736-737.
2. Cf. *Viṣkambham,* no. 102 of Bharata, अपविद्धः करः सूच्या पादश्चैव निकुट्टितः ॥ वक्षस्थश्च करो वामो विष्कम्भे करणे भवेत् । *NŚ.* 4. 162-63, p. 135 ; *Saṅgītaratnākara,* 7. 737-739, *Bharatakośa,* p. 624.
3. Cf. *Udghaṭṭitam,* no. 103 of Bharata, पादौ उद्घट्टितौ कार्यौ तलसङ्घट्टितौ करौ ॥ नतश्च पार्श्वं कर्तव्यं बुधैरुद्घट्टिते सदा । *NŚ.* 4. 163-164, pp. 135-136 ; *Saṅgītaratnākara,* 7. 740 ; *Bharatakośa,* p. 75.
4. P.—वृषभक्रीडितं. Cf. no. 104 of Bharata, प्रयुज्यालातकं पूर्वं हस्तौ चापि हि रेचयेत् ॥ कुञ्चितावञ्चितौ चैव वृषभक्रीडिते सदा । *NŚ.* 4. 164-165, p. 136 ; *Saṅgītaratnākara,* 7. 744-745 ; *Bharatakośa* p. 634.
5. H.—लालितौ.
6. Cf. no. 105 of Bharata, रेचितावञ्चितौ हस्तौ लोलितं वर्तितं शिरः । उभयोः पार्श्वयोर्यत्र तल्लोलितमुदाहृतम् । *NŚ.* 4. 165-166, pp. 136-37 ; *Bharatakośa,* p. 575 ; *Saṅgītaratnākara,* 7. 733-734.
7. Cf. no. 106 of Bharata, स्वस्तिकापसृतौ पादौ शिरश्च परिवाहितम् । रेचितौ च तथा हस्तौ स्यातां नागापसर्पिते । *NŚ.* 4.166-167, p. 137; *Bharatakośa,* p. 314 ; *Saṅgītaratnākara,* 7. 745-746.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

हस्तश्च हृदये वामो दक्षिणस्तदधः[1] करः ।
नतं वक्त्रं नतौ पादौ [2]**शकटास्ये** विदुर्बुधाः[3] ॥ १०९ ॥

ऊर्ध्वीकृतः पदो वामो वामो हस्तश्च रेचितः ।
उन्नतं च तथा वक्षो **गङ्गावतरणे**[4] भवेत् ॥ ११० ॥

करणानां समानां चेत्युक्तमष्टोत्तरं शतम् ।
विषमाणां च तल्लक्ष्म[5] योगिनामासनेषु यत् ॥ १११ ॥

## ( इति करणानि )

द्वात्रिंशदङ्गहाराः स्युः [6]करणैर्जनितास्तु ते ।
भ्रमरीश्च तथा चारीर्द्वात्रिंशत्सम्मिता विदुः ॥ ११२ ॥

अङ्गहारादिनामानि कथ्यन्ते तानि साम्प्रतम् ।
तथा संज्ञाङ्गहाराणामथ सङ्क्षेपतस्त्विह ॥ ११३ ॥

करणैस्त्रिभिः कलापश्चतुर्भिः खण्ड[7] उच्यते ।
सङ्घातः पञ्चभिस्तैश्चाङ्गहारः[8] करणोद्भवः[9] ॥ ११४ ॥

---

1. P.—दक्षिणस्त्वधः.
2. Cf. no. 107 of Bharata, निषण्णाङ्गस्तु चरणं प्रसार्य तलसञ्चरम् ॥ उद्वाहितमुरः कृत्वा शकटास्यं प्रयोजयेत् । *NŚ.* 4.167-168, p. 137; *Bharatakośa*, p. 651; *Saṅgītaratnākara*, 7. 741-742.
3. H.—बुधा विदुः ॥
4. Cf. no. 108 of Bharata, ऊर्ध्वाङ्गुलितलौ पादौ त्रिपताकावधोमुखौ ॥ हस्तौ शिरस्सन्नतं च गङ्गावतरणं त्विति । *NŚ.* 4. 168-169, pp. 137-138, *Bharatakośa*, pp. 163-164 ; *Saṅgītaratnākara*, 7. 747-748.
5. H.—लक्ष्मायोगि०
6. P.—करिणै०
7. P.—०श्चाङ्गहाराः करणोद्भवाः ॥
8. Cf खण्डस्त्रिभिस्स्यात्करणैर्व्यायामो मध्यमस्त्वसौ ।—वेमः quoted in Bharatakośa, p. 160. Kumbha quoted in Bharatakośa, p. 787, however, says :—त्रिभिः कलापकश्चैव चतुर्भिः खण्डको मतः । सङ्घातः पञ्चमश्चैव संज्ञाभेदा इतीरिताः ॥ Also see *Saṅgītaratnākara*, 7. 792. Also see, *NŚ.* 10.1.4, Vol. II. pp. 93-94.
9. For *aṅgahāra*, see *Bharatakośa*, pp. 787-788 quoting *Kumbha*, *Hammīra*, *Saṅgītanārāyaṇa*, *Vipradāsa* and *Aśoka*, and see *ibid.*,



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

हरिप्रियश्च$_{१}$ पर्यस्तः$_{२}$ सूचीविद्धोऽ$_{३}$पविद्धकः$_{४}$ ।
[1]आक्षिप्तो$_{५}$द्‌घट्टितौ$_{६}$ चैव विष्कम्भ$_{७}$श्चालिपल्लवः$_{८}$[2] ॥ ११५ ॥

भुजङ्गत्रस्ताञ्चितश्चैव$_{९}$ करिसंस्फोटितस्तथा$_{१०}$ ।
रेचितस्वस्तिकाद्यश्च$_{११}$ पार्श्वस्वस्तिकसंज्ञकः$_{१२}$ ॥ ११६ ॥

वृश्चिकापसृतो$_{१३}$त्क्षिप्तौ$_{१४}$ निकुट्टो[3]$_{१५}$ विलसन्मदः$_{१६}$ ।
गतिमण्डल$_{१७}$सङ्घट्टौ$_{१८}$ परिच्छिन्नो$_{१९}$ भुजाञ्चितः$_{२०}$ ॥ ११७ ॥

[4]परावृत्ता$_{२१}$लात$_{२२}$पार्श्वच्छेदाख्यो( ख्या )$_{२३}$ विद्युतो भ्रमः$_{२४}$ ।
उद्‌वृतश्च$_{२५}$ तथालीढो$_{२६}$ रेचित$_{२७}$स्फुरितस्तथा$_{२८}$ ॥ ११८ ॥

[5]कटीच्छिन्नो$_{२९}$ महोद्‌वृत्त$_{३०}$स्तथा स्याज्जयदर्पकः$_{३१}$ ।
[6]अर्द्धनिकुट्टकश्चेति$_{३२}$ द्वात्रिंशत्सङ्ख्यया त्वमी ॥ ११९ ॥

## इत्यङ्गहाराः[7] ।

अन्तर्भ्रमरिका पूर्वा बाह्यभ्रमरिका ततः ।
अलग्नभ्रमरी चैव चक्रभ्रमरिका परा ॥ १२० ॥

[8]छत्रभ्रमरिकाऽतश्च रेचितभ्रमरी तथा ।
तिरिपभ्रमरी चैव [9]चित्तभ्रमरिकाष्टमी ॥ १२१ ॥

---

pp. 6-7. Also see, *Saṅgītaratnākara*, 7. 789 ff. and comm. on ( Adyar ed. Vol. IV ), pp. 252 ff.

1. H.— आक्षप्तो$_{५}$द्‌घटितौ.
2. H.—$_{०}$श्चापिपल्लवः ।
3. H.—निकुट्टौ.
4. P.—परावृत्ता$_{२१}$लत.
5. H.—करीटीछिन्नो.
6. H.—अर्द्धनिःकुट्टकश्चेति.
7. For lists of *aṅgahāras*, see, *NŚ*. 4. 19-27, pp. 88-90 and for *aṅgahāralakṣaṇa* according to Bharata, see, *NŚ*. 4. 175 ff. pp. 138 ff. The first one is known as *Sthirahasta* or *Harapriya*. Also see, *Saṅgītaratnākara*, 7. 789 ff. and comm. on *op. cit.*, pp. 252 ff. For a different tradition about 24 *aṅgahāras*, see, *Bharatārṇava*, Chp. IX, pp. 289-310.
8. P.—चक्रभ्रमरि०
9. P.— चैवांचित०

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रत्येकं ताश्चतुर्धा स्युर्नाभसी भूमिसम्भवा[1] ।
ऊर्ध्वस्थाधःस्थिता चेति भ्रमर्यो दन्तसम्मिताः ॥ १२२ ॥

## इति भ्रमर्यः[2]

कटेरधोभवाश्चार्यस्ताः स्युः षोडश भूमिजाः ।
षोडशाऽपि नभोजाता द्वात्रिंशत्सङ्ख्ययेति ताः ॥ १२३ ॥
स्थितावर्ता भ्रमतल्ली[3] स्वेडकीक्रीडिताश्चिता[4] ।
ऊरूद्वृत्तोत्सन्दिता च विच्यता(वा)[5] रेचिकोर्द्धिका[6] ॥ १२४ ॥
शकटास्या च जनिता विद्धा वीची सुबाहुका[7] ।
उद्वेष्टिता च संश्लिष्टा भूमिचार्यस्तु षोडशः(श) ॥ १२५ ॥

---

1. H.—॰नातसी भूमिसंभवाः ।
2. *Bhramarīs* are not referred to by Bharata. Śārṅgadhara in his *Saṅgītaratnākara*, 7. 749 ff. refers to *Deśīkaraṇas* wherein he describes several *utplutikaraṇas*. The *utplutikaraṇas* include *Bhramarīs*, बाह्यभ्रमरी, अन्तर्भमरी, छत्रभ्रमरी, तिरिपभ्रमरी, अलगभ्रमरी, चक्रभ्रमरी, अञ्चितभ्रमरी, शिरोभ्रमरी, दिग्भ्रमरी,—*Saṅgīta-ra.*, 7. 755 and comm. on *op. cit.*, Vol. IV. pp. 241-242, and *op. cit.*, 7. 775-782 defining these nine *Bhramarīs*. It is interesting to note that nine *Bhramarīs* are defined even though in v. 755 it is said—सप्त भ्रमर्यो भ्रमरी शिरःपूर्वा दिगादिमा ॥ ७५५ ॥

   Our text names eight *Bhramarīs*; we have रचितभ्रमरी for उचितभ्र॰ or अञ्चितभ्र॰ and चित्तभ्र॰ for शिरोभ्र॰ of Śārṅgadeva. Since P. Manuscript reads अञ्चितभ्र॰ for चित्तभ्र॰ in v. 121 of our text; it is just possible that the reading रेचितभ्र॰ in 121$^b$ is wrong in both P. and H. manuscripts. For other definitions of the different *Bhramarīs*, see *Bharatakośa*.

   The eight *Bhramarīs*, noted above by our text, are again four-fold, नाभसी, भूमिसम्भवा, ऊर्ध्वस्था and अधःस्थिता and thus make a total 32 *Bhramarīs* in all.
3. P.—॰भ्रमन्तल्ली.
4. H.—स्वेडिताक्रीडितां च तां ।
5. H.—विशता.
6. P.—रेचिकोर्द्धिकाः ।
7. H.—स्वबाहुका.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विभ्रान्ता दोलपादा दण्डा नूपुरपादिका[1] ।
[2]अतिक्रान्तोर्ध्वजानुश्चालाताक्षिप्ताऽथ सूचिका ॥ १२६ ॥

भुजङ्गा घूर्णितोन्मत्ता सङ्क्षिप्ता तिर्यगञ्चिता ।
उत्प्लुतालगसंस्थाना चार्यः षोडश नाभसाः ॥ १२७ ॥

इति चार्यः[3] ॥

एतल्लक्ष्माण्यल्पवाक्यैर्न ज्ञायन्ते यतस्ततः ।
एतेषां लक्षणं [4]चात्र नोक्तं ग्रन्थस्य गौरवात् ॥ १२८ ॥

कालेऽस्मिन्नर्त्तका मूर्खा विद्वांसः साधका न हि ।
न नर्त्तकान्विनाभ्यासः [5]शास्त्रात् सिद्धिर्न तं विना ॥ १२९ ॥

आबाल्यात्कपिवत्ते हि साध्यन्ते तैः स्वभाषया ।
स्वाभ्यासभाषया ते तज्जानते [6]नान्यभाषया ॥ १३० ॥

नृत्याङ्गाख्या गिरः क(का)श्चिद्[7] वक्ष्ये नर्त्तकभाषया[8] ।
विशेषतो हि सिद्ध्यन्ति[9] चौरवत्ते स्वभाषया ॥ १३१ ॥

**तद्यथा**—मूलश्रमु(मउ) [10]चालश्रमु(मउ) दण्डवाडश्रमु(मउ) बइठा[11] अलीढ ।

---

1. H.—नूपुरपाटिका ।   2. H.—अतिक्रांतोर्ध्वजानुश्चालाता०

3. The *Cāris* are well-known. The lists of Bharata and Śāraṅgadeva generally agree. Cf. *NŚ*. 10. 14-29, 30-47, Vol. II. (G.O.S. ed.), pp. 96-107 and *Saṅgītaratnākara*, 7. 898-965, pp. 277-298. For the different *Cāris*, also see *Bharatakośa*. It may be noted that Śārṅgadeva gives separate lists of *Deśīcāris* also in *op. cit.*, 7. 908-916.

The lists of the two classes of *Cāris* given by our text do not fully agree with those of Bharata and Śārṅgadeva.

4. H.—चारी.   5. P.—शास्त्रिद्धर्न.
6. P.—नटयु०   7. P.—कानि.
8. P.—वक्ष्येऽनंतभाषया.   9. P.—सिद्ध्यंते.
10. P.—वा(चा)लाश्रनु.   11. H.—बइढी.

ऊभी अलीढ । चित्रगाडु(डउ) झलकणी ।

एते सप्तभ्रमाः ।

अन्येऽपि नृत्यभावाः—गाडलुल्यु(ल्यउ)[1] ।
पावटउ । [2]माछलियउ सिहरियउ[3] । तिरपिउ[4] ।
वइठी [5]छडक । ऊभी छडक । आविंडु(।) पाछिंडु[6] ।
एकसरा(।) दुसरा प्रमुखाः ।

नृत्यस्याङ्गानि चैतानि तथान्यान्यपि साधकः ।
कथं नु साधयेत् कुत्रेत्यभ्यासार्थमिह[7] ब्रुवे ॥ १३२ ॥

शुभे दिने चन्द्रबले [8]नृत्येऽभ्यासं समारभेत् ।
सिकतासहिता रङ्गभूमिस्तत्र प्रकल्प्यते[9] ॥ १३३ ॥

शारदां च नमस्कृत्य चण्डिकां नाट्यदेवतां ।
परिच्छदं च सम्पोष्योपाध्यायं [10]तु प्रपूजयेत् ॥ १३४ ॥

---

1. P.—गालडुल्यउ. Possibly the correct reading was गाडुलल्यउ.
2. H.—माछलीउ. P.—माछुलियउ.
3. H.—सिहरिअउ.
4. P.—तिरिथउ.
5. P.—झडकाः
6. H.—आछिंडु पाछिंडु.

The emendations in the readings of the *nartaka-bhāṣā* suggested above are tentative. The words seem to be of old Rājasthāni or Gujarati which, as Shri Umashankara Joshi, has suggested, should better be called "Māru-Gurjara". I consulted some South Indian friends who suggested that these terms might also have been current in old Kannada and Telugu, but they are not sure about it. I believe these words are from the old *nartaka-bhāṣā* of Western India, especially, Rājasthān and Gujarat. The वइकार in वइकारलक्षणम् of v. 143 below is an old Māru-Gurjara term, found in Varṇakasamuccaya, ed. by Dr. B. J. Sandesara.

7. H.—॰महिर्बुधैः.
8. H.—नित्याभ्यासे.
9. P.—प्रकल्पते.
10. P. omits तु. H.—तु पूजयेत्.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नृत्योपजीवी कन्या वा राजकन्याथ कौतुकी ।
तत्र मूलश्रमाभ्यासं कुर्यात्प्रातर्बुभुक्षितः( ता )[1] ॥ १३५ ॥

कृताभ्यासे तदङ्गज्ञात्[2] कारयेदङ्गमर्दनाम् ।
वह्वम्भसाभिषिच्यामुं पोषयेत् स्निग्धभोजनैः ॥ १३६ ॥

समस्ताभ्याससंयुक्ता नर्त्तकी पात्रमुच्यते ।
पट्टबन्धे कृते पात्रं राज्ञोऽग्रे नृत्यमाचरेत् ॥ १३७ ॥

महोत्सवे विवाहादौ कर्तव्यं नृत्यमुत्तमं ।
[3]वादनाद्गजरस्याथ पात्रं स्याच्चरणान्वितं ॥ १३८ ॥

कुर्यात्पुष्पाञ्जलिक्षेपं पात्रं रङ्गाङ्गणे ततः ।
गीतवाद्यानुगं नृत्यं कुर्याच्छुष्कं न तत् क्वचित् ॥ १३९ ॥

## इति पद्धतिलक्षणम् ॥

तूर्यत्रयनिधिः श्रीमान्दक्षः शृङ्गारकीर्तिभाक् ।
गुणागुणविशेषज्ञो दाता शस्यः सभापतिः ॥ १४० ॥

## इति सभापतिलक्षणम् ॥

सावधानास्तु मध्यस्थाः प्रयोगज्ञा बहुश्रुताः ।
सुकुमारगिरो दानशूराः सभ्याः स्युरुत्तमाः ॥ १४१ ॥

## इति सभ्यलक्षणम् ॥

दातारो नृपपार्श्वस्थाः सुगुणज्ञा बहुश्रुताः ।
विवेचकाश्च श्रीमन्तो ये लोकास्तन्मया सभा ॥ १४२ ॥

## इति सभालक्षणम् ॥

तेषां कलावतां मध्ये मुख्यो वाङ्मयकारकः[4] ।
[5]शास्त्रज्ञश्च प्रयोगज्ञः सम्यग्गीतकरो मतः ॥ १४३ ॥

## इति बइकारलक्षणम्[6] ॥

---

1. H.—बुभुक्षिता. 2. H.—तदङ्गज्ञः
3. H.—वाजनाद्ग० 4. P.—गाग्गेयकारकः । 5. P.—सशास्त्रज्ञ.
6. *Baikāra* is mentioned in *Varṇakasamuccaya* ( Baroda, 1956 ), Vol. I., pp. 13, 14, 49.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गन्धर्वो बहुगीतज्ञो माधुर्यात् श्रुतिसौख्यकृत् ।
[1]यद्गीतेन जनः सर्वो रज्यते स तु रञ्जकः ॥ १४४ ॥

इति गन्धर्वरञ्जकलक्षणम् ॥

सुगीतनृत्यवाद्यैस्तु मनो यस्य न रज्यते ।
स पशुर्नररूपस्थो दाता चेन्नाकृती स च ॥ १४५ ॥

[2]आलोच्य शास्त्रपाथोधिं ज्ञानश्रीर्या प्रकाशिता[3] ।
तया त्रिभुवनं सर्वं सुखीभवतु शाश्वतम् ॥ १४६ ॥

बध्नीत [4]धृतिं विबुधाः पण्डितजनवल्लभार्थवद्धेऽस्मिन् ।
सङ्गीतोदधिसारे सुशास्त्ररत्ने निरुपमाने [तु] ॥ १४७ ॥

बुधपितृसोमाल्हादिनि तद्दर्शनजातसुरसकल्लोले ।
क्रीडत सङ्गीताब्धावेतद्वाक्य[5]प्रवाहेण ॥ १४८ ॥

राजानः प्रतिबोधिताः कति कति ग्रन्थाः स्वयं निर्मिताः !
वादीन्द्राः कति निर्जिताः कति तपांस्युग्राणि तप्तानि च ।
[6]श्रीमद्हर्षपुरीयगच्छमुकुटैः श्रीसूरिसुत्रामभिः
[7]सच्छिष्यैर्मुनिभिश्चा वनिनवरं(श्चवानितवरं)[8] वागीश्वरीतन्मितम् ॥ १४९ ॥

तद्गच्छेऽभयदेवसूरिसुगुरोः श्रीकर्णभूपेन यत्[9]
[10]संज्ञा सामलधारिणोऽपि मलधारीति स्वयं निर्मिता ।
तद्वंशे नरचन्द्रसूरिरभवत् सच्छास्त्रसङ्गीतभृत् ।
तस्माच्छ्रीतिलकाभिधो गुरुरभूद्यद्दत्तदीक्षस्त्वहम् ॥ १५० ॥

---

1. P.—यद्गानेन.
2. P.—आलोक्य.
3. P.—प्रशिता.
4. P.—धृति.
5. H.—०प्रवाहिण.
6. P.—श्रीमद्धर्मपुरीय०
7. P.—स्वच्छिष्यै०
8. P.—०भिश्च वेत्तिनवरं.
9. H.—यः.
10. H.—संज्ञा स मलधारिणोति स्वयं.
P.—सं सन्मलधारिणोऽपि मलधारीति स्वयं.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तत्पट्टाद्रिरविश्चिरं विजयतां सन्मार्गसन्दर्शकः
सूरीन्द्रः किल राजशेखरगुरुर्वादीभपञ्चाननः ।
शिष्यस्तस्य पुनः सुधाकलश इत्याख्यां दधानो व्यधात्
सङ्गीतोपनिषत्सुसारमखिलं विज्ञानिसौख्याय यत्[1] ॥ १५१ ॥

[2]सङ्गीतोपनिषद्ग्रन्थं खाष्टाग्निशशिवत्सरे[2] ।
[3]ऋतुशून्ययुगेन्द्रब्दे तत्सारं चापि निर्ममे[4] ॥ १५२ ॥

इति श्रीमलधारिगच्छमण्डन-वादीन्द्र-श्रीराजशेखरसूरिशिष्यवाचनाचार्य-श्रीसुधाकलशविरचिते स्वोपज्ञसङ्गीतोपनिषद्ग्रन्थसारोद्धारे नृत्यपद्धतिप्रकाशनो नाम षष्ठोऽध्यायः ॥ छ ॥[5]

---

1. P.—तत्.
2. After v. 151, P. adds the following as verse 152—
   तावद् दुर्वादिसंवादतापव्यापः कथं कुतः ।
   श्रीजैनशासने यावत् सुधाकुम्भो विजृम्भते ॥ १५२ ॥

   Obviously, this self-praise does not seem to have been composed by Sudhākalaśa himself.
3. H.—ऋतुशून्ययुगेन्द्र( ? न्द्व )ब्दे.
4. P.—निर्म्मते.
5. P. adds—संवत् १५९९ वर्षे पूर्णिमागच्छे श्रीह पुण्यप्रभसूरीणां शिष्य भीमाकेनेदं संगीतशास्त्रमऽलेखि ॥ यादृशं पुस्तके दृष्टं तादृशं लिखितं मया । यदि शुद्धमशुद्ध वा मम दोषो न दीयते ॥ H. adds—यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ( । ) यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ १ ( ॥ ) संवत् १६१२ वर्षे फाल्गुन वदि ५ रवौ श्री आगमगच्छे विजानंदीया ( ? ) श्री आणंदरत्नसूरि तत्पट्टे श्री ज्ञानरत्नसूरि वाचक श्री उदय सागर ( ? ) तत्पट्टे वाचनाचार्य श्रीमंगलमाणिक्य इमं ग्रंथमलीलिखत् । अहिंटि ग्रामे ॥ Then follow a few verses of Saṅgitasārakalikā for which see Introduction.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust